यदुक्तं चर्करित एते तावदसाधव इति प्रतिवादिना प्रतिज्ञातेयन्तत्साधनमेव न वादकथायां योग्यम् ।

**End :**

त्वत्कृतानुक्तोपादानात्वस्फुटीकरणाय तसाधनस्यावश्यकत्वात् ।
धीरेण सत्यवर्यात्ममृगेन्द्रेण यशस्विना ।
क्वास्तिष × पदानन्दो निरस्ते द्वैतदन्तिनि ॥

**Colophon :**

इति श्रीमत्पदवाक्यप्रमाणपारावारपारङ्गतश्रीमत्सत्यपूर्णतीर्थभट्टारकशिष्येण सत्यवर्यतीर्थभट्टारकेण विरचितः पञ्चपदीभावप्रकाशः समाप्तः ॥

**22**

Sl. No: 33870 परमहंसकारिका Ms· No. C. 4:73

**Beginning:**

इत्येतस्मात्परस्मैपदिनो अविकरणा तिबादयो योज्यन्ते ।
भू तिप् इति स्थिते यकारः पित्कार्यार्थः ।
अपूकर्तरि धातोरपूप्रत्ययो भवति ।
कर्तरि विहितेषु तिवादिषु चतुर्षु दि × × ×
पर्यन्तेषु परतः पकारो विकरणभेदज्ञापनार्थः ॥

**End :**

रामनामाभिसङ्क्या(?)लोकाच्छेषस्य सिद्धः ।

यथा सातरादेः अन्ते सिद्धिः शब्दप्रयोगो मङ्गलार्थः प्रयोगानुसारेण बोद्धव्यः ॥

अवव्याद्वो हयग्रीवः कमलाकर ईश्वरः ।
सुखं सुरनराकारमधुपायी तयङ्कजः ॥

**Colophon :**

इति श्रीमत्परमहंसकारिका ॥

## 23

Sl. No. 33882 **प्रक्रियाकौमुदी** Ms. No. P. 760

Beginning :

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
येन धौता गिरः पुसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥
श्रीमद्विठलमानम्य पाणिन्यादिमुनीन गुरून् ।
प्रक्रियाकौमुदीं कुर्मः पाणिनीयानुसारिणीम् ।
अइउण्—

End :

जयति रुचिरमूर्तिर्मुग्धमासावलोकः
प्रशमित जनतपो विठलः स्वात्मदीपः ॥ +
बालव्युत्पत्तयेऽस्माभिः संक्षिप्योक्ता यथामति ।
प्रक्रियाकौमुदी सेयं रामचन्द्रप्रकाशिता ॥ +
सचकितमिव लक्ष्मीः सेवते + यत्पदाब्ज
ललितरकराभ्यां साधु संवाहयन्ती ॥

Colophon :

इति श्रीमत्परमहंस परिव्राजकाचार्यगोपालगुरुपूज्यपादशिष्य श्रीकृष्णाचार्यसुत श्रीरामचन्द्राचार्यविरचिता प्रक्रियाकौमुदी समाप्ता ॥

## 24

Sl. No. 33900 **प्रक्रियाकौमुदीव्याख्या** Ms. No. C. 2094

Beginning :

अलिकुलमण्डितगण्डं प्रासूहनूहतिमिरमार्तण्डम् ।
सिन्दूरारुण × ण्डं देवं वेतण्डरुण्डममलम् ॥

विघ्नविघाताय कृतं मङ्गलं आदौ निबध्नन् शिष्यावधानाय चिकिर्षितं प्रतिजानीते ॥ श्रीमददिति ॥ वयं प्रक्रिया कौमुदीं कुर्मः इत्यन्वयः ॥

**End :**

अन्योन्यस्मिन् अनुरज्यन्त इति ॥
आम् पक्षे तु अन्योन्यां पातयति ।
अन्योन्यां ददतीत्याद्यप्यूह्यम् ॥
अत्र तृतीयादि × × तिविशेषाबिधानमविवक्षितम् । द्वितीयायामपि पुंवत्वस्येष्टत्वादिति संक्षेपः ॥

**Colopoqn :**

पृथ्वीमण्डल मौलिमण्डनमणि . . . वाचस्पतिः ।
तत्सूनोः कृतरूढभावविवृतौ सत्प्रक्रियाव्याकृतौ ॥
श्रीकृष्णस्य कृतो समाप्तिपगमत् द्वित्वाश्रया प्रक्रिया ॥

## 25

**Sl· No: 33912** प्रक्रियाकौमुदीव्याख्या **Ms. No. P. 2145**

**Beginning :**

यः सेवितो हरिविरञ्चिहरप्रमुख्यैः
सिद्धार्षिभिर्मनिगणैर्मुनजैश्च सर्वैः ।
नित्यं ददाम्यभिमतं फलमास देवो
गौरीसुतो गणपतिः स करोतु सिद्धिम् ॥
सरस्वतीं नमस्कृत्य गुरुं दामोदरं तथा ।
करोमि विशदं कर्म प्रक्रियाघनकानने ॥

**End :**

सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति शपो × त्तिः ।
आम्पक्षेऽपि पूर्वं पुंवद्भावः ततः आमिति द्रष्टव्यम् ॥
तृतीयादिषु पुंवदिति आमु × × भाव इत्यर्थः । अन्योन्य × नेमाः कारयन्ति एवमन्योन्यस्मै प्रयच्छतीत्यादि । आम्पक्षे तु × संक्षेपः ।

**Colophon :**

श्रीरामावरजमण्डनमणि . . सेनात्मज गुणयुक्साधुः सतां सम्मतः
तत्पुत्रस्य च विश्वकर्मविदुषः सत्प्रक्रियाव्याकृतौ ।
संक्षेपेण कृतो समाप्तिमगमत् सर्वं सुवन्तं शुभम् ॥

## 26

Sl. No. 33914 **प्रक्रियाकौमुदीव्याख्या** Ms. No. P. 515

Beginning :

ङेप्रथमयोरम् । ङे इति लुप्तविभक्तिको निर्देशः इत्याह ॥ ङे इत्यस्येति ॥ अन्यथा बहुवचनं स्यादित्यभिप्रायः ॥ प्रथमद्वितीययोरिति ॥

End :

रामचन्द्रप्रसादेन प्रक्रियाकौमुदी यदा ।
प्रकाशिकेति व्याख्यानात् अज्ञान × न मेदिनी ।
तथाशेष विरूपा × × × दिता ।
विद्वदानन्दजननी जीयादाचन्द्रतारकम् ॥
यद्ब्रह्मादि × मानसे ॥

Colophon :

इति श्रीशेषकमलाकरदीक्षितसुत श्रीविरूपाक्षदीक्षित विरचिता प्रक्रिया-कौमुदीव्याख्या प्रकाशिकाख्या समाप्ता ॥

## 27

Sl. No. 33936 **प्रयोगविवेकसङ्ग्रहः** Ms. No. B. 1261/a

Beginning :

प्रणम्य परमात्मानं सच्चिदानन्दविग्रहम् ।
करोम्यहं प्रयोगस्य विवेकं सहकारकम् ॥
प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारकमादितः ।
संज्ञया षड्विधं तच्च त्रयोविंशतिधा पुनः ॥

End :

वर्तमाने तु निर्देशे वर्तते शतृशानचौ ।
द्रव्यसत्वापरत्वाभ्यां समासो न हि सिध्यति ॥

Colophon :

इति श्रीवररुचिविरचितसमाससङ्ग्रहे कृदन्तपटलः पञ्चमः । समासोऽयं ग्रन्थः ॥

## 23

Sl. No: 33938 | प्रयोगसङ्ग्रहः | Ms. No. C. 4218/

Beginning :

नत्वा कोटीश्वरं चोमां गणेशं भारतीं गुहम् ।
क्रियते बालबोधाय प्रयुक्तेः सङ्ग्रहो माया ॥
प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारकमादित; ।
संज्ञया षड्विधं भेदास्त्रयोविंशतिधा पुनः ॥

End :

वर्तमाने तु निर्देशो वर्तेते शतृशानचौ ।
द्रव्यसत्त्वपरत्वाभ्यां समासो न तुसिध्यति ॥
ग्रन्थनाशभयेनाहं श्लोकानां पञ्चविंशतेः ।
पदार्थभारुनिर्वाहं प्रभवेयं भवे भवे ॥

Colophon :

इति प्रयोगसङ्ग्रहे वरुणचिविरचिते चतुर्थः पटलः ॥

## 29

Sl. No. 33941 | प्रयोगसङ्ग्रहव्याख्या | Ms. No. B. 1261/B

Beginning :

अथ कारकसङ्ग्रहविवेको व्याख्यायते-प्रयोगमित्यादिना । यो-यथाभिहितं शब्दप्रयोगं ज्ञातुमिच्छति तेन आदितः प्रथमतः कारकं ज्ञेयमिति ॥ शब्दाश्रयाणां ज्ञेयानां मध्ये कारकं क्रियानिमित्तं ज्ञेयम् । तच्च कारकं संज्ञया-नाम्ना षड्विधम्- कर्तृ, कर्म, करण सम्प्रदान-अपादान-अधिकरणानीति ।

End :

पुत्रं दृष्ट्वा हृष्यति पिता । शतृशानचा कस्मिन् काले वर्तते इत्यत आह वर्तमाने + + सिध्यति इति । शतृ यथा-पचन् देवदत्तः । + + + द्रव्यसत्वापरत्वाभ्यां समासो न भवति । उदाहरणम्- कटं कुर्वन् पचमान ओदनं इत्यादि ॥

Colophon :

समाप्तोऽयं ग्रन्थः ॥

## ३०

Sl. No. 33942 प्रयोगसङ्ग्रहव्याख्या Ms. No. C. 4218/1

Beginning :

गजाननं वन्दे गजशासनन्दनम् ।

अगजागजकुम्भारिकुचास्वादन लालमम् ॥

अत्रभगवान् वररुचिः बालानां अनभ्यस्तपाणिनीयानां काव्याभ्यासेच्छूनां सुव्युत्पत्तिद्वारा समासतः प्रयोगविज्ञानार्थं प्रयोगसङ्ग्रहाख्यं ग्रन्थं निबध्नाति प्रयोगमिति । अस्यार्थः +

End :

द्रव्यस्य सत्तापरत्वाभ्यां सह समासो न सिध्यति इत्यत आह–द्रव्येति प्रसुत्कारयशोऽभिलाषिणां कारुण्यविकसित चित्तानां तत्र वृत्तिरित्यर्थः ।

Colophon :

इति प्रयोगसङ्ग्रहे वररुचि विरचिते चतुर्थः पटलः ॥

प्रयोगसङ्ग्रहः समाप्तः ॥

## ३१

Sl. No. 33943 प्रयोगशिक्षा Ms. No. B. 404/2

Beginning :

अमन्दकरुणाम्बोभिमानन्दमयमव्ययम ।

इन्दिरामन्दिरोरस्कं वन्दे हयमुखं हरिम् ॥

पाणिन्यादिगुरून्नत्वा अनन्तार्येण धीमता ।

प्रयोगशिक्षा क्रियते बालबोधार्थमल्पशः ॥

लड्लिड्लुटस्तथा लुट्टच लेलिङौ तथा ।

लुङ्लृङौ चेति दश वै लकाराः परिकीर्तिताः ॥

End :

तिप् तस् झि सिप् थस् थ मिप् वस् मस् एते तिबादि नवकम् ।

त आतां झ थास् आथां ध्वं इड्

वहि महिङ्। एतेषां तङ् इति संज्ञा।
तङ्नवकं च एत एव।

Colophon :

इति प्रयोगशिक्षेयमनन्तार्येण धीमता।
रचिता स्याद् रमेशस्य भृशं संतोषकारिणी॥

32

Sl. No: 33955 प्रकृतप्रकाशः Ms. No. P. 1079/1

Beginning

आदे + । आ समृद्ध्या + । इदीषत्पक्वस्वप्नवेतसव्य-
जनमृदङ्गाङ्गारेषु। लोपोऽरण्ये। ए शय्यादिषु। ओ बदरे देन।
मूयूखममूरयो या × चतुर्थचतुर्दश्योस्तुना। आदातो यथादिषु वा।

End :

वैपरित्ये। बिव्वे आमन्त्रणे। आकुस्तायां रे अरेक्षरे सम्भाषणर-
तिकलहाक्षेपेषु। विव मिव विया इवार्थे। शेषः संस्कृतात्।

Colophon :

इत्यष्टमः परिच्छेदः। इति वररुचेर्व्याकरणं समाप्तम्॥

33

Sl. No. 39360 प्राकृतसूत्रपाठः Ms. No. P. 6919/2

Beginning :

सिद्धि। लोकाच्च।
अनुक्तमन्यशब्दानुशासनवत्।
संज्ञाप्रत्याहारमया वा।
सुप्स्वादिरन्त्यहला।
हे ह्रस्वः॥ दिर्दीर्घः।
शषसाश्शुः॥ नस्समासः।

End :

आभासइरअर्णाअरे।
भूतेप्रसिद्धा वर्तमानेऽपि भवन्ति॥
शेषं संस्कृतवत्॥

End :

तरुसरसात्यादयः सिद्धावस्थायाम् ।
झाडगास्तु देश्याः + सिद्धाः ॥

Colophon :

— — —

## 34

Sl. No. 33972 प्राकृतमञ्जरी Ms. No. P. 1822/1

Beginning :

इदमन्धंतमो जित्वा यज्ज्योतिर्भासते परम् ।
नमो भगवते तस्मै सूर्याय परमात्मने ॥
उदेतु भगवान् भानुरुदयाद्रेरिवात्मनः ।
येन वाचो यथार्था नः स्फुरन्ति सगुणाः स्वयम् ॥
प्रसीदन्तु च वाचस्ता यासां माधुर्यमुच्छ्रितम् ।
प्राकृतच्छद्मना चक्रे कात्यायन महाकविः ॥
यावत्प्राकृतशास्त्राणि व्याख्यास्यामो वयं पुनः ।
न विद्यादर्पकण्डूत्या केवलं तद्विपित्सया ॥
आदेरित्यधिकोरोऽयमापरिच्छेदपूरणात् ।
अत इत्यपितस्मात्प्रागात इत्यापि यो विधिः ॥

End :

विवो सिवो विअश्चैव इवार्थे परिकल्पिताः ।
चन्दो विवमुहं चन्दौ विवचंदोवि एति च ॥
कृत्तद्धित समासादिः शेषो गम्येत संस्कृतात् ।
उक्त लक्षणवृत्त्यैव तत्सर्वं च निरूप्यताम् ॥
इति प्राकृतमञ्जर्यामष्टमः परिच्छेदः ॥

Colophon :

समाप्तोऽयं ग्रन्थः ॥

**35**

Sl. No. 33976 प्राकृतमञ्जरी Ms. No. P. 10639/5

Beginning :

येन वाचो यथार्था न स्फुरन्ति सहसा श्र × ।
प्रसिद्धास्तु सुवाचस्ता यासां माधुर्यमुद्धरम् ॥
प्राकृतच्छद्मना चक्रे कात्यायनमहाकविः ।
वन्दे वररुचिं तं यत्प्रज्ञामञ्जरिकामधु ॥
अद्याप्यास्वादयन्त्येव हृद्यां विद्वन्मधुव्रताः ः । +
यावत्प्राकृतसूत्राणि व्याख्यास्यामो वयं पुनः ।
× × कण्डूत्या केवलं तद्विदित्सया ॥
कात्यायनप्रणीतेऽस्मिन् प्राकृताब्धितितीर्षया ।
अप्रज्ञापोतपात्राय नमो मह्यं निमज्जते ॥
आदेरतः ॥ आदित्यधिकारोऽयम् ॥

End :

कृत्तद्धितसमासादिः सम्यगूह्यस्स संस्कृतात् ।
उक्तलक्षण इत्येवं तत्सर्वं परिकल्प्यताम् ॥

Colophon :

इति प्राकृतमञ्जर्यामष्टमः परिच्छेदः । सम्पूर्णेयं प्राकृतमञ्जरी ॥

**36**

Sl. No: 33977 प्रकृतव्याकरणवृत्तिः Ms. No. B. 835/2

Beginning

जयति मदमुदितमधुररुताकलनकुञ्चितापाङ्गः ।
करत्रेहितगण्डकण्डूविनोदसुखितो गणाधिपतिः ॥
वररुचिरचित प्राकृतलक्षणसूत्राणि लक्ष्यमार्गेण ।
बुद्ध्वा चकार वृत्तिं संक्षिप्तां भामहस्स्पष्टाम् ॥
आदेरतः । अधिकारोऽयम् ।

End :

शेष: संस्कृतात् । उक्तादन्यः शेषः । प्रत्ययसमासतद्धितलिङ्गवर्ण-कारकादिविधिशेषः संस्कृतादवगन्तव्यः । इह ग्रन्थविस्तरभयान्न दर्शितः ।

Colophon :

इति श्रीप्राकृतप्रकाशे मनोरमायां वृत्तौ निपातविधिर्नाम नवमः परिच्छेदः ॥

## 37

Sl. . No 33981 प्रकृतव्याकरणसूत्रवृत्तिः Ms. No. P. 3685

Beggining :

श्रीवीरप्राच्याचलसमुदितमखिलप्रकाशकं वन्दे ।
दिव्यध्वनिपटुदीधितिमहमक्षरपद्धति प्राप्त्यै ॥
श्रुतभर्तुरर्हनन्दि त्रैविद्यमुनेः पदाम्बुजभ्रमरः ।
श्रीबाणासुरकुलकमलद्युमणेरादित्यवर्मणः पौत्रः ॥
श्रीमल्लिनाथपुत्रो लक्ष्मीगर्भामृताम्बुधीसुधांशुः ।
भामहस्य वृत्तविद्याधाम्नो भ्राता त्रिविक्रमस्सुकविः ॥
श्रीवीरवीरसेनान्यग्रीयवचःपयोधेः कतिचित् ।
प्राकृतपदरत्नानि प्रकृतिकृती सुकृतिभूषणाय चिनोति ॥
अनल्पार्थस्सुखोच्चारः शब्दस्साहित्यजीवितम् ।
स च प्राकृतमेवेति मतं सूत्रानुवर्तिनाम् ॥

End :

महानडो रुद्रः पुडइणी—ततिमा जअंण भयसंहननं—पाडलं—कमलं, कमलो—भिक्षापात्रं, × लं, गन्धुन्तमा, सुरा इत्यादयश्शब्द × × श्च दभवतत्समपत्तमानाः प्रयोगपदवीमासादयन्ति— सिद्धा इति पदं × × ॥

Colophon

इति श्रीमदर्हनन्दित्रैविद्यदेवश्रुतधरश्रीपादप्रसादासादित समस्त विद्या प्रभवश्रीमत्त्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ तृतीयस्याध्यायस्य चतुर्थः पादः । सम्पूर्णमिदं प्राकृतव्याकरणम् ॥

38

Sl. No. 33984 प्राकृतसूत्रवृत्तिः M. No. P. 7307/2

Beginning :

श्रीवीरं प्राच्याचल समुदितमखिलप्रकाशकं वन्दे ।
दिव्यध्वनिपटुदीधितिमहमक्षरपद्धतिप्राप्त्यै ॥
श्रुतभर्तुरहं + त्रिविक्रमेणागमक्रमात् क्रियते ॥ +
वृत्तिस्त्रैविक्रमी जयति ॥

End :

कमलं ॥ गङ्गत्तमा ॥ सुरा ॥ इत्यादयश्शब्दाः–तद्भवतत्समवर्तमानाः प्रयोगपदवीमासादयन्ति ॥

Colophon :

इति श्रीमदर्हनन्दि त्रैविद्यदेव श्रुतधरश्रीपादप्रसादासादित समस्त विद्या-प्रभाव श्रीमत्त्रिविक्रमदेव विरचितप्राकृतव्याकरणवृत्तौ तृतीयस्याध्यायस्य चतुर्थः पादः । सम्पूर्णमिदं प्राकृतव्याकरणम् ॥
सप्रत्ययप्रकृतिसिद्ध + कथास्वेकस्त्रिविक्रमः ॥

39

Sl. No. 33988 फिट्सूत्राणि Ms. No. P. 1341/3

Beginning :

फिषोऽन्तोदात्तः ।
पाटलापालं कांबासागरार्थानाम् ॥
गेहार्थानामस्त्रियाम् ॥
गुदस्य च ॥

End :

इयामाकशरीराबह्वदयहिरण्यापत्यदेवराणाम् ॥

\+ + +

महिष्याषढयोश्चायेष्टकाख्या चेत्।

वानादीनामुभावुदात्तौ ।

चादयोऽनुदात्ताः ।

यथेति पादान्ते ।

प्रकारादिर्द्विरुक्तौ परस्यान्त उदात्तः ।

शेषं सर्वमनुदात्तम् ॥

Colophon :

इति शान्तनवाचार्यविरचितेषु फिट्सूत्रेषु तुरीयः पादः ॥

फिट्सूत्राणि समाप्तानि ॥

40

Sl. No. 33991 फिट्सूत्रम् Ms. No. P · 8520/2

Beginning :

हरिः ओम् ।

उच्चैरुदात्तः ।

नीचैरनुदात्तः ।

समाहारः स्वरितः ।

तस्यादित उदात्तमर्धह्रस्वम् ।

तस्यादिरुच्चैस्तरा × × उदात्तसमः शेषः ।

End :

× उपसर्गाश्चाभिवर्जम् ।

एवमादीनामन्तः वावादीनामुभावुदात्तौ ।

यथेति पादान्ते ।

प्रकारादिद्विरुक्तौ ।

शेषं सर्वमनुदात्तम् ॥

**Colophon :**

इति श्री शान्तनवाचार्य प्रणीतेषु फिट्सूत्रेषु चतुर्थः पादः ॥

## 41

Sl. No. 33995 **फिट्सूत्रवृत्तिः** Ms. No. P. 3415/4

**Beginning :**

अथ आद्युदात्तश्चेत्यादिसूत्रेषु भाष्यादौ व्यवहृतत्वादाकृति गण वेषयाभ्यां वृषादीनाञ्चेत्यादिनाञ्चेतिं पाणिनीयसूत्राणां क्रमेण सि × × दत्तत्वयोरेव ग्रामादीनाञ्च × कादिनाञ्चेति फिट्सूत्रयोर्बोधकत्वे ऽपि कतृमेन दोषा —

**End :**

प्रकारादि द्विरुक्तादन्यत् द्विरुक्तं सर्वमनुदात्तं स्यादित्येके । प्रप्रायमग्निः । दिवेदिवे । अनुदात्तश्चेत्यस्यानुवादकमेतत् । अनुदात्तं पदमेकवर्जमित्यस्यानुवादमित्यन्ये ॥

**Colophon :**

इति श्रीकावेरीतीरविराजमानश्रीकोटीश्वरक्षेत्रान्तर्गतैंकराजपुरोपनामक महाराजपुरवास्तव्येन पदवाक्य प्रमाणज्ञेन श्रीमत् कुत्सवंशपयः पारावार राकासुधांशुना श्री गोपालभट्टसूनुनां दत्तरामभट्टेन विरचिते वैयाकरणसिद्धान्त संग्रहे शान्तनव फिट्सूत्रेषु चतुर्थः पादः ॥

## 42

Sl. No. 33996 **बालबोधिनी** Ms. No. C. 171

**Beginning :**

अथ सन्धि प्रकरणम् ।

तत्तत्सूत्रात्समुद्धृत्य किञ्चित्पाणिनिसम्मतम् ।
व्यस्तश्लोकपदच्छेदे ह्युपयुक्तमिहोच्यते ॥
अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् ।
ञमङ णनम् । झभञ् । घढधष् । जबगडदश् । +
इकारादिष्वकार उच्चारणार्थः ।

End :

एषस् विष्णुः एष विष्णुः। स शुम्भुः । इति स्वादिसन्धिः इति सप्तमं सन्धि प्रकरणं समाप्तम् ॥

प्रतापसिंह क्षितिपालतेजसा

पराभवात् वाह्निरपि स्त्वयं सदा ।

नद्योतते किन्तु निलीयनक्त्तुम्

गृहे गृहे कम्पत एव सर्वदा ॥

\+ \+ \+ \+

तादृक् शरभ भूपालाल्लब्ध जीवनमुत्तमम् ।

बालशास्त्रि समाख्येन सतां सन्तुष्टये खलु ॥

भूता५श्व७भू१धरा१संख्य ग्रन्था विरचिताः शुभाः ।

वैयाकरण सिद्धान्त बोधिनी बालबोधिनी ॥

Colophon :

इति श्रीकागल्करोपनामक श्रीनारायणभट्टात्मजशेषभट्टसूनुबालसूरिविरचिता बालबोधिनी समाप्ता ॥

## 43

Sl. No. 34017 मञ्जूषाव्याख्या Ms. No. P. 2739

Beginning :

रामं × × घनश्यामं नि × मं हृदयङ्गमम् ।

कामं मुदे × द्रामं विश्रामं वश × शमम् ॥

\+ \+ \+ \+

आ × स्तदाख्यां विवृतिं मञ्जूषायाः × × ॥

पायगुण्डो वैद्यनाथः × कुर्वे × बुद्धये ॥

× × × मङ्गलाय निबध्नाति ॥ नागेशेति ॥

End :

ननु उभयोः साधारणधर्मत्वेन अभेदप्रतीतावपि ततो निर्वा × × कथं सादृश्यधर्मोऽत आह ॥ चन्द्रेति ॥

न चार्थं प्रतीयमानमनियतधर्मवृतं प्रतीयेत + तस्यैव प्रत्ययात् ॥

Colophon :

— — — —

## 44

Sl. No: 34018 मञ्जूषाव्याख्या Ms. No. A. 57

Beginning :

तदानु तेषां स्वरसत एव सत्वमिति भावः । तदपि दधेति तत एव लब्धमित्याह + नन्वेकं कथमेकत्वमत आह–क + दिकस्येति स्फोटाभिव्यञ्जकेत्यर्थः ।

End :

स्वयं तदाशयमाह–तदिति । कर्तृपदेन तत्परामर्शकतत्पदेन किञ्चिद्व्यवहित-तदग्रिमभाष्यमाह–अथापीति । तादृशकर्तुर ×

Colophon :

— — —

## 45

Sl. No. 34028 मध्यसिद्धान्तकौमुदीव्याख्या Ms. No. P. 5062

Beginning :

नत्वा विश्वेश्वरं श्रीशं अम्बिकां च सरस्वतीम् ।
गुरून् गणपतिं चैव नरसिंहो बुधाग्रणीः ॥
देवराजस्य पौत्रस्तु शङ्कराख्यसुतस्तथा ।
करोति मध्यसिद्धान्तकौमुदीभूषणं मुदा ॥

End :

रमत इति ॥ शप् । एवं । (दे) रेम इति । अत एकेत्येत्वाभ्यास-लोपौ रेमिषे क्रादितिवमादि × पचाद्यचि टाप् । रमा । घडितु रामः

अमन्तत्वेन मित × रमयति । रन्तेत्याद्यु × म् ।

श्रीमच्छङ्कर × ×

व्याख्या यत्र समाप्तिमाप ललिता म्वादौ त × काश्रया ॥

Colophon :

इत्यात्मनेपदव्याख्यानं समाप्तम् ॥

46

Sl. No. 34030 मध्यसिद्धान्तकौमुदीव्याख्या Ms. No: C. 4523

Beginning :

महेश्वरं नमस्कृत्य पाणिन्यादीन् गुरूनपि ।

करोमि मध्यकौमुद्याः व्याख्यां मध्यमनोरमाम् ॥

End :

हलन्तानां अपं च इच्छति ।

अस्योदाहरणं वाचेत्यादि ।

अल्लोपस्योदाहरणं वगाह इत्यादि ।

इत्यव्ययानि ।

Colophon :

इति मध्यकौमुदीव्याख्यायां मध्यमनोरमायां सुबन्तं सम्पूर्णम् ॥

47

Sl. No: 34043 महाभाष्यम् Ms. No. C. 986

Beginning :

अथ शब्दानुशासनम् । अथेत्ययं शब्दः अधिकारार्थः प्रयुज्यते । शब्दा नुशासनं नाम शास्त्रं अधिकृतं वेदितव्यम् ।

केषां शब्दानां लौकिकास्तावत् गौरश्वः पुरुषो हस्ती शकुनिः मृगो ब्राह्मण इति ॥

End :

केषां उदात्तानुदात्त स्वरितानुनासिकानाम् ।

सिद्धं तु तपरनिर्देशात् । सिद्धमेतत् । कथम् । तपरनिर्देशान् । तपरनिर्देशः कर्तव्यः अत आदिति । एकशेषनिर्देशाद्वा स्वरानुनासिकभिन्नानां भगवतः पाणिनेराचार्यस्य सिद्धम् ॥

Colophon :

इति श्रीमन्महामुनि भगवत्पतञ्जलि विरचिते व्याकरणमहाभाष्ये अष्टमाध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥

पादोऽध्यायश्च समाप्तः ॥

48

Sl. No. 34062 महाभाष्यव्याख्या Ms. No. P. 4072/1

Beginning :

× म्बर× णुं × लक्ष्म्यै नमः ।
आधारशक्तिरखिलस्य × × न्तः ।
आचार्य राजो भगवान् नरसिंह ।
श्र × बृहतामादर्दे शेषसौख्यदाम् ॥

× × × षवस्तन्त्रादौ तदपेक्षितं प्रवृ × प्रसिद्धत्व सर्वार्थ × × जगदाधारस × × प्रत्यय × × द्वारेणास्मिन् तन्त्र इति × × ल्यम् ।

End :

अ × × मनल्विधाविति प्रतिषेधस्सिद्ध इति प्रत्ये × × त किम्पुनरित्यादिना । अर्थवन्तो वर्णाः । घ × पहीत्यादौ निपातस्य अपगमोन्मुखी क र × र्थ इति यावत् । सक्कारस्येति न तु ऊ ×

Colophon :

— — — —

49

Sl. No. 34063 महाभाष्यविषयप्रकाशः Ms. No. P. 4785

Beginning :

वन्देहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥

वाच्यवाचकसव × तिकां चिन्मयीं वयम् ।
चतुर्थार्थपयोदोग्ध्रीं वाचं धेनुमुपास्महे ॥
श्रीमच्छर्कर × × ।
वालो यत्परिभाषाणां विषयान् ज्ञातुमिच्छति ।
प्रदर्श्यन्ते तस्य कृते विपयाधर्मसूरिणा ॥

End :

अनभिष × ष्टस्य यकानचिपरेष्टस्तः दद्यत्र अष्टसाने वाकोत्वे भवत इति वक्तव्यम् । वाक् वाक् अनचिचेत्यत्र अनचिति पयुदासाश्रयणाद्व-र्तिकागमः प्रसज्यप्रतिषेधे तु परस्य निमित्त सा × द्वैत्यधिनुकाच्च सिद्धम् ॥ (?)

अष्टमाध्यायस्य चतुर्थस्य चतुर्थपादः । समासश्चाध्यायः ॥

Colophon :

इति श्रीनद्वेह्लचिन्मिहोचन भट्टात्मज विरचितं अङ्गाधि × निषर्का रिका व्या × × ॥

50

Sl. No. 34069 महाभाष्यव्याख्या Ms. No. P· 983

Beginning :

सर्वाकारं निराकारं विश्वाध्यक्षमतीन्द्रियम् ।
महाभाष्यर्णवानारपरीणविवृतिप्लवम् ।
यथागमं विधास्येऽहं कैयटो जैयटात्मजः ॥

× अथ शब्दानुशासनमिति प्रयोजन × प्रयोज नानि तु रक्षोहादीनि पश्चाद्वक्ष्यन्ते ॥

End :

तद्धितार्थोत्तरपदेति तत्पुरुषे सति समासान्तोदात्तत्वं प्राप्नोतीति आद्युदात्तत्वं चेष्यते । कर्तव्योऽत्र महायत्न इति युक्तारोह्यादिषु अधिकवर्षशतशब्दः आद्युदात्तो द्रष्टव्य इत्यर्थः ॥

Colophon :

इत्युपाध्याय जैयट पुत्रकैयटविरचिते भाष्यप्रदीपे द्वितीयाध्यायस्य प्रथमे प्रथममाह्निकम् ॥

## 51

Sl. No. 34074 — महाभाष्यव्याख्या — Ms. No. C · 895

Beginning :

सर्वस्य द्वे । सर्वशब्दः द्रव्यप्रकारावयवकात्स्न्यें वृत्तिः । द्रव्यकात्स्न्यं यथा— सर्वस्वं ददातीति । प्रकारकात्स्न्यें यथा—क्ष सर्वान्नं भक्षयति इति । सर्वप्रकारमन्नं भुङ्क्ते इति गम्यते । अवयवकात्स्न्यें यथा— सर्वः पटो दग्धः इति ।

End :

अकाराः स्थानिनो निर्दिश्यन्ते एवमादेशा अपि षडेव ततश्चैकशेषः । तत्र षण्णां स्थानिनां निर्देशसामर्थ्यात् भिन्नकालौ दीर्घप्लुतौ स्थानिभिः न गृह्यते तत्र यथासंख्यं षण्णां विवृतानां स्थाने षट् संवृता आदेशा- भवन्तीति सिद्धमिष्टम् ॥

Colophon :

इत्युपाध्यायजैय्यटपुत्र कैयटकृते श्रीमद्भगवत्पतञ्जलिविरचित व्याकरणमहा- भाष्यप्रदीपे अष्टमाध्यायस्य चतुर्थपादे प्रथमं आह्निकं पादश्चतुर्थोऽध्यायश्च समाप्तः ॥

## 52

Sl. No: 34080 — शब्दबृहती — Ms. No. A. 574

Beginning :

वृद्धिरादैच् । आकारमात्रमैकार औकारश्च वृद्धिसंज्ञकः । आत्वं कस्मान्न भवतीति । अदैजिति चकरस्येति शेषः ।

End :

अत एतद्योगसाध्यं पुरा निराकृतैकशेषविशेष विशेषसूत्रान्तरसाध्यं च तेषामेव केवलं सर्वज्ञत्वादीश्वरत्वाद्विनैव सूत्रं सिध्यति । ननु श्रुता श्रयलोकस्योः ॥

Colophon :

पराङ्गाह्निकं समाप्तम् ॥

## 53

Sl. No. 34081 **महाभाष्यव्याख्या** Ms. No. A· 575

Beginning :

भूवादयो धातवः । गणपठितभूवादिशब्दाः धातुसंज्ञा भवन्ति । कुतोऽयं वकार इति । अयमिति भूवादय इत्यर्थः । अत्र निर्देशे वकारानुपपत्तिं स्वयमेव दर्शयन्ति यदि तावदित्यादि ॥

End :

अश्नीत पिबत । पचत भृज्ञत । खादत मोदत । खादाचमा । आहरनिचया । आवपनिष्किरा । षट् । भिण्डिलवणा । पचलवणा । द्वौ । आहत्य सष्टपञ्चाशत् साक्षाद्गणे पठिताः । अविहितलक्षणस्तत्पुरुषोऽपि मयूरव्यंसकादौ द्रष्टव्यः ॥

Colophon :

इति श्रीमहाभाष्य शब्दबृहत्यां नाकागाह्निकं समाप्तम् ॥

## 54

Sl. . No 34082 **महाभाष्यशब्दबृहती** Ms. No. A. 576

Beggining :

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे एकदेशवाचिनः पूर्वाद्या अखण्डाधिकरणभूतेनैकदेशिना अवयविना वा समस्यन्ते स तत्पुरुषः ।
षष्ठीसमासापवादः । पूर्वःकायस्य पूर्वकायः । अपरकायः ।

Colophon :

बाधकत्वे शेषनिघातत एव सार्वधातुकानुदात्तत्वस्य सिद्धत्वात् । व्यर्थं तदनुदात्तविधानमिति ज्ञापकत्वमबाधकत्वस्य । ननूक्तज्ञापक × शाद्यवादेशसार्वधातुकमित्याशंकायां परिहारः अविशेषेणेति । सार्वधातुकमात्र इत्यर्थः ॥

Colophon :

इति महाभाष्यशब्दबृहत्यां गोत्राह्निकं समाप्तम्
ग्रन्थस्यास्य तृतीयसंपुटं सम्पूर्णम् ॥

## 55

Sl. No: 34083 महाभाष्यव्याख्या Ms. No. P. 434

Beginning :

× × तत्प्रसङ्गात् । न च सित्करणं स्मिति चेति पदत्वे सति हलि मस्यानुस्वारार्थमिति हलादित्वाभावप्रसङ्गात् अदेशो नेति वाच्यम् । अवग्रहार्थं तदुपपत्तेः ।

End :

तत्र षण्णां स्थानिनां निर्देशसामर्थ्यात् भिन्नकालौ दीर्घप्लुतौ न गृह्येते इति न तयो रतिप्रसङ्गः । षण्णां विवृतानां च स्थाने यथासंख्यं षडादेशाः संवृताभवन्तीनि सिद्धमिष्टम् ॥

Colophon :

इति श्रीनन्दनन्दन चरणारविन्द मकरन्दबिन्दु सन्दोहास्वादनसानन्द-तुन्दिलेन्दीवरायपानान्तःकरेण सहस्रकन्यागोदान सम्पादितगोपालकृष्णान्तः करेण × केशवार्य × परीपाकेन राविनूतुलतिलकेन गवब्राह्मण पूजाविधेयशिरोमणिना आन्देह्व भूसुरशिरखामणिना × × याजिनः कृतौ भाष्य स्फूर्तौ अष्टमाध्यायस्य चतुर्थः पादः ॥

## 56

Sl. No. 34090 महाभाष्यप्रदीपव्याख्यानम् Ms. No: P. 996

Beginning :

नत्वा साम्बं शिवं देवीं वागाधिष्ठा कांगुरून् ।
पाणिन्यादि मुनीन् वन्द्यात् पितरौ च सतीशिवौ ॥
नागेशभट्टोनागेश भापितार्थविचक्षणः ।
हरिदीक्षितपादाब्जसेवनाबाप्त सन्मतिः ॥
याचकानां कल्पतरो ररिकक्षहुताशनात् ।
शृङ्गिवेरपुराधीशरामतोलब्धजीविकः ॥
भाष्यप्रदीपव्याख्यानं कुर्वेऽहं तु यथामति ।

End :

सर्वेषामुत्कालनासम्भवादिति भावः । मिश्रत्वादिति । तेषामुभय साधारणजातिविशिष्ट एव शक्तिरिति भावः ॥

Colophon :

इति श्रीशिवभट्टसुतसतीगर्भज नागोजिभट्टकृते भाष्यप्रदीपोद्येते प्रथमस्य द्वितीयपादे तृतीयमाह्निकम् ॥

## 57

Sl. . No 34104 महाभाष्यप्रदीपोद्योतः Ms. No. C. 1841/7

Beggining :

युवोरनाकौ । युवोरिति निर्देशानुपपत्तिमुद्भाव्य परिहरति इहेति । नपुंसकत्वान्नुमः प्राप्तेरिति भावः । युव्वोरिति । औसि यणादेशप्रसंगादिति भावः ॥

End :

एवं च तदध्यायिनां प्रवक्तॄणां च सकलपुमर्थसिद्धिर्दर्शिता । यथोक्तम्–

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥

इति सर्वेष्टसिद्धिः ।

भाष्याब्धेः सप्रदीपस्य भगवत्कृपया मया ।
यथामति कृता व्याख्या प्रीयतां भगवांस्तया ॥
गङ्गा शिवश्च शेषश्च रक्षन्त्वेनां तु सर्वशः ।
सतां हृदयपद्मेषु प्रसिद्धिं प्रापयन्तु च ॥

Colophon :

इति श्रीशिवभट्टसुतसतीगर्भजकालोपनामकनागोजीभट्टकृते भाष्यप्रदीपोद्योते अष्टमस्य चतुर्थे प्रथममाह्निकम् । पादश्च अध्यायश्च समाप्तः ॥

**58**

Sl. No. 34121 रूपावतारः Ms. No: A. 825

**Beginning :**

सर्वज्ञमनन्तगुणं प्रणम्य बालप्रबोधनार्थमिमं रूपावतारमल्पं सुकलापमृजं करिष्यामि । तत्रादौ तावत् प्रत्याहारशास्त्रे संव्यवहारज्ञापनार्थं अनुवर्ण्यते । तद्यथा—अइउण् + हल् ॥

**End :**

लृटि—अध्येष्यते । चिण्वदिटि—अध्याष्यते (?) । इत्यादि । इङश्च । सनिपरतः इङश्च गामिरादेशो भवति । अज्झनगमां सनि । आधिजिगांसते व्याकरणम् ॥

**Colophon :**

इति धर्मकीर्त्याचार्येण विरचितः रूपावतारः समाप्तः ॥

**59**

Sl. No: 34122 रूपावतारविवृत्तिः Ms. No. P. 5024

**Beginning :**

ध्यात्वा महेश्वरमतीव निरङ्कुशेन
तर्कादिशास्त्रनिपुणेन च शब्दशास्त्रे ।
श्री कूचनार्यसुतलक्ष्मणकोविदेन
रूपावतारविवृतिः क्रियते मनोज्ञा ॥

ग्रन्थकर्ता ग्रन्थस्य निर्विघ्नेन × मङ्गलमाचरति ॥ येनेति ॥

**End :**

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥

इति वचनात् शब्दानां च ब्रह्मात्मकत्वात् तस्य च शब्दब्रह्मणः प्रतिज्ञानात् । निरतिशयश्रेयोलाभस्याविलम्ब इत्युक्तं भवति ॥

**Colophon**

इति श्री लक्ष्मणसूरिविरचितं रूपावतारविवरणं समाप्तम् ॥
यादृशं पुस्तकं × न विद्यते ॥
करकृतमपराधं × × सन्तः ॥

## 60

Sl. No. 34123 रूपावतारव्याख्या Ms. No. P. 2587/2

Beginning :

× × ×

गुरून् गुरुमतान् वन्दे वन्दकानन्ददायिनः ॥

येषां कारुण्यभाव – अन्तर्वाणि ×

शिरोमणिर्विजयते भूम्ना महिम्ना भुवि ॥

रूपावतारटीकेयं तत्कृतासुमनःप्रिया ।

अभींप्सितार्थदा भूयात् प्रक्रियाकल्पवल्लरी ॥

End :

एवंकृदन्तावतारं निरूप्य इदानीं तिङन्तप्रक्रियाशेषं वर्तयन् व्याकरणाध्ययनपठनशीलस्य कु + त्वमाविष्कुर्वन् ग्रन्थं निगमयति भूयते वैयाकरणेन कृतार्थेनेति ॥

Colophon :

इति षड्दर्शनी पारावारापरीण श्रीमन्महोपाध्याय कल्यानन्दातृसूरिसूनु नृसिंहविद्वद्वर विरचितायां रूपावतारव्याख्यायां प्रक्रियाकल्पवल्लरी समाख्यायां तिङन्तप्रक्रियाशेषनिरूपणं समाप्तम् ॥

ग्रन्थः समाप्तः ॥

## 61

Sl. No. 34126 रूपावतारव्याख्या Ms. No. P. 5439

Beginning :

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।

तमश्चाज्ञानजं भिन्नं तस्मै पणिनये नमः ॥

+ इह खलु निखिलविद्वदग्रेसर + धर्मकीर्तिर्नाम ग्रन्थकृत् व्याकरणशास्त्रे रूपावतारं नाम ग्रन्थं चिकीर्षुः × निबध्नाति येनेति ॥

End :

न दण्डमाणवान्तेवासिषु इति निर्देशात् । णत्वं भविष्यति । नैतदस्ति अर्थविशेषस्य निश्चयात् । अनधिगतवेदत्वान्मूढत्वम् । विहिताकरणान्निषिद्धाचरणाच्च कुत्सितत्वम् । + तद्यथा– ××

Colophon :

— — — —

## 62

Sl. No. 34130 लक्ष्यवृत्तिः Ms. No. C. 1837

Beginning :

पाणिन्यादिमुनीन् नत्वा पादाब्जयुगळं गुरोः ।
सूत्रोपात्तक्रमेणेह सलक्ष्या वृत्तिरुच्यते ॥
अइउण् ॥ १६ ॥ इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । वृद्धिरादैच् । × वृद्धिसंज्ञः स्यात् ।

End :

सूचनार्थाद्यमेः सि × ध्यात् । उदाय × उदाय साताम । विभाषोपयमने । यमेः सिचूकि × विवाहे । रामसीतामुपाय ×

Colophon :

इति श्री वृत्तिसंग्रहे तृतीयस्य प्रथमः पादः ॥

## 63

Sl. No. 34172 वाक्यपदीयव्याख्या Ms. No. C. 4668/12

Beginning :

न गोबुद्धावुपयोगी न पारमार्थिकं द्रव्यपदस्य गोत्वविशेषे शक्यत्वं किन्तु द्रव्यत्वविशिष्टे तद्धर्मावच्छिन्नविषयक बुद्ध्यावच्छिन्नच्छेदेन तत्पदजन्यत्वावगाहिनः सङ्केतस्य तद्धर्मविशिष्टतत्पदयोः संसर्गत्वस्वरूपं शक्तित्वमिति व्युत्पत्तेः ॥

End :

इति वाक्यपदीयवाक्यस्य एकदेशो फलमात्रे व्यापारसमूहमात्रे वा धातवः प्रवर्तन्ते । तेन व्यापाराविवक्षायां फलमात्रे, फलाविवक्षायां व्यापारमात्रे धातुप्रयोगः ॥

## 64

Sl. No. 34184 **वृत्तिदीपिका** Ms. No. S. 935

Beginning :

सजलजलदकालं सर्वलोकैकपालं
व्रजयुवतिरसालं चन्दनाभ्यक्तबालम् ।
विहतदुरितजालं फुल्लराजीवनालं
विलसितवनमालं नौमि गोपालबालम् ॥
ध्यात्वा व्यासं गुरुं नत्वा माधवेन्द्रसरस्वतीम् ॥
मौनिश्रीकृष्णभट्टेन तन्यते वृत्तिदीपिका ॥
इह सकलजनाभिलषितमोक्षसुरव्योपाय--

End :

न चेष्टापत्तिः । भवत्सिन्द्धान्त × पत्तेः । इत्थं निरूपिताः पञ्च वृत्तिस्फोटाः । गोप × शक्ततानच्छेदिका जातिरेव वाचिकेत्युक्तम् । जातिश्चाविघको धर्मविशेषः । तथाच वर्णजातिस्फोटः स्पदजातिस्फोटः वाक्यजातिस्फोट इति तन्मते स्फोटत्रयं सिद्धम् ॥

Colophon :

इति श्रीमन्मणिकुलतिलकायमान गोवर्धनभट्टात्मजरघुनाथभट्टसुत श्रीकृष्णभट्टविरचिता वृत्तिदीपिका समाप्ता ॥

## 65

Sl. No. 34186 **वृत्तिसंग्रहः** Ms. No. P. 9289

Beginning :

वृत्तिसंग्रहः । परार्थाभिधानं वृत्तिः ।
वृत्त्यर्थावबोधकं वाक्यं विग्रहः ।
यथा राजपुरुष इत्यत्र राज्ञः पुरुषः इति । सा वृत्तिः पञ्चविधा । समासवृत्तिः एकशेषवृत्तिः तद्धितवृत्तिः कृद्वृत्तिः सनादिवृत्तिश्चेति ।

End :

पुच्छमुदस्यति उत्पुच्छयते ।
भाण्डानि समाचिनोति संभाण्डयते । वीक्षयार्जयति संवीक्षयते ।

Colophon : — — — —

णिद्वृत्तिर्यथा—सत्यं करोति सत्यापयति ।
सत्यापयते । घटं करोति घटयति ।
सत्यापयते । इति सनादिवृत्तिः ।

**Colophon :**

इति वृत्तिसंग्रहस्समाप्तः ॥
[सत्येव संकुलतराणि सुविस्तराणि]

## 66

**Sl. No. 34187** **वैदिकप्रक्रियाटीका** **M. No. C-2617**

**Beginning :**

लोके बहूनि बत वृत्तिनिबन्धनानि ।
भाषाविशेषनिकषोपल एष एव
बालावबोधनकलाकुशलस्समिन्धे ॥
सिन्दूरेण विराजितं त्रिनयनं + चन्द्रार्धचूडं भजे ॥
यस्तर्कादिसमस्त + गोवर्धनः ।
श्रीमत्सिद्धान्तकौमुद्याः स्वरवैदिकखण्डयोः ।
नत्वा मुनित्रयं हृद्यां टीकां कुर्वे सुबोधिनीम् ॥
× × इयता प्रबन्धेन तार्किकेषु शब्देष्वन्याख्यातेष्वपि वैदिका

**End :**

अभीषुण इति । इकः सुञीति दीर्घः । एवमूषण इत्यत्रापि सर्वत्रोदाहरणे स्यदादेशीऽयं न सः ॥

**Colophon :**

इति श्रीमन्मौनिकुलतिलकायमान श्रीगोवर्धनभट्टात्मजरघुनाथभट्टाङ्गजेन-जयकृष्णेन कृतायां सिद्धान्तकौमुदीव्याख्यायां ॥ सुबोधिन्यां वैदिकखण्डः समाप्तिमगमत् ॥

## 67

Sl. No. 34190 व्याकरणक्रौडम् Ms. No. P· 3245/1

Beginning :

प्रणम्याद्यपदाम्भोजमखचन्द्रमरीचयः ।
व्याकोचयन्तु स्फुटं मम मानसकैरवम् ॥

बलवत्त्वादिति । बलवतीशब्दस्य तद्धितान्तत्वेन गुणवचनं झिकत्वाभावात् त्वतलोकित्यस्याप्त्या कथं पुंवद्भाव इति चिन्त्यमेवैतत् ॥

End :

न चावश्यशाच्यत्वस्यापि समुदायावयवत्वाद्बास्तवविद्यात स त्वाच्च + मदुक्तमपि न युक्तमिति कश्चिन्निश्चिनुयादित्याशापाशबद्धत्वात्तस्मात्सूत्रनिर्देशस्सन्निपातपरिभाषानित्यत्वज्ञापनार्थं इति तत्वम् ॥

Colophon :

इति मुक्ताशुक्तिस्समाप्तिमगमत् ॥

## 68

Sl. No. 34201 व्याकरणदीपटीका Ms. No· A. 232

Beginning :

प्रणम्य पदपङ्कजं जनकजापतेर्मञ्जूलं
विरिञ्चिभवपूजितं सकलसिद्धसंसेवितम् ।
ततोऽपि परमादरात्परमहंसचिद्रूपहृत्प्रकाशित
महामतिप्रमृतिहेतुदीपप्रभां गदाधरगुरोरञ्चितम् ॥ (?)

\+ \+ \+ \+

शिष्यप्रवृत्तयेऽभिधेयं प्रतिजानीते श्रीशमिति । कर्ता लभ्यते अस्मद्युत्तम इत्युक्तेः ॥

End :

× न केवलमैहिक करिकनकतणादिमात्रफलका किंतु आमुष्मिकफलदीपितद्वच्छुदागारीयदीपोद्दीपनापीति वस्तुध्वनिः ॥

Colophon :

इति विश्वनाथसूरिवरतनय रामचन्द्रानुज बालकृष्णाङ्गजगङ्गाधरविरचितायां श्रीमच्चिद्रूपाश्रमविरचितव्याकरदीपप्रभायां कृदन्तप्रकाशः ॥

## 69

Sl. No. 34212 परिभाषाप्रदीपार्चिः M. No. C• 2588

Beginning :

अमन्दहृदयानन्दनिदानं शिवयोश्शिरम् ॥
कृत्वा पाणिनिसूत्राणां मितवृत्तेः × प्रसङ्ग्रहम् ।
परिभाषाप्रदीपार्चिः तत्रोपायो निरूप्यते ॥

End :

सर्वमग्रे विवेचयिष्यामः
परिभाषाप्रदीपार्चिष्युदयं करदर्शिते ।
द्वितीयो व्याकृतोध्यायः सङ्गतस्सङ्गतः सताम्
न × ष्यन्तिमितो ह्येके परे मू × वहु × स्विषु ॥
करवाणि ततो वाणीं सर्वे × वर्जनेञ्जलिः ॥

Colophon :

इति द्वितीयाध्यायः समाप्तः ॥

## 70

Sl. No. 34214 परिभाषाभास्करः Ms• No. C• 4510

Beginning;

नत्वा गुरुचरणयुगं स्मृत्वा ब्रह्माखिलात्मकं विमलम् ।
रचयति शेषाद्रिसुधीः परिभाषाभास्करं स्वशिष्यकृते ॥
व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ॥

End :

न ह्येतदाद्युदात्तत्वं प्रयोगसमवायि, सति शिष्टेन प्रत्ययस्वरेण बाधादिति अच इत्येकत्वविव ×

Colophon :

— — —

## 71

Sl. No. 34216 परिभाषार्थसङ्ग्रहः Ms. No: P. 803/1

Beginning :

विहाय परमेश्वरं विपिनवाहिनीनश्वरं
वियन्मरुमरीचिकापरिविडम्बिताङ्गं मनः ।
क्षमस्व पुरुषोत्तमे नरसुरावली सत्तमे
सरीसृपधरे लसत्कनकवर्मणि ब्रह्मणि ॥

\+ \+ \+ \+

प्रणम्य परमं देवं भवानीपतिमव्ययम् ।
क्रियते वैद्यनाथेन परिभाषार्थसङ्ग्रहः ॥
व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ।
व्याख्यानतः व्याख्यानात्—

End :

\+ इदं तु ध्येयम् । इमौ पक्षौ भाष्यानुरोधात् आश्रीयेते इति उभयथा भाष्ये व्यवहारो दृश्यत इति । इति श्रीपरिभाषार्थसङ्ग्रहे अष्टमाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ॥

Colophon :

इति श्रीमद्रत्नगिरिदीक्षितपुत्र वैद्यनाथशास्त्रिणः कृतिषु परिभाषार्थसङ्ग्रहः सम्पूर्णः ॥

## 72

Sl. No. 34219 परिभाषार्थसङ्ग्रहः Ms. No. C. 4363

Beginning :

मूर्निर्यस्य हि पाणिनिः पदमहाभाष्यप्रबन्धा तथा
वाक्यानां कृदपि स्वयं वितनुते वाक्यस्य दास्यं मुदा ।
शिष्या यस्य विरोधिवादिमकुटीकोटीकरकुट्टाकवाग्
धाटीकास्तस्मै मातुलरामभद्रमखिने भूयो नमो मे भवेत् ॥

प्रणम्य परमं देवं भवानीपादमव्ययम् ।
क्रियते वैद्यनाथेन परिभाषार्थसङ्ग्रहः ॥

End :

ऋतश्च संयोगादेर्गुण इत्यनेन नित्यं संयोगा × प्रभृतेर्गुण-विधानात् । इदं तु ध्येयं इमौ पक्षौ लक्ष्यानुरोधात्तत्र तत्राश्रय इति उभयथा भाष्ये व्यवहारो दृश्यत इति ॥

Colophon :

इति रत्नगिरिदीक्षितपुत्रेण वैद्यनाथविदुषा विरचितः परिभाषार्थसंग्रहः सम्पूर्णः ॥

## 73

SI. No: 34220 परिभाषार्थसङ्ग्रहव्याख्या Ms. No. P. 3877

Beginning

× × द्वित्वं न स्यादिति भावः ।
यद्यपि अणो प्रगृह्यस्येति × ×
यः कर्तुं शक्य × च्यम् ।
अनणोऽनुनासिकभाजोऽभावात् ।
अप्रगृह्यस्येति पर्य × सेन—

End :

ऊभयोः स्वीकारे किं प्रमाणमित्याकाङ्क्षायां भगवता पतञ्जलिना तत्र तत्र व्यवहृतत्वादित्याह—उभयथेति । तथा च भाष्यकारवचनप्रामाण्यात् सर्वेष्टसिद्धिरिति भावः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य सर्वतन्त्रस्वतन्त्र श्रीमदद्वैतानन्द सरस्वती चरणारविन्द भृङ्गायमाणस्य स्वयंप्रकाशानन्दस्य कृतिः परिभाषार्थसंग्रहव्याख्या चन्द्रिकाख्या ॥

नत्वा गुरुपदद्वन्द्वं संसारजलधिप्लवम् ।
व्याकरोमि यथाबुद्धि परिभाषार्थसङ्ग्रहम् ॥

ग्रन्थादौ शिष्टमङ्गलमाचरति–तस्य च × भाष्यकारो × मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते इति प्रचयगमनं प्रयोजनमुक्तम् ।।

End :

कैयटेनेति । कैयटस्येति ध्वन्यत इति इदं वार्तिकं यदि ×कारीयस्यात् तदा तद्धिते अणित्वं नेति न ज्ञापयेदिति भावः । न × इद-मेव वार्तिकं तत्वनिपातेन ज्ञाप्यते । ज्ञाप्यत्वे × वत्वे च वि-शेषाभावादित्याहुरित्याह अत्रस्त्विति ॥

Colophon :

इति परिभाषासङ्ग्रहव्याख्यायां चन्द्रिकायां षष्ठस्य तुरीयः पादः ॥

**75**

Sl. No. 34222 वैय्याकररिपभाषाव्याख्या Ms. No. P. 3415/5

Beginning :

अथ प्राचीनापिशलादि व्याकरणतन्त्रे वाचनिकाः अत्र च पाणिनि तन्त्रे ज्ञापकेन लोकतन्त्रान्तरप्रसिद्धयुक्तिरूपन्यायेन च सिद्धाः भाष्यवर्तिकयोः द्धाः या परिभाषाः व्याख्यान्यन्ते । निंगेत्वे सति–

End;

तिस्रो मात्रा इति लक्षण सूत्रे भाष्योक्तः । अथदेतस्थ्यरीति सूत्रे शिती तिवक्तव्यं भवतीति भाष्ये न केवल मात्रालाघव यावद्यमप्यर्थ इति कैयटोक्तिः प्रयेणेति बोध्येम् ॥

Colophon :

इति श्री कावेरीतीरविराजमान श्रीकोटीश्वरक्षेत्रान्तर्गतैकरांजपुरोपनामक महाराजपुरवास्तव्येन पदवाक्यप्रमाणज्ञेन श्रीमत्कुत्सवंशपयःपारावारारासुधांशुना श्री गोपालभट्टसूनुना दत्ताराम भट्टेनविरचिते वैयाकरणसिद्धान्तसंग्रहे परि-भाषास्समाप्ताः ॥

## 76

Sl. No: 34224 **परिभाषाभास्करः** Ms. No. P. 4488

Beginning

भवसञ्चितपापौघविध्वंसनविचक्षणम् ।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥ +
श्रीगुरून् पितरौ नत्वाग्निहोत्री भास्कराभिधः ।
भास्करं परिभाषाणां तनुते बालबुद्धये ॥
× तत्र तावद्भाषव्यक्तायां वाचीत्यस्मात्पठितो भाष्यत इति व्युत्पत्तेः कर्मणि घञि व्युत्पत्तेः तथा प्रतीतिश्च परिभाषापदं यौगिकम् ।

End :

तस्मादुद्भूतकीर्तेः कृतसुकृततरन्मन्त्रतन्त्रस्वतन्त्रः
साधूनामग्रगण्यो गदद‌लनविधौ मानदानां शरण्यः ।
काशीक्षेत्राधिवासी कृतकठिनतरारातिषड्वर्गदम्भः
श्रीमानप्पाजिभट्टः सुरयजनरतः सिद्धधीराविरासित् ॥
तनय इह तदीयोऽरीरचद्भास्कराख्यः
फणिपतिफणितीनां आशयं भावयित्वा ।
परमतपरिभाषाभास्करं चार्पिपत्तं
सुरवररविपादे सच्चिदानन्दरूपे ॥
अलत्यासो मनीषा वा सुकृतं वा न किञ्चन ।
मन्ये पुरक्रुपाकल्पलतिकेवादिकारणम् ॥

Colophon :

इति श्रीमत्काश्यपान्वयसम्भवाग्निहोत्रिकुलतिलकायमान हरिभट्टसूनु भास्करविरचितः परिभाषाभास्करः समाप्तः ॥

## 77

Sl. No. 34225 **परिभाषावृत्तिः** Ms. No. P. 3890/2

Beginning :

वन्देऽहं वसुधाकन्यावल्लभं वाक्प्रसिद्धये ।
अपि × × रान शे ॥

करोमि हदया × वीरं महो निधे
+ + + +
इदं व्याकरणस्यास्तु त्रिमुनि × यसे नमः ।
प्रयोक्तव्येषु शब्देषु × ते ॥
× शाहराजपुराभिधे अग्रहारे ।
स्थिति × रामभद्रेण यज्वना ॥
पाणिनेः परिभाषाणां वृत्तिर्व्याख्यायते × ॥

End :

अत्रास्ति धातोरर्थभूतासक्तक्रिया शब्दार्थः । × ×
श्रीचोक्कनाथाध्वरियेनाबन्धि पतञ्जलेश्चरितं स्वप्ने शिवस्याज्ञया ।
सामोदां स तु सीरदेवभणितौ × कर्मितां
देवे दाशरथौ समर्प्य जनुषः साफल्यमालम्बते ॥

Colophon :

इति श्रीयज्ञरामदीक्षितपुत्रस्य रामभद्रदीक्षितस्य कृतिः समाप्ता ॥

## 78

Sl. No. 34227 वैय्यकरणपरिभाषा वृत्तिःव्याखया Ms. No. P. 3890/1

Beginning ;

स्फुरदभिनवरागा भास्कराभा प्रगल्भा
प्रसभशमितदोषा स्फीतसल्लोकचक्रा ।
विहित हितविचारा जाड्यजातोप्रशान्त्यै
प्रभवति परिभाषावृत्तिरासिवितैषा ॥
व्याख्यानतो + दलक्षणम् । व्याख्यानात् आचार्यपारम्पर्योपदेशात्
सन्देहेऽपि विशेषावगमो भवति । न तु लक्षणाभाव इति ।

End :

यथासच्छब्दः अयं सच्छब्दः उत्पत्तिमत्त्वेऽपि पदार्थेषु सम्बन्धं न व्यभिचर
तीति ततः उत्पन्नो भावः × सामान्यमभिदधाति सचेति । न तु
क्रियासम्बन्धम् ॥

Colophon :

इति श्रीमहोपाध्यायसीरदेवकृता परिभाषावृत्तिः समाप्ता ॥

## 79

Sl. No. 34229 **परिभाषावृत्तिः** M. No. C. 1273/2

Beginning :

मार्ताण्डस्कन्दविघ्नेशान् मातरं पितरं गुरून् ।
दयालुं दक्षिणामूर्तिं दातॄन् कल्याणमाश्रये ॥ +
× स्फुरदभिनवरागा भास्वराभा प्रगल्भा
प्रसभनमितदोषा स्फीतमल्लोकचक्रा ।
विहितहितविचारा जाड्यजातोपशान्त्यै
प्रभवति परिभाषावृत्तिरासेवितैषा ॥

End :

रूढिभिन्नरूपाव्यभिचरितसंबन्धेभ्यस्तु न भवति संबन्धाभिधानम् यथा तैलपाचिका त्वसिति केचित् । कुम्भकारत्वमित्यन्ये । अत्र हि समासादुत्पन्नो भावप्रत्ययः । क्रिया × × ×

Colophon :

— — —

## 80

Sl. No. 34237 **परिभाषेन्दुशेखरः** Ms. No. C. 989

Beginning :

नत्वा साम्बशिवं ब्रह्म नागेशः कुरुते सुधीः ।
बालानां सुखबोधाय परिभाषेन्दुशेखरम् ॥

प्राचीनवैयाकरणतन्त्रे वाचनिकानि अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोर्निबद्धानि यानि परिभाषारूपाणि व्याख्यायन्ते ॥

End :

सार्धास्तिस्रो मात्रा इणः इति तिस्रो मात्रा इति लण् सूत्रे भाष्योक्तेः तथा ओतः श्यनि इति सूत्रे शितीति वक्तव्यं तत्रायमर्थः छिन्द्धि इति शितीति न वक्तव्यं भवति इति भाष्ये न केवलं मात्रालाघवम् । यावदयमप्यर्थः इति कैयटोक्तेः प्रायेणेतीति शिवम् ॥

Colophon :

इति श्रीमदुपाध्यायोपनामक सतीगर्भज शिवभट्टसुत नागोजीभट्टकृते परि-
भाषेन्दुशेखरः सम्पूर्णः ॥

81

Sl. . No 34243 वैय्याकरणपरिभाषेन्दुशेखरक्रोडम् Ms. No. C. 2584/1

Beggining :

नत्वा गणपतिं देवं नृसंहंकमलायुतम् ।
तातं शम्भुं प्रसू दुर्गां कृष्णदेवं तथाग्रजम् ॥
दोषा ये पण्डितंमन्यैः परिभाषेन्दुशेखरे ।
दत्तास्तान् सम्यगुद्धर्तुं मनुदेवेन चिन्त्यते ॥

End :

गुणानामभेदकत्वे पुनरपि वैधर्म्येण गुणानामभेदकत्वे त्वनवकारात्वात् नाघ इत्युक्तं, क्वेदानीं व्याहतिरिति शब्देन्दुशेखरदूषणोद्धारे स्पष्टीकृतमस्मामिरित्यलम् ॥

Colophon :

— — — —

82

Sl. No. 34244 वैय्याकरणपरिभाषेन्दुशेखरव्याख्या Ms. No. P. 2738

Beginning :

प्रत्यूहाम्बुधिसेतुर्यत् पदपांसुर्बभूवदेव सः ॥
लमीनृसिंहनामाहं परिभाषेन्दुशेखरे ।
करिष्ये त्रिशिखाभिख्यां व्याख्यां संख्यावतां मुदे ॥

End :

शिष्टाचारप्रतिपन्तं मङ्गलं कृतं वेदितव्यमिति इष्टं सिद्धम् ॥
तेन तुष्यति देवोऽपि पुष्यत्वेनामनारतम् ।
निर्माय त्रिशिखा सेयं दक्षिणापमूतयेऽर्पिता । अमुं सहन्ताम् ॥

यद्यप्यशेषमिह दूषणदूष्यमेव
तद्दूषयन्तु सुधियो न तु तेन दूये।
यत्किञ्चिदस्ति यदि साधु ततः कृता चेत्
श्लाघा तदीयचरणौ शिरसा वहामि ॥

Colophon

— — — —

८३

Sl· No: 34246 परिभाषेन्दुशेखरव्याख्या Ms. No. C. 1266

Beginning :

अथ भगवता पाणिनिना स्वीयशास्त्रे अनुपनिबद्धान्यपि शास्त्रीयप्रवृत्ति निवृत्ति प्रयोजनतया भगवतोऽनुमतत्वेन अनुमतानि भगवता भाष्यकारेण स्थाने स्थाने उट्टङ्कितानि कतिपयानि वचनानि तान्त्रिकैः परिभाषापदेन व्यवह्रियन्ते ।

End :

ऊणुनुविषतीत्यत्र गुणादेशे कृते अवादेशाभावेन द्वित्वात् प्राक् न दोषः ।
एवं च सर्वत्रापि विचारणीय न्यायमनुभवतु ॥

Colophon :

— — — —

८४

Sl. No. 34249 परिभाषेन्दुशेखरव्याख्या Ms. No: P. 2784

Beginning :

नागेशेति ॥ आत्मनामग्रहणनिषेधरस्तु प्रत्यभिवादनसूत्रवैय्यर्थ्येन अभि वादान्यविषयत्व ति भावः परिभाषेन्द्रिति । परिभाषेन्दुरिति दृष्टान्तेप्यर्थ संग्रहः कार्य × तीन्द्राः ॥

End :

प्रकृते च द्वित्वे कृते प्रत्ययाविधानायस्माद्विहितं तदादि × ×
दिति तस्य तृ न विवादित्वं इति न दोषः चर्करी चेत्यस्यतं ×

चर्करीतं चेत्यस्य × खर्षः पाठस्त्वावश्यकः । एवं च पाठेनेत्यादिसामर्थ्यवर्णनं चिन्त्यमिति सुधियः ॥

Colophon :

परिभाषार्थमञ्जरी समाप्ता ॥

85

Sl. No. 34249 वैयाकरणपरिभाषेन्दुशेखरव्याख्या Ms. No. P·4049

Beginning :

ब्रह्मादयो यस्य न पारमाप्नुवन्
गङ्गाद्भुतं मस्तकदेशवासिनी ।
वामार्धदेहापि न चण्डिकापीयं
ध्यायामि देवं सनकादिवन्द्यम् ॥
वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
विवृतिं परिभाषेन्दुशेखरे तनुते गदाम् ॥

प्रारीप्सितस्य निर्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानतिरूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति नत्वेति ।

End :

अप्यर्थः प्रयोजनम् । यावदिति । पदगौरवलाघवमपीत्यर्थः । ऋलक्सूत्रभाष्यं तु पदलाघवपक्षेणापि सुयोजमिति नात्र तदुक्तम् । एवं ज्ञाजनोर्जेत्वादिसूत्रभाष्यमप्यत्र गमकं बोध्यमित्यन्यत्र विस्तर इति सर्वमनवद्यमिति शिवम् ॥

Colophon

इति श्रीमत्पायगुण्डोपाख्यमहादेवसुतवेणीगर्भजवैद्यनाथभट्टकृतपरिभाषेन्दुशेखरकाशिका सम्पूर्णा ॥

86

Sl. . No 34259 वैय्याकरणपरिभाषेन्दुशेखरव्याख्या Ms. No. C. 950

Beggining :

गुरुं विघ्नेश्वरं नत्वा ध्यात्वा च हृदि भारतीम् ।
विवृणोमि यथामेधं परिभाषेन्दुशेखरम् ॥

नमन्महीपमण्डलीकिरीटरत्नभास्वरी
विराजिताङ्घ्रिकृष्णभूपतीन्द्रक्लृप्तसंमितेः ।
तनोतु सर्वमङ्गला परां मुदं सतामही-
नवाग्विभूषिता मनीषिशेषशर्मणा ॥

**End :**

क्वचित्तदनाश्रयणमिति भाव इति शम् ॥
सिद्धान्तेषु यदिप्रमादवशतः स्यादप्यघास्मत्कृतौ
उक्तं तद्दयया समीक्ष्य सुधियः संशोधयन्तु स्वयम् ।
तोषायैव समे भवत् न तु पुना एषा यशापक्षति
गण्यादेवणिजां मुदे न तु पुनः खेदाय बोभूयते ॥

**Colophon :**

इति श्रीमदद्वैतविद्यापारावारपारीणब्रह्मण्यसूरितनूज शेषशर्मसूरिविरचिता सर्वमङ्गला समाप्ता ॥

## 87

**Sl. No. 34262** परिभाषेन्दुशेखरव्याख्या **M. No. C- 1947**

**Beginning :**

गुरुं विश्वेश्वरं नत्वा नत्वा च हृदि भारतीम् ।
विवृणोमि यथामेधं परिभाषेन्दुशेखरम् ॥
प्रवृत्तिमेतां दृष्ट्वा मे दुःख्यत्यात्मापि लज्जया ।
तथापि देशिकदया वाचालयति साम्प्रतम् ॥

**End :**

सिद्धान्तेषु यदि प्रमादवशतः स्यादन्यदस्मत्कृतौ
उक्तं तद्दयया समीक्ष्य सुधीयः संशोधयन्तु स्वयम् ।
दोषायैव समे भवेत् न तु पुरो नाशाय सा पद्धतिः
× देर्वणिजा मुदे न तु पुनः खेदाय बोभूयते ॥

**Colophon :**

इति श्रीमदद्वैतविद्यापारावारीण सुब्रह्मण्यसुरितनुज शेषशर्मविरचिता सर्वमङ्गला समाप्ता ॥

४४

Sl· No: 34273 वैय्याकरणभूषणसारः Ms. No. P. 9122

Beginning :

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते ॥
अशेषफलदातारं भवाब्धितरणे तरीम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥

प्रारीप्सित प्रतिबन्धकोपशमनाय कृतं श्रीफणिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते— +

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णित एवार्थः संक्षेपेणेह कथ्यते ॥

End :

स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकं स्फोटशब्दाभिधेयत्वं सूचयतीति निर्विघ्नप्रचयान्ते मङ्गलं स्तुतिनतिरूपमाह—

अशेषफलदातारमपि सर्वेश्वरं गुरुम् ।
श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीण रंगोजिभट्टात्मज कौण्डभट्टकृते वैयाकरणभूषणसारे स्फोटवादः समाप्तः ॥

४७

Sl. No. 34279 वैय्याकरणसिद्धान्तमञ्जूषा Ms. No: C. 987

Beginning :

नागेशभट्टविदुषा नत्वा साम्बशिवं लघुः ।
वैयाकारणसिद्धान्त मञ्जूषैषा विरच्यते ॥

तत्र वाक्यस्फोटो मुख्यः । लोके तस्यैव अर्थबोधकत्वात् । तेनैव अर्थसमाप्तेश्च । तदुक्तं न्यायभाष्यकृता—

पदसमूहो वाक्यं अर्थसमाप्तौ इति ॥

**End :**

तदुक्तं हरिणा—

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।

**Colophon :**

इति । एवं लघुनोपायेन सर्वशब्द प्रतिपत्तौ च शास्त्रस्योपयोगो बोध्यः इति शिवम् ॥ +

परिकृत्योक्तवां स्तेन प्रीयतामुमथा शिवः ॥

इति श्रीमदुपाध्यायोपनामक सतीगर्भज शिवभट्टसुत नागेशकृतः वैयाकरण सिद्धान्तमञ्जूषाख्यः स्फोटवादः समाप्तः ॥

१०

**Sl. No. 34280** वैय्याकरणसिद्धान्तसंग्रहः **Ms. No. P. 3413**

**Beginning ;**

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

येन धौता गिरः पुंसां विमलैश्शब्दवारिभिः ।

तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥

अइउण् । ऋलक्

**End :**

निष्प्रवाणिश्चाकाबभावोल निपात्यते । प्रपूर्वाच्चेन्योल्युट् । प्रवाणी तनुत्वापलोकानि ता प्रवाणी अस्य निष्प्रवाणिः पटः । समासवानित्यर्थः । पादशतस्य तन् प्रकृत वृकं सपत्रान्वतस्मात् व्याख्यान्दुस्सुभ्यो वयसि विंशतिः ॥

**Colophon :**

इति कावेरीतीरविराजमानश्री कोटीश्वरक्षेत्रान्तर्गतैकराजपुरोपनामक महा-राजपुरवास्तव्येन पदवाक्य प्रमाणज्ञेन श्रीमत्कुत्सवंशपःपारावारराका सुधाकर श्रीगोपालभट्टसूनुना दत्तारामभट्ट विरचिते वैयाकारणसिद्धात संग्रहे पञ्चम-स्यायस्य चतुर्थः पादः ॥

## 91

Sl. No. 34281 वैय्याकरणसिद्धान्तसंग्रहः Ms. No. P. 3414

Beginning :

एकाचो द्वे प्रथमस्य । अजादेः द्वितीयस्य । इमावधीक्रियेते प्राक् संप्रसारणात् । एका च इति तद्गुणसंविज्ञानबहुव्रीहिणा षष्ठ्यन्तेन प्रथमस्येत्यस्य विशेषणम् । क्नुए एव जागर्त्यादौ द्वित्वसिद्धिः ॥

End :

शास्त्रदृष्ट्या ह्रस्वाकारस्य प्रक्रियादशायां विवृतत्वमेव । तेन दण्डादिकादौ सवर्णदीर्घसिद्धिश्चेति प्रागेवोक्तम् । दीर्घप्लुतयोस्तु प्रयोगदशायामपि विवृतत्वमेवा स्पष्टं चेदं सर्वमत्र भाष्ये इति शिवम् ।

रषाभ्यामुभौ स्तोश्चुनाभ्यासे चर्च नव ।
भूत्रादि निध्यनिमित सूत्रा पाणिनिनिर्मिता ।
अष्टाध्यायी सूत्रास्य व्याख्यातात्र यथामति ॥

Colophon :

इति श्रीकावेरीतीरविराजमान श्रीकोटीश्वरक्षेत्रान्तर्गतैकराजपुरोपनामक महाराजपुरवास्तव्येन पदवाक्यप्रमाणज्ञेन श्रीमत्कुत्सवंशपयःपारवाराकासूर्यागुना श्रीगोपालभट्टसूनुना दत्तारामभट्टे विरचिते वैयाकरणसिद्धान्तसंग्रहे अष्टमस्याध्यायस्य चतुर्थः पादः ॥

## 92

Sl. No: 34282 वैय्याकरणसिद्धान्तसुधानिधिः Ms. No. S. 4416/5

Beginning

समर्थः पदविधिः । पदसंबन्धी विधिः समर्थाश्रितो वोध्यः । समर्थशब्दस्य तदाश्रिते लाक्षणिकत्वात् विधिपदं कर्मसाधनम् । उपसर्गे घोः किरिति कि-प्रत्ययः ॥

End :

कर्मतया फलविशिष्टस्यैवोहनयहार्थं तया पचन्ति व्यापारमात्रार्थो न तु फलावच्छिन्न व्यापारार्थः । साध्यत्वाख्य विषयत यैवोदनस्य कर्मत्वात् । अतो नोक्तरीत्या प्रकृतसि × ×

Colophon :

— — — —

## 93

Sl. .No 34283 वैय्याकरणसिद्धान्तसुधानिधिः Ms. No. C. 4417

Beggining :

योगात्प्रशंसागमिकानां व्याघ्रादिपदानां च निरांसेन प्रशंसामात्ररूढशब्द परिग्रहार्थं मतल्लिकामचर्चिकाप्रका + तल्लजौ प्रशस्त वाचकान्य मूनीत्यमरः । एते च नियतलिंगाः ॥

End;

तथा च द्वितीयाद्यर्थविशिष्टा एव बहुव्रीत्यर्थः । प्राप्तमुदकं स प्राप्तोदको ग्रामः ऊढो थ रथोयेन स ऊढरथोऽनड्वान् उपहृतः प × स्मैस उपहृता ॥

Colophon :

इति श्री सिद्धान्तसुधानिधौ द्वितीयस्याध्यायस्य द्वितीये पादे प्रथममा-ह्निकम् ॥

## 94

Sl. No. 34285 व्युत्पत्तिदीपिका Ms. No. P. 3680/2

Beginning ;

प्रणम्य प्रज्ञयोत्तुङ्गं पद्मपत्रदलं महः ।

साधुप्रीत्यै करिष्यामि साध्वीं व्युत्पत्तिदीपिकम् ॥

अथार्थानां वाचकाः शब्दाः । ते प्रत्ययांशव्यतिरिक्तांशे प्रकृतिनामधेय-मनुभवन्ति ॥

+ + +

श्रीताताचार्यवर्यः शुभगुणलधिः शिङ्गलार्यश्च धीमान्

हस्तिक्षोणीधराम्बागुरुरपि जनको यस्य माता क्रमेण ।

## 95

Sl· No: 34288 शब्दकौमुदीव्याख्या Ms. No. P. 35282

Beginning :

तस्य श्री वेङ्कटस्य प्रथितनिजधियो वैष्णवस्य प्रबन्धः

श्रीमान् सोऽयं समाप्तः शठरिपुविषये शब्दविज्ञानहेतुः ॥

यस्य किल मूर्तिभेदः पाणिनिवररुचिपतञ्जलयः ।

तस्मै नमः परस्मै कुर्मः श्रीचोक्कनाथमखिनाम्नो ॥

भाष्य × व्याख्याव्याजेन शब्दकौमुद्याः ।

भट्टोजिकृतिषु किञ्चित् व्याकुलयिष्ये यथार्थबोधाय ॥

End :

गक्ङितिचेत्यत्र च शब्दस्येति शब्दार्थत्वादिक इति ये गुणवृद्धी इग्ल क्षणे इत्यर्थः । किन्निमित्ते न स्तः इति सूत्रार्थसम्पत्तिरपि परिभाषारम्भस्य प्रयोजनं × इतिसूत्र—

Colophon :

— — — —

## 96

Sl. No. 34290 शब्दकौस्तुभः Ms. No: P. 1416

Beginning :

× सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।

चरीकर्ति बरीभर्ति सञ्जरीहर्ति लीलया ॥

नत्वा लक्ष्मीधरं तातं सुमनोबृन्दवन्दितम् ।

फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धरे ॥

**End :**

अत एव ज्ञापकाद्विपर्यायस्याद्युदात्तता ।

इन्द्र आशाभ्यस्परि । नक्षत्राणि मद्विषयाणाम् । अन्त उदात्तः स्यात् । आश्लेषा × × त इति प्राप्ते ज्येष्ठा श्रविष्ठा धनिष्ठानां इष्टं स्कन्तत्वेनाद्युदात्ते प्राप्ते वचनं नकुपुंसकस्य । कृत्तिकाख्या चेत् । अन्तोदात्तो न ॥

**Colophon :**

[इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य प्रथमपादे चतुर्थमाह्निकम् ॥]

## 97

**Sl. No. 34296** **शब्दकौस्तुभः** **M. No. P. 4125/2**

**Beginning :**

तृतीये पादे प्रथममाह्निकम् ॥

अनुदात्तङित आत्मनेपदम् ॥

अनुदात्तेत्कात् उपदेशे यो ङित् तदन्ताच्च धातोः लस्थाने आत्मनेपदमेव-स्यात् । एधते स्पर्धते बोभूयते ऋतीयते ॥ कथं तर्हि शेते--

**End :**

नित्यविभूनां वर्णानां य × रम्यते । अनेनेतिकरणेघञ् चरमवर्णश्च संज्ञी × त्यैकापि × ते खरि परे रेफस्य विसर्गः । अवसाने च रेफे स्थनिनीति । अत्र वार्ति × × लोकविदितत्वात् सिद्धमिति ॥

**Colophon :**

इति श्रीपदवाक्य प्रमाणपारावार पारीणस्य लक्ष्मीधरसूरेः सूनुना भट्टोजि भट्टेन कृते शब्दकौस्तुभे प्रथमाध्यायस्य चतुर्थपादे चतुर्थमाह्निकम् ॥

प्रथमाध्यायः समाप्तः ॥

## 98

**Sl. No. 34302** **शब्दकौस्तुभः** **Ms. No. P. C.3116/1**

**Beginning :**

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।

चरीकर्ति भरीभर्ति सञ्जरीहर्ति लीलया ॥

फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धरे ॥

\+ भगवान् भाष्यकारः प्रादर्शयत् ॥ अथ शब्दानुशासनमिति ॥

End :

वहिकश्च वहीकश्च विपाशायां पिशाचकौ ।

तयोरपत्यं वाहीका नैषामृष्टिः प्रजायते ॥

एतच्च विवेचनं वार्हिग्रामेभ्यक्षेत्यादौ उपयोक्ष्यत इति सर्वं सुस्थम् ॥

Colophon :

इति श्री विद्वन्मकुटरत्नस्य लक्ष्मीधरसूरेः सूनुना भट्टोजीभट्टेन कृते शब्द-कौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे नवममाह्निकम् ॥

पादश्च समाप्तः ॥

## 99

Sl. No. 34306 शब्दकौस्तुभः Ms. No. C. 4662/11

Beginning :

नामापि पक्षे लुगिति वास्तु । उभयथापि चातूरूप्ये न विवाद शैरीषं × × वुञ् । शिरीषकः । तञ् । शैरीषकः । कक् शै-रीषकः इति ॥

जनपदे: लुप् । ग्रामसमुदायो जनपदः तस्मिन्वा + चातुरर्थिकस्य लुप् ॥

End :

भाषायां शिवतातिप्रभृतीनां प्रयोगः चिन्त्यः । भावे च शिवादिभ्यो-भावे तातिल्ल्याच्छन्दसि । शिवस्य भावः शिवतातिः शन्तातिः । अरिष्ट-तातिः । यतोऽधिकारः समाप्तः छन्दसीत्यस्य च ॥

Colophon :

इति श्री पदवाक्यप्रमाणपारावारपारीणस्य लक्ष्मीधरसूरेः सूनुना भट्टोजीदीक्षितेन कृते शब्दकौस्तुभे चतुर्थस्याध्यायस्य चतुर्थपादे प्रथमं आह्निकम् ॥

## 100

Sl. No. 34307 शब्दकौस्तुभव्याख्या M. No. B• 974

Beginning :

पदार्थयोरितरेतराध्यासयति हरिरप्याह तादात्म्यमुपगम्यैव शब्दार्थस्य सम्बन्धान्तरमेव शक्तिः । तद्ग्रहकं चेतरेतरभ्यां समूलं तादात्म्यं तदुक्तं पातञ्जलभाष्ये संकेतस्तु पदपदार्थयो × प्रकाशति ॥

End :

समानाधिकरण्यं चात्रैकविशेष्यक प्रतीतिजनकत्वमेव हरिणा वृध्यादयो यथा शब्दात्स्वरूपोपनिबन्धनाः आदैच्चुत्पदितैश्शब्दैः संबन्धं याति संज्ञाभि-रिति । ननु वृध्यादि शब्दानामपि परत्वे वृध्यभिन्ना आदै च इत्यर्थः । पर्यवस्यति तथा च × ×

Colophon :

— — — —

## 101

Sl. No. 34309 शब्दकौस्तुभव्याख्या Ms. No. A. 339

Beginning :

संज्ञासूत्रमिदम् । आकारः ऐकारः औकारश्च प्रत्येकं वृद्धिसंज्ञा स्यात् इति सूत्रार्थः । संज्ञा प्रदेशा वृद्धिरेजित्सवेमादयः । तदुदाहरणमेवास्या प्युदाहरणं बोद्धव्यम् ॥

End :

तथा च गोत्र प्राप्ते अनन्तरत्वप्राप्ते इत्युभयत्र विभाषेयं पित् ञोरित्यत्रापि यूनित्यस्यानुवृत्यननुवृत्तिभ्यां संशये यूनित्यानुवर्तनात् प्राप्तविभाषेति निर्णयः । एवमन्यत्रापि यथान्यायं द्रष्टव्यम् ॥

Colophon :

इति श्री वत्सकुलतिलकवैद्यनाथ सुमतिसूनोः वैय्याकरणाचार्य सार्वभौम श्रीरामभद्राध्वरिगुरुचरणश्लाघित मतिकुशलस्य गोपालकृष्णशास्त्रिणः कृतौ शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य प्रथमपादे षष्ठमाह्निकम् ॥

## 102

Sl. No. 34310 शब्दकौस्तुभव्याख्या Ms. No. C· 813

Beginning :

आनन्दकन्दं मुनिहृन्मिलिन्दं
ख × दगोविन्ददयारविन्दम् । (?)
वन्दे सुरेन्द्रादिप्रदादिदन्त-
हीनादिशं देरविनन्दनन्दम् ॥
वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
व्याख्यां प्रभाख्यां तनुते कौस्तुभस्य स्वबुद्धये ॥

End :

गुणकर्मभूतत्वोपपादकं विशेषणमपादानेति । तथाच दुहादिषु दं × रप्त्वियाघ इति भाव इति केचित् । वस्तुतस्तु उद्देश्यरूपमार्थं प्राधान्यं × × दातानुकूलव्यापारानुकूल व्यापारः शासनम् ॥

Colophon

दशोत्तरशततमे पत्रे वर्तते–

इति श्रीमत्पायगण्डोपाख्य वेर्णगर्भज महादेवसुत वैद्यनाथकृते कौस्तुभ व्याख्याने प्रभाभिधे प्रत्याहाराह्निकं परिपूर्णम् ॥

## 103

Sl. No. 34314 शब्दचन्द्रिका Ms. No· P. 731

Beginning :

श्रीमदादिवराहाय श्रीमुष्णस्थलवासिने ।
गुरुभ्यश्च नमस्कृत्वा क्रियते शब्दचन्द्रिका ॥
अइउण् × × हल् इति–प्रत्याहारसूत्राणि ।

End :

तीक्ष्णेन परशुनावृश्चत् । अव्ययानां प्रतिषेधः । उच्चैरधियान सुबन्तस्य पराङ्गवद्भावे तन्निमित्तग्रहणं आमन्त्रितार्थनिमित्तवाच्येवेत्यर्थः । तेनेह न मरुद्भिरग्न आगहि मरुद्भिरिन्द्रसख्यते अस्तु ॥

Colophon :

— — —

## 104

Sl. No. 34319 **शब्दभूषणम्** Ms. No: P. 3883/1

**Beginning :**

येनाक्षरसमाम्नाय + गुरुभ्यः ॥

गुरून्नत्वा परं ब्रह्म ध्यात्वा नारायणः सुधीः ।

पर्यालोच्य महाभाष्यं कुरुते शब्दभूषणम् ॥

अइउण् . . . सूत्राणि अणादिसंज्ञार्थानि । एषामन्त्या इतः । लणूसूत्रे अकारश्च . . . व्याख्यानतो विशेषप्रतिपत्तिः—

**End :**

एवञ्च भाष्ये ऊठभाविभ्यो यङ्लुङ् नास्तीत्युक्तप्रायम् । अन्यथा द्योरित्यत्र क्ङितिग्रहणानुवृत्तौ दिवेर्यङ् लुगिति बादौ ईडभावे लघूपधगुणे वलोमपदेदेति देधीषीत्वादि ऊठः अभावे रूपम् ×

**Colodhon :**

[इति षष्ठस्य द्वितीयः]

## 105

Sl. No: 34359 **शब्दसारः** Ms. No. P. 989/3

**Beginning :**

श्रीवेङ्कटांबा लिङ्गार्यौ श्रीमन्तौ वेङ्कटेश्वरौ ।
श्रीमानवीं च मैलारीं श्रीवेङ्कटपतिं भजे ॥
पाणिन्यादीन् समानम्य पदशास्त्रप्रवर्तकान् ।
पद्यैः पञ्चाशताऽस्माभिः पदसङ्ग्रह उच्यते ॥

**End :**

इति वाक्यं पदसङ्ग्रहश्च ॥
शब्दसारमयाः श्लोकाः पञ्चाशन्मान × सुवि ।
आनन्दयेयं पाठेऽर्थे लघवो गुरवो बहून् ॥
श्रीवेङ्कटेश्वरात् × × ॥

**Colophon :**

इति श्रीमदात्रेय लिङ्गार्यतनूज श्रीवेङ्कटेश्वर कृतः शब्दसारः समाप्तः ॥

## 106

Sl. No. 34360 **शब्जार्थसारमञ्जरी** Ms. No. P. 4826

Beginning :

नत्वा कृष्णपदद्वन्द्वं कारकाद्यर्थनिर्णयः ।
श्रीभवानन्दसिद्धान्तवागीशेन वितन्यते ॥

तत्र क्रियानिमित्तं कारकमिति न सामान्यलक्षणम्, सम्प्रदानादेरनुमिति प्रकाशन——

\+ + + +

End :

निरुक्तस्वसामानाधिकरण्ये प्रतिपाद्यते तत्र × यस्य क्रियया न्यस्य क्रियान्तरं लक्ष्येत इति व्याख्यायां शब्द × भिप्रायकम् ॥

Colophon :

इति शब्दार्थसारमञ्जर्यां भवानन्दवागीशविरचितं षट्कारक विवेचनं समाप्तम् ॥

## 107

Sl. No. 34364 **शब्दानुसारवृत्तिः** Ms. No: C. 883/2

Beginning :

अणादि प्रत्यया य इत ऊर्ध्वं वक्ष्यति सः तद्धितसंज्ञो विज्ञेयः । औपगवः कापटवः । प्रादशाक्कातारस्तद्धित इत्यादयः ॥

End :

रोहितगिरीयः अन्धस्मीयः गिरिरिति किम् । साङ्काश्यको आजीवः । प्रस्वपुरेत्मादिना कञ् । अस्त्वाजीव इति किम् ? रुक्षोदः पर्वतः × × व्राह्मणः पृथुः पर्वत आजि × निवासाद्व्यपार्धवः ।

Colophon :

इत्याचार्य श्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधान × शब्दानुशासनवृत्तौ षष्ठाध्यायस्य तृतीयः पादः ॥

## 108

Sl. No. 34365 **शब्दानुशासनवृत्तिः** M. No. C. 884/2

Beginning :

प्रणम्य परमात्मानं अथ शब्दानुशासनम् ।
आचार्यहेमचन्द्रेण स्मृत्वा किञ्चित्प्रकाश्यते ॥

अर्हम् । अर्हमेत्येतदक्षरम् परमेश्वरस्य परामृष्टिनामवाचकम् । मङ्गलार्थं शास्त्रस्यादौ प्रणिदध्याह–सिद्धिः स्यात् । स्याद्वादादनेकान्तवादात् प्रकृतानां शब्दानां सिद्धिः निष्पत्तिः ॥

End :

गतिसंज्ञकस्य तिरःशब्दस्य सम्बन्धिनो रेफस्य कखपकेषु सकारादेशो वा भवति ॥

तिरः कृत्य तिरस्करोति तिरस्कृत्य तिरस्करोति तिरः कर्ता तिरस्कर्ता तिरः कर्तु तिरःकर्तुम् । गतिरित्येव । तिरः कृत्वा काष्ठं गतः—

Colophon :

— — — —

## 109

कार्तिकेयसंवादे मुक्तिसोपानशास्त्रं समाप्तम् ॥

## 280

Ms. No. 34978 खेशरीपटलः Sl. No. B. 225

Beginning :

अथ देवि प्रवक्ष्यामि विद्यां खेचरसंज्ञिकाम् ।
यस्या विज्ञानमात्रेण लोकेऽस्मिन्नजरामरः ॥
मृत्युव्याधिजराग्रस्तं दृष्ट्वा विश्वमिदं प्रिये ।
बुद्धिं दृढतरां कृत्वा खेचरीं तु समाश्रयेत् ॥
इति श्री आदिनाथ विरचिते महाकाल्योगशास्त्रे खेचार्यां तृतीयः पटलः ॥

End :

मधुत्रययुतं वर्षादजरामरणप्रदम् ।
रसशाललिनिर्यासं गन्धकं समधुत्रयम् ॥
भक्षयेत्प्रातरुत्थाय षण्मासादजरामरः ॥
इति सिद्धौषधानि ॥

Colophon :

— — —

## 281

Sl. No. 34982 गोरक्षप्रबोधः Ms. No. P. 258//14

Beginning :

गोरक्षभूतं तच्छास्त्रं भवपाशविमुक्तये ।
आत्मबोधकरं नृणां विवेकद्वारकूर्चितम् ॥

एतद्विमुक्तिसोपानं एतत्कालस्य वञ्चनम् ।
यद्व्यावृत्तं मनोभोगादासक्तं परमात्मनि ॥

**End :**

दुग्धे क्षीरं घृते सर्पिः अग्नौ वह्निरिवार्पितः ।
तन्मयत्वं व्रजत्येवं योगी लीनः परे पदे ॥
भवभयवनवह्निः मुक्तसोपानमार्गं
प्रकटितपरमार्थं गुह्यकानां च गुह्यम् ।
सकृदपि पठनीयं यः शृणोति प्रबोधं
भवति सुदृढकायो भाजनं मुक्तिमुक्त्योः ॥

**Colophon :**

इति गोरक्षविरचितप्रबोधः समाप्तः ॥

## 282

**Sl. No. 34983** | **गोरक्षशतकम्** | **Ms. No. P. 5230/2**

**Beginning :**

गोरक्षबोधप्रारम्भः । अथ राजयोगसमाधिसक्षणमुच्यते–हरिः ओम् ।
नमः शिवाय गुरवे नादबिन्दुकलात्मने ।
निरञ्जनपदं याति यतो योगपरायणः ॥
अथेदानीं प्रवक्ष्यामि समाधिक्रममुत्तमम् ॥

**End :**

गुह्यात् गुह्यतरं गुह्यं गोरक्षेण प्रकल्पितम् ।
इति गोरक्षशतकं योगशास्त्रं तु यःपठेत् ॥
सर्वपापविनिर्मुक्तः योगसिद्धिं लभेद्ध्रुवम् ॥
योगशास्त्रं पठेन्नित्यं किमन्यैः शास्त्रविस्तरैः ।
+ प्राप्नोति धैर्यं पुनः ॥

**Colophon :**

इति गोरक्षशतके योगशास्त्रावलोके योगशास्त्रे गोरक्षबोधकं सम्पूर्णम् ॥

## 283

Sl. No. 34986 चिन्तातिमिरभास्करः Ms. No. C. 817

Beginning ;

सिद्धानन्दगुरुं नत्वा चिन्तातिमिरभास्करम् ।
हंसानन्दमुनिर्वक्ति शिष्यप्रश्नपुरःसरम् ॥

शिष्यः—

चिन्तासन्तानसंघात महातिमिरभास्कर ।
गुरुनाथ कथं चिन्तातमच्छेदो भवेद्वद ॥

End :

ध्यानाराधनतत्परैरलमलं न्यासैरनेकासनैः
मुद्राहोमतपोजपैरलमलं नानाक्रियाडम्बरैः ।
आनन्दाम्बुदशासुगद्गदगलो रोमांचसंसूचिना
देहेनाहमवर्णिनां पदकलामाराधये पादुकाम् ॥

Colophon :

इति श्री सिद्धानन्दनाथशिष्य श्रीहंसानन्दनाथमहायोगीन्द्रविरचिते श्रीमच्चिन्तातिमिरभास्करे कृतकृत्यत्वनिरुपणं नाम पञ्चमो विश्रामः ॥

## 284

Sl. No. 34988 जीमन्मुक्तिसङ्केतः Ms No. P. 258/17

Beginning :

आधारं तु चतुष्पत्रं तप्तकाञ्चनसन्निभम् ।
तत्र क्रीडति विघ्नेशः सर्वविघ्नविनाशकः ॥
सृष्टेराधारमाधारे आधारे सर्वदेवताः ।
आधारे सर्वदेवाः स्युः तस्मादाधारमाश्रयेत् ॥

End :

स्वेच्छाचरणः । जडवद्वाचा । परापवादे मूकः । उन्मत्तगतिः । उन्मनाव्यवस्था । होमकिवेलाहुतिः । प्रमणनित्यगुरूपदेशः । सत्व-प्रकाशः । उज्जीवितः शिवयोगनिद्रा खेचरीमुद्रा ॥

Colophon :

इति श्री मत्स्येन्द्रनाथविरचिते जीवन्मुक्तिसङ्केतः समाप्तः ॥

## 285

Ms. No. 34990 ज्ञानयोगखण्डव्याख्या Sl. No. C. 2550/3

Beginning :

अतो जितासनस्यैव प्राणायामो निरुपद्रवः सिद्ध्यतीत्यतः तदनन्तरं तत्प्रतिजानिते– अथात इति । उक्तं वर्णदेवतात्मकत्वं विवृणोति–इडयेति । मात्राभिः तल्लक्षणमुक्तम् ॥

End:

तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति इति मुण्डकश्रुतिः । गुह्यात् पवनप्रत्याहारादपि निमर्शरूपस्य प्रत्याहारस्य विशेष माह गोपनीयमिति ॥

Colophon:

इति ज्ञानयोगखण्डे सप्तदशोऽध्यायः ॥

## 286

Sl. No. 34992 दत्तात्रेयसंहिता M. No. P. 5231

Beginning :

दत्तात्रेयसाङ्कृतिसंवादयोगशास्त्रम् ।
योगिहृत्कमलावासं सगुणं निर्गुणान्तकम् ।
विष्णुं वन्दे योगगम्यं सर्वविघ्नप्रशान्तये ॥
साङ्कृतिर्मुनिरासीद्‌भूमण्डलं योगलिप्सया ।
सकलं परिचक्रम्य नैमिषारण्यमत्ययात् ॥

End :

योगाभ्याससुसंयुक्ताः रहस्येषु गुहादिषु ।
एवं कालं चरन्त्येव जनसङ्गविवर्जिताः ॥
तस्मात् सर्वप्रयत्नेन योगमेव समभ्यसेत् ।
योगाभ्यासोत्तमफलं निष्फलाश्चेतराः क्रियाः ॥

Colophon :

इति श्रीदत्तात्रेयसंहितायां दत्तात्रेयसांकृतिसंवादे योगशास्त्रनिरूपणं सम्पूर्णम् ॥

## 287

Sl. . No 34994 **नवशक्तिषट्कम्** Ms. No. B. 820/2

Beginning :

द्वासप्ततिसहस्राणि शरीरं व्याप्य नाडिकाः ।
अधश्चोर्ध्वं च तिष्ठन्ति नव तासां प्रमाणिताः ॥
थं सौमार्वं वहन्ती विलसति रसनाकुण्डली सा त्रिखण्डा,
व्याप्ता कृत्वा सुषुम्ना ग्रसनमथ षट् चक्रभेदाश्च वक्राः ।
वायौ त्वाधारशक्ति × वारयुक्ता ॥

End :

चक्षुर्नाडीयुगं + मभ्यन्तरे,
यच्च श्रोत्र + सूत्रं मतम् ।
हस्ताङ्गुष्ठयुगस्य चावटुगतं यन्नाडिकायुग्मकं,
तत्पादद्वयपाणिभागयुगलं गत्वा स्थितं दृश्यते ॥
ताः पृथक् पृथगागत्य मिलिता नव शक्तयः ।
श्री मत्स्यनाथपुत्रेण गोरक्षेनेति भाषितम् ॥

Colophon :

इति नवशक्तिषट्कं समाप्तम् ॥

## 288

Sl. No. 34995 **नाडीचक्रम्** Ms. No. P. 2466/6

Beginning :

अथातस्सम्प्रवक्ष्यामि योगपादं समासतः ।
तस्य पादस्य पूर्वे तु नाडीचक्रं ततशृणु ॥
सप्ततिद्विसहस्राणि नाडयस्त्विति कीर्तिताः ।
नाडीभिरावृतं देहं × नाश्वर्थस्थ × पर्णवत् ॥
चक्रपर्यप्रथौ यस्मात् नाडीचक्रमिहोच्यते ।
नाडीचक्रमिदं प्रोक्तं कालचक्रमतः शृणु ॥

Colophon :

इति सुप्रभे योगपादे उमामहेश्वरगणपतिसंवादे नाडीचक्रस्वरूपकथनं नाम पञ्चाशत्पटलः परिसमाप्तः ॥

## 289

Sl. No. 34996 पञ्चदशाङ्गयोगप्रकरणम् Ms. No. B. 236/2a

Beginning :

श्रीमन्तं पूर्वपुण्यैर्गुरुवरमुपलभ्येश्वरस्य प्रसादात्
सर्वं ब्रह्मेतिबोधात् प्रबलविषयसंसक्तमेतच्चिरेण ।
नानादुःखैकहेतुं मुहुरपि करणग्राममायम्य नित्यं
योऽहिंसाद्यैरुपेतो जयति सहजतस्सोऽग्रयोगी यमी स्यात् ॥

End :

वृत्तीनां विस्मृतिर्या प्रकृति विकृतिजाऽशेषमोहास्पदानां
चित्तप्राणाद्यरूपाऽव्ययसुखजननी सर्वतत्वैरुपेता ।
विद्याशक्तिस्वरूपा जयति सुखमयी ब्रह्मविच्छ्रेष्ठलभ्या
सेयं यत्रास्ति पञ्चाधिकदशचरमाङ्गे समाधौ समाप्तम् ॥

Colophon :

— — —

## 290

Sl. No. 34998 पिण्डापदेशः Ms. No. P. 1220/2

Beginning :

अथ पिण्डापदश(?) × × तत्रैव कामकूटपीठं सर्व कामफलप्रदं भवति । द्वितीयं स्वाधिष्ठानचक्रं तन्मध्ये पश्चिमाभिमुखं लिङ्ग प्रवालाङ्कुरसदृशं ध्यायेत् ॥

End :

नवममाकाशचक्रं षोडशदलकमलमूर्ध्वमुखं तन्मध्ये कर्णिकायां त्रिकूट-गुणाकारमूर्ध्वशक्तिं तत्परशून्यां ध्यायेत् । तत्रैव पूर्णगिरिपीठं सर्वेच्छासिद्धिर्भवति ॥

Colophon :

इति नवचक्रप्रकारः ॥

## 291

Sl. No. 35999 **पूर्वाङ्गशतकम्** Ms. No. C. 409/1

Beginning :

प्राणो देहे स्थितो वायुः × नस्य निरोधनात् ।
एकश्वसनमात्रेण उद्धा × × गतिम् ॥
रेचकः पूरकश्चैव कुम्भकः प्रणवात्मकः ।
प्राणायामो भवेत् त्रेधा मात्राद्वादशसंयुतः ॥

End :

अमृतं दधिसङ्काशं गोक्षीरधवलोपमम् ।
ध्यात्वा चन्द्रमसो बिम्बं प्राणायामी सुखी भवेत् ॥
यथेष्टं धारणं वायोः अनलस्य प्रदीपनम् ।
नादा × क्तिरारोग्यं जायते नाडिशोधनात् ॥

Colophon :

इति गोरक्षकृतौ योगशास्त्रे पूर्वाङ्गशतकम् ॥

## 292

Sl. No. 35000 **प्रकाशदीपः** Ms. No. P. 258//14

Beginning :

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
नादबिन्दुकलातीतं तस्मै श्रीगुरवे नमः ॥
जय जय पुराणपुरुषोत्तम जय
जय सच्चिदानन्द परमात्मा ।

End:

आदिपुरुषगुणात्म सर्व भूतीवर्तिंतोसि ॥
आहिणि सिध्यांतां ज्ञान होये त्वरिता ।
ब्रह्मनि मुतों जीवि नवी आताप्रकाशादीपों ॥
नित्यानित्यहरिकीर्तना नित्यानित्यहरिस्मरणा ।
योगशास्त्रपुराणो पढे सदा ॥

Colophon :

इति सुप्रभे योगपादे उमामहेश्वरगणपतिसंवादे नाडीचक्रस्वरूपकथनं नाम पञ्चाशत्पटलः परिसमाप्तः ॥

## 289

Sl. No. 34996 पञ्चदशाङ्गयोगप्रकरणम् Ms. No. B. 236/2a

Beginning :

श्रीमन्तं पूर्वपुण्यैर्गुरुवरमुपलभ्येश्वरस्य प्रसादात्
सर्वं ब्रह्मेतिबोधात् प्रबलविषयसंसक्तमेतच्चिरेण ।
नानादुःखैकहेतुं मुहुरपि करणग्राममायम्य नित्यं
योऽहिंसाद्यैरुपेतो जयति सहजतस्सोऽग्रयोगी यमी स्यात् ॥

End :

वृत्तीनां विस्मृतिर्या प्रकृति विकृतिजाऽशेषमोहास्पदानां
चित्तप्राणाद्यरूपाऽव्ययसुखजननी सर्वतत्त्वैरुपेता ।
विद्याशक्तिस्वरूपा जयति सुखमयी ब्रह्मविच्छ्रेष्ठलभ्या
सेयं यत्रास्ति पञ्चाधिकदशचरमाङ्गे समाधौ समाप्तम् ॥

Colophon :

— — —

## 290

Sl. No. 34998 पिण्डापदेशः Ms. No. P. 1220/2

Beginning :

अथ पिण्डापदश(?) × × तत्रैव कामकूटपीठं सर्वकामफलप्रदं भवति । द्वितीयं स्वाधिष्ठानचक्रं तन्मध्ये पश्चिमाभिमुखं लिङ्ग प्रवालाङ्कुरसदृशं ध्यायेत् ॥

End :

नवममाकाशचक्रं षोडशदलकमलमूर्ध्वमुखं तन्मध्ये कर्णिकायां त्रिकूट-गुणाकारमूर्ध्वशक्तिं तत्परशून्यां ध्यायेत् । तत्रैव पूर्णगिरिपीठं सर्वेच्छासिद्धिर्भवति ॥

Colophon :

इति नवचक्रप्रकारः ॥

## 291

Sl. No. 35999 | पूर्वाङ्गशतकम् | Ms. No. C. 409/1

Beginning :

प्राणो देहे स्थितो वायुः × नस्य निरोधनात् ।
एकश्वसनमात्रेण उद्धा × × गतिम् ॥
रेचकः पूरकश्चैव कुम्भकः प्रणवात्मकः ।
प्राणायामो भवेत् त्रेधा मात्राद्वादशसंयुतः ॥

End :

अमृतं दधिसङ्काशं गोक्षीरधवलोपमम् ।
ध्यात्वा चन्द्रमसो बिम्बं प्राणायामी सुखी भवेत् ॥
यथेष्टं धारणं वायोः अनलस्य प्रदीपनम् ।
नादा × क्तिरारोग्यं जायते नाडिशोधनात् ॥

Colophon :

इति गोरक्षकृतौ योगशास्त्रे पूर्वाङ्गशतकम् ॥

## 292

Sl. No. 35000 | प्रकाशदीपः | Ms. No. P. 258//14

Beginning :

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
नादबिन्दुकलातीतं तस्मै श्रीगुरवे नमः ॥
जय जय पुराणपुरुषोत्तम जय
जय सच्चिदानन्द परमात्मा ।

End:

आदिपुरुषगुणात्म सर्व भूतीवर्तिंतोसि ॥
आहिणि सिध्यांतां ज्ञान होये त्वरिता ।
ब्रह्मनि मुतों जीवि नवी आताप्रकाशादीपों ॥
नित्यानित्यहरिकीर्तना नित्यानित्यहरिस्मरणा ।
योगशास्त्रपुराणो पढे सदा ॥

Colophon :

इति सुप्रभे योगपादे उमामहेश्वरगणपतिसंवादे नाडीचक्रस्वरूपकथनं नाम पञ्चाशत्पटलः परिसमाप्तः ॥

289

Sl. No. 34996 पञ्चदशाङ्गयोगप्रकरणम् Ms. No. B. 236/2a

Beginning :

श्रीमन्तं पूर्वपुण्यैर्गुरुवरमुपलभ्येश्वरस्य प्रसादात्
सर्वं ब्रह्मेतिबोधात् प्रबलविषयसंसक्तमेतच्चिरेण ।
नानादुःखैकहेतुं मुहुरपि करणग्राममायम्य नित्यं
योऽहिंसाद्यैरुपेतो जयति सहजतस्सोऽग्रयोगी यमी स्यात् ॥

End :

वृत्तीनां विस्मृतिर्या प्रकृति विकृतिजाऽशेषमोहास्पदानां
चित्तप्राणाद्यरूपाऽव्ययसुखजननी सर्वतस्वैरुपेता ।
विद्याशक्तिस्वरूपा जयति सुखमयी ब्रह्मविच्छ्रेष्ठलभ्या
सेयं यत्रास्ति पञ्चाधिकदशचरमाङ्गे समाधौ समाप्तम् ॥

Colophon :

— — —

290

Sl. No. 34998 पिण्डापदेशः Ms. No. P. 1220/2

Beginning :

अथ पिण्डापदश(?) × × तत्रैव कामकूटपीठं सर्वं कामफलप्रदं भवति । द्वितीयं स्वाधिष्ठानचक्रं तन्मध्ये पश्चिमाभिमुखं लिङ्ग प्रवालाङ्कुरसदृशं ध्यायेत् ॥

End :

नवममाकाशचक्रं षोडशदलकमलमूर्ध्वमुखं तन्मध्ये कर्णिकायां त्रिकूट-गुणाकारमूर्ध्वशक्तिं तत्परशून्यां ध्यायेत् । तत्रैव पूर्णगिरिपीठं सर्वेच्छा सिद्धिर्भवति ॥

Colophon :

इति नवचक्रप्रकारः ॥

## 291

Sl. No. 35999 **पूर्वाङ्गशतकम्** Ms. No. C. 409/1

Beginning :

प्राणो देहे स्थितो वायुः × नस्य निरोधनात् ।
एकश्वसनमात्रेण उद्धा × × गतिम् ॥
रेचकः पूरकश्चैव कुम्भकः प्रणवात्मकः ।
प्राणायामो भवेत् त्रेधा मात्राद्वादशसंयुतः ॥

End :

अमृतं दधिसङ्काशं गोक्षीरधवलोपमम् ।
ध्यात्वा चन्द्रमसो बिम्बं प्राणायामी सुखी भवेत् ॥
यथेष्टं धारणं वायोः अनलस्य प्रदीपनम् ।
नादा × क्तिरारोग्यं जायते नाडिशोधनात् ॥

Colophon :

इति गोरक्षकृतौ योगशास्त्रे पूर्वाङ्गशतकम् ॥

## 292

Sl. No. 35000 **प्रकाशदीपः** Ms. No. P. 258//14

Beginning :

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
नादबिन्दुकलातीतं तस्मै श्रीगुरवे नमः ॥
जय जय पुराणपुरुषोत्तम जय
जय सच्चिदानन्द परमात्मा ।

End:

आदिपुरुषगुणात्म सर्व भूतीवर्तिंतोसि ॥
आहिणि सिध्यांतां ज्ञान होये त्वरिता ।
ब्रह्मनि मुतों जीवि नवी आताप्रकाशादीपों ॥
नित्यानित्यहरिकीर्तना नित्यानित्यहरिस्मरणा ।
योगशास्त्रपुराणो पढे सदा ॥

Colophon :

इति श्रीप्रकाशदीपे गुरुशिष्यसंवादे तत्पदनिशानं नाम पञ्चमं प्रकरणम् ॥

**293**

Sl. No. 35002 प्रयोगसारः Ms. No. P. 5683

Beginning :

निष्पन्यस्याप्रमेयस्य देवस्य परमात्मनः ।
सन्धानं योगमित्याहुः संसारोच्छित्तिसाधनम् ॥
योगात्समाधिस्सायुज्यं सायुज्याद्व्यिसास्मृता ।
सा हिसंसारसन्तान हापनी मुक्तिरुच्यते ॥

End :

निवृत्यादिषु सन्धीन पञ्चशक्तिषु यादयः ।
तत्परो द्वादशान्तस्थस्तत्रैवं मातृकास्थितिः ॥
शान्त्यतीतेति या प्रोक्ता कलानाम्नामृतद्रवा ।
वि × यस्तद्वता हंसः पिण्डाप्यायनसूत्रगः ॥

Colophon :

इति प्रयोगसारे प्रथमः पटलसङ्ग्रहः सम्पूर्णः ॥

**294**

Sl. No. 35003 प्राणायामविधिः Ms. No. C. 1522/6

Beginning ;

अथ प्राणायामविधिः । अथ शौनकपरिशिष्टे अथ प्राणायामान् व्याख्यास्यामः । यावत्यो रेचको मात्रास्तद्द्विगुणाः पूरके विद्यात् कुम्भके चतुर्गुणमष्टमात्रो रेचकः ॥

End :

एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् ।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥
यस्तु द्वादशसाहस्रं नित्यं प्रणवमभ्यसेत् ।
तस्य द्वादशभिर्मासैः प्ररं ब्रह्म प्रकाशते ॥

Colophon :

इति प्राणायामविधिस्समाप्तः ॥

## 295

Sl. No. 35004 **प्रायणनाडीनिर्णयः** Ms. No. P. 10775/1

**Beginning :**

पिङ्गला सूर्यनाडीति देवयानी दिवा स्मृता ।
उच्छ्वासरूपिणी शुक्ला पुनरावृत्तिवर्जिता ।।
चन्द्रनाडी इडा प्रोक्ता कृष्णा निःश्वासरूपिणी ।
पितृयानीति विख्याता पुनरावृत्तिदायिनी ॥

**End :**

यावद्वायुरिळा नाड्यां चरते तावदेव हि ।
यावत्पिङ्गळनाड्यां तु वायुस्संचरते सदा ।।
उत्तरायणमित्युक्तं तत्र गन्तुः क्रमामृतम् ।
यावद्वायुरिडानाड्यां चरते तावदेव हि ।
दक्षिणायनमित्युक्तं तत्र गन्तुः पुनर्भवः ।।

**Colophon :**

— — —

## 296

Sl. . No 35007 **महाकालयोगशास्त्रम्** Ms. No. B. 4063/4

**Beginning :**

अथ देवि प्रवक्ष्यामि विद्यां खेचरिसंज्ञिताम् ।
यया विज्ञातमात्रेण लोकेऽस्मिन्नजरामराः ॥
मृत्युव्याधिजराग्रस्तं दृष्ट्वा विश्वमिदं प्रिये ।
बुद्धिं दृढतरां कृत्वा खेचरीं च समाचरेत् ॥

**End :**

मासमद्गन्धकं स्वर्णं तालकं रुद्रलोचनम् ।
मधुत्रययुतं वर्षादजरामरणप्रदम् ॥
रसं शाल्मलिनिर्यातं गन्धकं मधुरत्रयम् ।
भक्षयेत्प्रातरुत्थाय षण्मासादजरामरः ॥

**Colophon:**

इति श्रीमदादिनाथप्रोक्ते महाकालयोगशास्त्रे उमामहेश्वरसंवादे खेचरी विद्यायां दिव्यौषधनिरूपणं नाम चतुर्थः पटलः समाप्तः ॥

## 297

**Ms. No. 35008** **मुद्राभेदाः** **Sl. No. P. 9011/16**

**Beginning :**

सुरभिज्ञानचक्राणि अजकूर्मोऽथपङ्कजम् ।
लिङ्ग निर्याणकं चैव अष्टमुद्राः प्रकीर्तिताः ॥
त्रिघण्टां योनिं महायोनिं सुरभिं च तथाऽप्यजाम् ॥

**End :**

लिङ्गमुद्रां महामुद्रां अञ्जलिं च यथाक्रमम् ॥
प्रदर्शयेत्तुरीयायाः अष्टमुद्राः प्रकीर्तिताः ॥
विस्तृतं गुप्तयोनिं च अभयं कूर्ममेव च
तुरीयस्योत्तरो मुद्रा दर्शनीया विचक्षणैः ॥

**Colophon :**

— — —

## 298

**Sl. No. 35010** **योगचूडामणिः** **M. No. C. 4063/1**

**Beginning :**

योगचूडामणिं वक्ष्ये योगीनां हितकाम्यया ।
कैवल्यसिद्धिदं गूढं सेवितं ब्रह्मवित्तमैः ॥
नित्यं शुद्धं बुद्धं निर्विकल्पं निरञ्जनम् ।
निराख्यातं अनाधिनिधनमेकं तुरीयम् ॥
यद्भूतं भविष्यत्परिवर्तमानं सर्वदावच्छिन्नम् ।
परब्रह्म तस्माज्जाता पराशक्तिः ॥

**End :**

य एवं वेद अमुष्मिन् लोके पितृवत्पुत्रो यदादरणीय सदैवाचार्यस्य-शिष्यो भवति यदा वत्सां धेनुं यदा शिशुं कपोतो यदा पोतुं मार्जाली

यदादरणीयेन तथैवाचरेदिति ब्रह्मनिष्ठा पुरोवाचो वदन्तीति य एवं वेद इत्युपनिषत् ॥

Colophon :

इति योगचूडामणिस्समाप्तः ॥

## 299

Sl. No. 35013 **योगतारावलिः** Ms. No: P. 2518/2

Beginning :

वन्दे गुरूणां चरणारविन्दे सन्दर्शितस्वात्मसुखावबोधे ।
जनस्य × माने संसा × हलतापशान्त्यै ॥

लययोगमाह—लययोगो नाम मनोवृत्तेर्लयः । तत् सा × यत् किञ्चित् स × दा शिवोक्तानि × पादलक्षलय वधानानि--

End :

दृष्टिः स्थिरा यस्य विनैव दृश्या
× यस्य विना प्रयासात् ।
मनःस्थिरं यस्य विनावलम्बात्
स एव योगी स गुरुस्स सेव्यः ॥

Colophon :

इति श्री × रावली सम्पूर्णा ॥

## 300

Sl. No. 35015 **योगतारावली** M. No. P. 8666/1

Beginning :

वन्दे गुरूणां चरणारविन्दे
सन्दर्शितस्वात्मसुखावबोधे ।
जनस्य ये जाङ्गलिकायमाने
संसारहालाहलमोहशान्त्यै ॥
सदाशिवोक्तानि सपादलक्ष
लयावधानानि लसन्ति लोके ।
× × लयानाम् ॥

End :

प्रकाशमाने परमात्मभानौ
नश्यत्यविद्यातिमिरे समस्ते ॥

अहो बुधा निर्मलदृष्टयोऽपि
किञ्चिन्नपश्यन्ति जगत्स्वरूपम् ॥

Colophon:

— — —

## 301

**Sl. No. 35016** **योगतारावलीव्याख्या** **Ms. No. B. 378**

**Beginning :**

लक्ष्मीसंश्लिष्टवामाङ्गं मगजातनुजं भजे ।
यत्पदाब्जरजस्पर्शात्प्रत्यूहाब्धिः स्थलायते ॥
मातृकां त्रिपुरां वन्दे प्रणवादिस्वरूपिणीम् ।
प्रेरणीं बुद्धिवृत्तीनां सर्वकामप्रपूरणीम् ॥
+ + + +
श्रीशङ्करकृती राजयोगतारावलिः क्व वा ।
क्व सा प्रकृतिसम्बन्धः पदार्थज्ञानदुर्विधः ॥
रामकृष्णशिवस्फूर्तिरामस्वामिकृती कृतौ
कुरुते राजतरलं तारावल्यर्थदीपकम् ॥

**End :**

श्रीभूभृत्कदलीविहाररसिकः श्रीदक्षिणामूर्तिस-
त्पादाम्भोजयुगे सुराजतरलं श्रीयोगतारावलेः ।
कृत्वा सद्विवृतिं शिवार्पितमनाः श्रीहिङ्गुवंशोद्भवो
रामस्वामिबुधः समर्पयति चिद्ब्रह्म प्रमोदाप्तये ॥

**Colophon :**

इति श्रीपरशिववेङ्कटरामानन्दनाथेन मान्तरत्रयीमन्त्रसाङ्ख्ययोगवेदान्त-मुख्यसर्वतन्त्रस्वतन्त्र श्री परमहंस परिव्राजकाचार्य शिवरामब्रह्मबोधानन्द धनेन्द्रपूज्यपादशिष्येण श्री परशिवैकप्रेष्येण सकलमुनिकुल प्रवरपवित्रशौनक-

Colophon :

गोलावतंसहिङ्वंशपद्माकर प्राभातिकप्रभाकरायमाण नागाम्बिकारमणकोनेश्वर पुत्रेण सकलसङ्ख्यावत्कुलमित्रेण श्रीशङ्कराचार्यपादकिङ्करेण परानन्दनाथा-परनामधेय रामस्वामिपण्डितेन विरचिता राजतरलसमाख्या राजयोगतारा-वलीव्याख्या समाप्ता ॥

## 302

Sl. No. 35017 योगदर्पणम् Ms. No. B. 242/3a

Beginning ;

अखण्डसच्चिदानन्दलक्षणं तमसः परम् ।
निष्कलं निष्क्रियं शान्तं मङ्गलं तत् स्मराम्यहम् ॥
यतः प्रकृतिरुत्पन्ना × ।
तस्यां यत् × प्रतिबिम्बितम् ॥

End :

निदिध्यासनयोगेन जीवन्मुक्तिपदं व्रजन् ।
पश्चात्समाधियोगेन वैदेहीं मुक्तिमाप्नुयात् ॥

Colophon :

— — —

## 303

SI. No: 35020 योगदीपिका Ms. No. P. 258/16

Beginning

यत्पादाम्बुजभक्तानां विजृम्भन्तेऽष्टसिद्धयः ।
तमादिनाथं विबुधैः वन्दितं नौमि शङ्करम् ॥
यत्प्रसादादत्युदेति परमार्थपरा मतिः ।
भजतां भावनाधीनं तं वन्दे पार्वतीपतिम् ॥

**End :**

जीवन्मुक्तिदशा सेयं कार्यसिद्धिदशा तथा ।
सामरस्यपदप्राप्तिरिति निर्वाणपद्धतिः ॥
इति गोरक्षनाथेन भक्तानामनुकम्पया ।
प्रकाशितो योगदीपो नाशयेत् भीतिमान्तरम् ॥

**Colophon :**

इति योगदीपिका समाप्ता ॥

## 304

**Sl. No: 35022** योगदीपिका **Ms. No. P. 4664/1**

**Beginning :**

× योगो हि द्विविधः । सम्प्रज्ञातोऽसम्प्रज्ञातश्चेति । × द्वो
× तिरोधस्तूभयसाधारण इति। नन्वेवं व्युत्थानकालीने यत्किञ्चित् +

**End :**

प्रकृतिपुरुषयोरुभयोरपि कैवल्यं एकाकिता भवतीति शब्दशास्त्रसमाप्तौ ।
वृत्तिदोषोऽयमुद्भाव्य वृत्त्यन्तरतमोपहः ।
यथार्थयोगसूत्रार्थदृष्टयेऽस्तु सतां सदा ॥

**Colophon :**

समाप्ता चेयं योगदीपिका ॥
इति श्रीपरमहंसपरिव्राजकाचार्य शिष्याग्र्यभावागणेशभट्टकृतायां पातञ्जलवृत्तौ कैवल्यपादश्चतुर्थः ॥

## 305

**Sl. No. 35023** योगदीपिका **Ms. No. P. 5101/2**

**Beginning :**

विष्णुं श्रीवल्लभं नत्वा मध्वं च प्राणनायकम् ।
गुरून् त्रिविक्रमार्यांश्च क्रियते योगदीपिका ॥

वि × तैः कर्मभिः पुंसो निषिद्धानि कुर्वतः ।
परमाराधनं भक्त्या योगः कर्मसु कौशलम् ॥

End :

उमादिमारुतान्तेषु समः समगुणोऽपि सन् ।
ध्यातः प्रीतिं यद्धरिर्यायादधिक्को उत्तरोत्तरे ॥
नामादिमारुतान्तेषु देवेष्वेभ्यश्च भेदतः ।
उपासितो हरिः मुक्तिं दद्यान्नास्त्यत्र संशयः ॥

Colophon :

१४६ तमपत्रे—

इति श्रीमन्नारायणपण्डिताचार्यविरचित योगदीपिकायां नवमः पटलः समाप्तः ॥

## 306

Sl. No. 35024 **योगपट्टविधिः** Ms. No: C. 199/2

Beginning :

अधीतविद्यस्सभ्यश्चेद्द्याद्योगपटं गुरुः ।
पादौ मृदा त्रिः प्रक्षाल्य पादुकाभ्यां गृहं व्रजेत् ॥
द्विगुणं कटिसूत्रं च बध्वा वासोऽवगुण्ठ्य च ।
उन्नासनं प्रकल्प्योपविशेत्तत्राज्ञया × ॥

End :

इत्याज्ञां गुरुणा दत्तां गृहीत्वा शिरसा स्वयम् ।
उच्छायवत्ततः सम्यक्कुर्यात्पादग्रहान्वितम् ॥
सदोरकं नमस्कुर्याद्गुरुं श्रेष्ठयतिं तथा ॥

Colophon :

इति योगपट्टविधिः ॥

## 307

Sl. No: 35025 **योगपट्टविधिः** Ms. No. C. 1522/11

Beginning :

अथ योगपट्टविधिः ।
अधीतविद्यस्साधुश्च व्याचारे शिक्षितो यदि ।
योगपट्टं गुरुर्दद्यात् शुभनक्षत्रवासरे ॥

गुरोरभावे वा ज्यायान् अन्यो वा शीलसंयुतः ।
कनीयसा वा गृहिणा शौचपर्यङ्कसंज्ञके ॥

**End :**

पुनः पिङ्गळयापूर्य कुम्भयित्वा ततः शनैः ।
इडया रेचभेदेवं यच्छेत् पर्यायतोऽनिलम् ॥
यामिन्याश्चरमे यामे षडभ्यस्य स्वसंयमात् ।
चिन्तयेद् ब्रह्मरन्ध्रे तु सहस्रारे सिताम्बुजे ॥

**Colophon :**

— — — —

## 308

Sl. No. 38026 — योगप्रशंसा — M. No. P. 5751/2

**Beginning :**

लिङ्गत्रयविशेषज्ञः षडाधारविभेदतः ।
पीठस्थानादिहागत्य महापद्मवनं गतः ॥
आमूलाधारमाब्रह्मरन्ध्रं गत्वा पुनः पुनः ॥
× चन्द्रकुण्डलीशक्ति सामरस्यसुखोदयः ॥

**End;**

सपर्णामाकीर्णां कतिपयगुणैः सादरमिह
श्रयन्त्वन्ये वल्लीं मम तु मतिरेवं विलसति ।
अपर्णैका सेव्या जगति सकले यत्परिसृतः
पुराणोऽपि स्थाणुः फलति किल कैवल्यपदवीम् ॥

**Colophon :**

— — —

## 309

Sl. No. 35027 — योगबीजम् — Ms. No. B. 814

**Beginning :**

नमस्ते आदिनाथाय विश्वनाथाय ते नमः ॥
नमस्ते विश्वरूपाय विश्वकेशाय वै नमः ॥

उत्पत्तिस्थितिसंहारकारिणे क्लेशहारिणे ।
नमस्ते देवदेवेश नमस्ते परमात्मने ॥

End :

दातव्यं शिवभक्तेषु सदाचारपरेषु च ।
योगबीजं महागुह्यं यन्मया प्रकटीकृतम् ॥

श्रीदेव्युवाच—

गतो मे संशयो नाथ कृपया तव शङ्कर ।
नमस्ते योगिराजाय सर्वज्ञाय नमो नमः ॥

Colophon :

इति योगबीजं सम्पूर्णम् ॥

## 310

Sl. No. 35030 **योगयाज्ञवल्क्यम्** Ms. No. B. 522

Beginning :

याज्ञवल्क्यं मुनिश्रेष्ठं सर्ववेदविदं शुभम् ।
सर्वशास्त्रेषु तत्त्वज्ञं योगेषु परिनिष्ठितम् ॥
जितेन्द्रियं जितक्रोधं जिताहारं जितश्रमम् ।
तपस्विनं जितामित्रं ब्रह्मण्यं ब्राह्मणप्रियम् ॥

End :

येन प्रपञ्चं परिपूर्णमेत + नमामि मोक्षप्रदमादिदेवम् ॥
दृष्ट्वा सदा स्वेह दिमूर्ध्नि चैव
यदेकमव्यक्तमनन्तरूपम् ।
प्रपञ्चजन्मादिकमप्रमेयं
तं वामदेवं श्रुतिमूलभूतम् ॥

Colophon :

इति योगयाज्ञवल्क्ये द्वादशोऽध्यायः ॥

## 311

Sl. No. 35034 **योगरहस्यम्** Ms. No. P. 2572/3

Beginning :

अनुत्तररसानन्दकैवल्यायतनं शिवम् ।
नत्वा शिष्येन तत्पादमुवाच च परा शिवा ॥

श्रीदेव्युवाच—

प्रसीद सच्चिदानन्दघनसान्द्रोल्लासविग्रह ।
अद्यैवमपरं तत्वं तत्तत्वं विदितापि च ॥

**End :**

इदं तत्राहं तथा वा सर्वेषामन्तरात्मनि ।
प्रतीयमानमर्थं यत् तदेव शिवनिर्णयम् ॥

**Colophon :**

— — —

## 312

Sl. No. 35037 योगसारः Ms. No. P. 8744

**Beginning ;**

देव्युवाच—

मूलमन्त्रस्य माहात्म्यं श्रोतुमिच्छामि शङ्कर ।
येन विज्ञातमात्रेण खेचरीसमतां व्रजेत् ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ।
गोपनीयं प्रयत्नेन त्वया नित्यं वरानने ॥

**End :**

सिद्धिश्चेन्नोपतिष्ठेत चञ्चलत्वेन चेतसः ।
तथापि ज्ञानतत्त्वोऽसौ मुक्त एव न संशयः ॥

**Colophon:**

इति श्री योगसारे चतुर्थः पटलः । योगसारं समाप्तम् ॥

## 313

Sl. .No 35038 योगसारः Ms. No. C. 2281

**Beginning :**

यस्सृष्ट्वाब्जजविष्णुशङ्करमयं बुध्याख्यसूत्रं मह-
त्त्वं सत्वरजस्तमोमयमहामायाह्वयाद्देहतः ।

अन्तर्यामितयोर्णनाभवदहे × नैव कुर्वञ्जग-
च्चक्रव्यूहमिदं निजांशमशकान्वध्नाति तस्मै नमः ॥
पतञ्जलिव्यासमुख्यान् गुरूनन्यांश्च भक्तितः ।
नतोऽस्मि वाङ्मनःकायैरज्ञानध्वान्तभास्करान् ॥
वार्पिताचलदण्डेन मथित्वा योगसागरम् ।
उद्धृत्यामृतसारोऽत्र ग्रन्थकुम्भे निधीयते ॥

End :

तस्मादावश्यकत्वा × एव तालो नाखण्डो महातालोऽस्ति नाव्याता-
शंतालव्यमहारहेतुरिति सिद्धम् । एवमन्येपि अस्मच्छास्त्रसिद्धान्ताः सांख्यादि
प्रतिषिद्धाः सुबुद्धिभिरुपपादनीया इति दिक् ॥

Colophon :

इति श्री विज्ञानभिक्षुकृते योगसारे कैवल्यादिनिरूपणं चतुर्थोंऽशः ॥

## 314

Sl. No. 35040 योगसिद्धामृतम् Ms. No. P. 5250/1

Beginning :

× ज्ञातं येन निजं रूपं कैवल्यं परमं पदम् ।
असौ दोषैर्विनिर्मुक्तो कामक्रोधभयादिभिः ॥
स्वात्मरूपं यदा ज्ञात्वा सम्पूर्णं तद्वय × ।
कामक्रोधादिदोषाणां स्वरूपान्नास्ति भिन्नता ॥

End :

गोपनीयं प्रयत्नेन क्रूरात् धूर्तात् शठात् खलात् ।
दातव्यं विष्णुभक्ताय सदाचारपराय च ॥
गतो मे संशयो नाथ कृपया तव शङ्कर ।
नमस्ते योगिराजाय सर्वज्ञाय नमो नमः ॥

Colophon :

इति श्री सदाशिवानुगृहीतं योगसिद्धामृतं सम्पूर्णम् ॥

## 315

Ms. No. 35042 **योगसूत्रम्** Sl. No. P. 3615/a

**Beginning :**

अथ योगानुशासनम् ।
योगश्चित्तवृत्तिनिरोधः ।
तदा द्रष्टुः स्वरूपेऽवस्थानम् ।
वृत्तिसाररूप्यमितरत्र ।
वृत्तयः पञ्चतय्यः क्लिष्टा अक्लिष्टाः ।

**End;**

ततः क्लेशकर्मनिवृत्तिः ।
तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्यात् ज्ञेयमल्पम् ।
ततः कृतार्थानां परिणामक्रमसमाप्तिगुणानाम् । +
पुरुषार्थशन्यानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तेरिति ॥

**Colophon:**

— — —

## 316

Sl. No. 35069 **योगसूत्रभाष्यम्** M. No. C. 1831/b

**Beginning :**

यस्त्यक्त्वा रूपमाद्यं प्रभवति जगतोऽनेकधानुग्रहाय
प्रक्षीणक्लेशराशिर्विषमविषधरोऽनेकवक्त्रः स भोगी ।
सर्वज्ञानप्रसूतिर्भुजगपरिकरः प्रीतये यस्य नित्यं
देवो श्रीशः सबोऽव्यात्सितविमलतनुः योगदो योगयुक्तः ॥
+ + अथेत्ययमधिकारार्थः । योगानुशासनं शास्त्रमधिकृतं वेदितव्यम् ॥

**End :**

कार्यकारणात्मनां गुणानां तत्कैवल्यं स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्वानामसम्बन्धात् पुरुषस्य चितिशक्तिरेव केवला । तस्याः सदा तथैवावस्थानं कैवल्यमिति ॥

इह मृदं ऋणमथ क्षणं शिरसि यद्वहन् वक्ति
तद्विवादविषये नृणां भवति साधु निर्णायकम् ।
भुवं सविपिनां सदा शिरसि संवह × दोप्रभः
पवनपायिनाश्वमिति कः पुनस्संशयः ॥

Colophon :

इति श्रीपातञ्जले योगशास्त्रे साङ्ख्यप्रवचने कैवल्यपादश्चतुर्थः ॥

## 317

Sl. No. 35071 योगसूत्रभाष्यम् Ms. No. C. 2004/2

Beginning :

यस्त्यक्त्वा रूपमाद्यं प्रभवति जगतोऽनेकधानुग्रहाय
प्रक्षीणक्लेशराशिः विषमविषधरोऽनेकवक्त्रः स भोगी ।
सर्वज्ञानप्रसूतिः भुजगपरिकरप्रीतये यस्य नित्यं
देवो हीशस्स वोऽव्यात्सितविमलतनुः योगदो योगयुक्तः ॥ १ ॥

End :

कृतभोगापवर्गाणां पुरुषार्थशून्यानां यः प्रतिसंहारः प्रतिप्रसवः कार्यकारणात्मनां तत्तु कैवल्यं स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्वानभिसम्बन्धात्पुरुषस्य चितिशक्तिरेव केवला तस्याः सदा तथैवावस्थानं कैवल्यमिति ॥ ३४ ॥

Colophon :

समाप्तं पातञ्जलं भाष्यम् ॥
मृदं तृणमधःक्षणं ×
× पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥

## 318

Sl. No: 35073 योगसूत्रव्याख्या Ms. No. C. 2635/2

**Beginning :**

गुरुं प्रणम्य सूत्रार्थचन्द्रिका क्रियते मया ।
अनन्तेनेश्वरसीत्यै सच्चिदानन्दरूपिणम् ॥
अथशब्दोऽधिकारवाची योगो नाम समाधनम् ।
अनुशिष्यते व्याख्यायते येन तत् × ॥

**End:**

तदेवं सिध्यन्तरेभ्यो विलक्षणा सर्वासिद्धिमलभूना समाधिसिद्धिः ।
सैव साधनीयेति ॥

सूत्रार्थवृत्तिमालोच्य कृतेयं षट्चन्द्रिका ।
अनन्तेनेश्वरंध्री सैचाचिता शिवपादयोः ॥ (?)

**Colophon :**

इति योगसूत्रव्याख्यायां चतुर्थः पादः समाप्तः ॥

## 319

Sl. No. 35074 योगसूत्रव्याख्या Ms. No. C. 4350/2

**Beginning :**

नानोपाधिषु यो शकाननलवत्संयोज्य मायाबलात्
यात्येको बहुलात्मतामत इयं स्वाभाविकी यस्य नो ।
ताम्रान्ते निजमायया विरचितान्स्वाशानुपाधीनहो
संहृत्य द्वय एव तिष्ठति पुनस्तस्मै परस्मै नमः ॥ +
अथशब्दोत्र उच्चारणमात्रेण मंगलरूपोधिकारवाचकः ।

**End :**

परस्परवियोगे हि प्रकृतिपुरुषयोरपि केवलता एकाकिता भवति ।
इति शब्दःसमाप्तौ ।

[यथैव] वृत्तिदीपोपवृत्यन्तरतमोपहः ।
पदार्थयोग शास्त्रार्थद्यष्टयेस्तु सतो सदा ॥

Colophon :

इति श्री परमहंसपरिव्राजकविज्ञानाचार्य शिष्य श्री × गणेश भट्टकृतायां पातंजलवृत्तौ कैवल्यपादश्चतुर्थः ॥

**320**

Sl· No: 35076 **योगसूत्रवृत्तिः** Ms. No. A. 111

Beginning :

योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य तु वैद्यकेन ।
योऽपाकरोत्तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥
सत्यं ज्ञानमनन्त + ॥
अतः सूत्रेषु गूढार्थद्योतिकां तनुते पराम् ।
वृत्तिं नारायणो भिक्षुः सुगमां हरितुष्टये ॥

End :

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥
तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशानि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥

Colophon:

इति नारायणतीर्थकृतायां योगसिद्धान्तचन्द्रिकायां पातञ्जलयोगसूत्रवृत्तौ गूढार्थद्योतिकायां द्वितीयः साधनपादस्समाप्तः ॥

**321**

SI. No. 35077 **योगसूत्रवृत्तिः** Ms. No. C. 407/1

Beginning :

नमामि जगदुत्पत्तिहेतवे वृषकेतवे ।
क्लेशकर्मविपाकादिरहिताय हिताय च ॥
नत्वा पतञ्जलिमृषिं वेदव्यासेन भाषितम् ।
संक्षिप्तं स्पष्टवत्कृत्वा भाष्यं व्याख्यास्यते मया ॥

अतः सूत्रेषु गूढार्थद्योतिकां तनुते पराम् ।
वृत्तिं नारायणो भिक्षुस्सुगमां हरितुष्टये ॥
\+ योगचन्द्रिकायां +

**End :**

\+ यद्यपि सुखरूपता नास्ति । तथापि दुःखभोगात्यन्ताभावरूपतया पुमर्थत्वे न कोऽपि विवादः तैरपि दुःखनिदाननिवृत्तिरूपतया अविद्यानाशस्यैव वस्तुतः आत्मस्वरूपस्य शास्त्रफलत्वप्रतिपादनादिति संक्षेपः ॥

**Colophon :**

इति श्री परमहंस परिव्राजकाचार्य श्रीरामगोविन्दती × भगवत्पूज्यपाद शिष्य श्रीनारायणतीर्थस्वामि विरचितायां पातञ्जलयोगसूत्रवृत्तौ कैवल्य पादः समाप्तः ॥

## 322

**Sl. No: 35082** योगसूत्रवृत्तिः **Ms. No. P. 514/2**

**Beginning :**

देहार्धयोगः शिवयोः स श्रेयांसि तनोतु वः ।
दुष्प्रपामपि यत्स्मृत्या जनः कैवल्यमश्नुते ॥
त्रिविधान्यपि दुःखानि यदनुस्मरणान्नृणाम् ।
प्रयान्ति सद्यो विलयं तं स्तुमः शिवमव्ययम् ॥

**End :**

सर्वे यस्य यश प्रतापवसतेः पादान्तसेवानति
प्रमृश्य मुकुटेषु मूर्धसु दधात्याज्ञां धरित्रीभृतः ।
यद्वक्त्राब्जमवाप्य गर्वमसमं वाग्देवतापि श्रिता
स श्रीभोजमहीपतिः फणिपतेः सूत्रेषु वृत्तिं व्यधात् ॥

**Colophon :**

इति श्री महाराजाधिराज श्री भोजदेव विरचितायां + + पातञ्जलयोगशास्त्रसूत्रनिवृत्तौ कैवल्यपादः चतुर्थः ॥

## 323

**Sl. No. 35085** **योगसूत्रवृत्तिः** **Ms. No. P. 1800**

**Beginning ;**

× × × पुराणपुरुषं हरिम् ।
प्रकृत्या सीतया जुष्टं योगेशं योगदायकम् ॥
पतञ्जलिं सूत्रकृतं प्रणम्य
व्यासं मुनिं भाष्यकृतं च भक्त्या ।
भाष्यानुगां योगमणिप्रभाख्यां
वृत्तिं विधास्यामि यथामतीड्यम् ॥

इह खलु भगवान् पतञ्जलिः प्रेक्षावत्प्रवृत्यङ्गं शास्त्रप्रतिपत्तिं दर्शयति–अथ योग नुशासनम् ॥

**End ;**

रावणेन स्वाभिमुखे नीयमानयापि सीतया श्रीरामव्रतत्वेन राक्षसाधमप्रतिपत्तिवत् सा परमेति जैगिषव्यः प्रत्याहारादिन्द्रियाणां परवश्यता तावतीत्यर्थः । × × ×इति पादान्तरमारभमाणो धारणां लक्षयति देशबन्धश्चित्तस्य धारणाः । नाभिचक्रे हृदयनासाग्रादौ ॥

**Colophon :**

इति श्री परमहंसपरिव्राजकाचार्य श्रीरामानन्दसरस्वती कृतौ योगसूत्रवृत्ति योगमणिप्रभायां साधनपादो द्वितीयस्समाप्तः ॥

## 324

**Sl. No. 35098** **योगसूत्रवृत्तिः** **Ms No. A. 112b**

**Beginning :**

योगेन चित्तस्य . . . . आनतोऽस्मि ॥ वृत्तिः ॥ अथशब्दः स्वरूपेण मङ्गलं दध्यादित् । अधिकारिद्योतकश्च । योगः अनुशिष्यते विविच्य बोध्यतेऽनेनेति योगानुशासनम् ॥

**End :**

अतः कर्तृत्वं भोक्तृत्वं चात्मनो रूपमिति वदन्ति । तेऽपि नैयायिकवदेव निरसनीया इतीदं शिवम् ॥

**Colophon :**

इति पातञ्जलयोगसूत्रवृत्तौ कैवल्यपादश्चतुर्थः समाप्तः ॥

**325**

Sl. .No 35099 योगसूत्रभाष्यव्याख्या Ms. No. P. 1550/3

Beginning :

प्रथमपादेनैव सोपायावान्तरप्रभेदश्च सकलयोग उक्तः । तत्किं परमवशिष्यते यदर्थं द्वितीयपाद आरभ्यत इत्यत आह । उद्दिष्ट इति । आभ्यासवैराग्ये हि योगोपायौ प्रथमे पादे उक्ते । सचैतद्व्युत्थितचित्तस्य भागित्वेन सम्भवत इति ॥

End :

नेतरेन्द्रियजवदिति यथा यतमानसंज्ञायां एकेन्द्रियजये क्रियान्तरजयाय प्रयत्नान्तरापेक्षेत्यर्थः ॥

क्रियायोगं जगौ क्लेशविपाकात्कर्मणामिह ।
तद्दुःखत्वं च व्यूहानां जगौ योगस्य पञ्चकम् ॥

Colophon:

इति पातञ्जल भाष्यव्याख्यायां पादनिर्देशो नाम द्वितीयः पादः ॥

**326**

Sl. No. 35100 योगशतकम् Ms. No. P. 3746/2

Beginning ;

श्री गुरुं परमानन्दं वन्दे स्वानन्दविग्रहम् ।
यस्य सान्निध्यमात्रेण चिदानन्दायते तनुः ॥
अन्तर्निश्चलितात्मदीपकलिका स्वाधारबन्धादिभिः
यो योगी युगकल्पकालनात्तत्त्वं च जेगीयते ।
ज्ञानामोदमहोदधिः समभवद्यत्रादिनाथः स्वयं
व्यक्ताव्यक्तगुणाधिकं तमनिशं श्रीमीननाथं भजे ॥

End :

इति गोरक्षशतकं योगशास्त्रं च × पठेत् ।
सर्वपापविनिर्मुक्तो योगसिद्धिं लभेद्ध्रुवम् ॥
योगशास्त्रं पठेन्नित्यं किमन्यैः शास्त्रविस्तरैः ।
यत्स्वयं वादिनाथस्य निर्गतं वदनाम्बुजात् ॥

Colophon :

गोरक्षशतकं सम्पूर्णम् ॥

## 327

Sl. No. 35101 **योगशतकम्** M. No. C. 409/2

**Beginning :**

नमस्कृत्य गुरुं भक्त्या गोरक्षो ज्ञानमुतम् ।
अभीष्टं योगिनां ब्रूते परमानन्दकारकम् ॥ ३ ॥
गोरक्षशतकं वक्ति योगिनां हितकाम्यया ।
ध्रुवं यस्याववोधेन जायते परमं पदम् ॥ ४ ॥

**End :**

इति गोरक्षशतकं योगशास्त्रं जनः पठेत् ।
सर्वपापविनिर्मुक्तो योगसिद्धिं लभेद्ध्रुवम् ॥ १७ ॥
योगशास्त्रं पठेन्नित्यं किमन्यैः शास्त्रविस्तरैः ।
यत्स्वयं वाऽधिनाथस्य निर्यातं वदनाम्बुजात् ॥ १८ ॥

**Colophon :**

[फलश्रुतिश्लेकद्वयं नास्ति । अन्यत्सर्वं सम्पूर्णम् ॥]

## 328

Sl. No. 35102 **योगशतकम्** Ms. No: C. 819

**Beginning :**

नमस्कृत्य गुरुं भक्त्या गोरक्षो ज्ञानमुत्तमम् ।
गोरक्षशतकं वक्ति योगिनां हितकाम्यया ॥

**End :**

या बिन्दोश्श्वेतधाराविगलितमनसा तां पिबामो न मद्यं
पञ्चानामिन्द्रियाणां विषयनिरसनं चर्वयामो न मांसम् ।
आलिङ्गामो न कान्तां कृशकुटिलतनुं नाडिकां तां सुषुम्नां
शून्ये चित्तप्रवाहे चक्रम सुखरतिं मैथुनं नैव योनौ ॥

**Colophon :**

इति श्री गोरक्षनाथविरचितायां गोरक्षसंहितायां योगाभ्यासशतकं सम्पूर्णम् ॥

## 329

Sl. No: 35103 **योगक्षशतकव्याख्या** Ms. No. P. 3746/3

**Beginning :**

श्रीशम्भुं श्रीहरिं सूर्यं हेरम्बं जगदीश्वरीम् ।
प्रणम्य शतकव्याख्यां कुर्मो योगतरङ्गिणीम् ॥ १ ॥

तत्र योगस्य प्रकरणमारभमाणो भगवान् गोरक्षो गुरुपादाभिवन्दनात्मकं मङ्गलं शिष्यशिक्षायै निबध्नाति ॥

अर्थाद्विषयप्रयोजने च सूचयति ॥ श्रीगुरुमिति ॥

**End :**

नृणां जनानां भवभयहरं संसारे जननमरणजन्यभीतिहरं मुक्तौ सोपानमिव शीघ्रप्रापकं सकलगुह्येभ्यो अतिगुह्यं गोरक्षेण योगिना प्रकाशितं उत्तरान्वयि पद्यम् ॥ १४ ॥

**Colophon :**

— — —

## 330

Sl. No. 35105 **योगार्णवम्** Ms. No. P. 5466

**Beginning :**

राजयोगः—

वर्गोत्तमगते चन्द्रे जामित्रे चतुरादिभिः ।
ग्रहैर्निरीक्षिते तस्मिन् जातके पृथिवीपतिः ॥
अ × न्यांलग्नः शुक्रः सर्वग्रहनिरीक्षितः ।
करोति पृथिवीपालं निर्जितारातिमण्डलम् ॥

**End :**

स्थिरकाले स्थिता भक्ता सुप्रवाकसुप्रतीक्षिता ।
तस्य शिष्यस्सदा सस्य चक्रं त्रिविधमुत्तमम् ॥
ग्रहात्पुण्यं ग्रहात्पापं ग्रहात्सर्वं शुभाशुभम् ।
शुभग्रहसमायोगे सर्वकर्माणि कारयेत् ॥

**Colophon :**

इति लक्ष्मीनारायणसंवादे विष्णुयामले राजयोगाध्यायः समाप्तः ॥

## 331

Sl. No. 35109 **राजयोगप्रकरणम्** Ms. No. P. 2670/19

Beginning :

पार्वत्युवाच —

कैलासवास सर्वेश दीनरक्षकशंकर ।
योगिनामपि सर्वेषां कथं श्रेष्ठं कथं पदम् ॥
कथं मुक्तिपदं देवाः कथं ज्ञानप्रकाशकम् ।
कथं ज्योतिः कथं नादः कथमानन्ददायकम् ॥

End :

मृता मोहमयी माता जातो बोधमयः सुतः ।
सूतकद्वयसंप्राप्तौ कथं सन्ध्यामुपास्महे ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छंकराचार्य विरचितं राजयोगं सम्पूर्णम् ॥

## 332

Sl. No. 35088 **योगसूत्रवृत्तिः** Ms. No. C. 712/2

Beginning :

वन्दे क्लेशाद्यसंसृष्टं पुराणपुरुषं हरिम् ।
प्रकृत्या सीतयाजुष्टं योगीशं योगदायिनम् ॥
पतञ्जलिं सूत्रकृतं प्रणम्य
व्यासं मुनिं भाष्यकृतं च भक्त्या ।
भाष्यानुगां योगमणिप्रभाख्यां
वृत्तिं विधास्यामि यथामतीड्याम् ॥

End :

यत्प्रसादलवः सूते मोक्षाद्याः सर्वसम्पदः ।
उमाधवं महेशानं तं कालीनिलयं भजे ॥
फणीन्द्रसूत्रसम्बद्धा व्यासवाङ्मणिभूषिता ।
मद्वाङ्मौक्तिकमाला स्यात्सदा श्रीरामपादयोः ॥

काहं प्रमादनिरतः क्व वात्सल्यं गुरोरिदम् ।
नूनं महात्मनां दीने स्वताचित्तं कृपान्वितम् ॥

**Colophon :**

इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीगोविन्द भगवत्पूज्यपाद शिष्य श्रीरामानन्दसरस्वतीकृता साङ्ख्यप्रवचने योगमणिभायां कैवल्यपादश्चतुर्थः समाप्तः ॥

## 333

**Sl. No. 35092** योगसूत्रभाष्यटीका **Ms. No. P. 2736/1**

**Beginning :**

नमामि जगदुत्पत्तिहेतवे वृषकेतवे ।
क्लेशकर्मविपाकादिरहिताय हिताय च ॥
नत्वा पतञ्जलिमृषिं वेदव्यासेन भावितम् ।
इह हि भगवान् पतञ्जलिः प्रारिप्सितस्य × सूत्रं रचयाञ्चकार ॥

**End :**

मुक्तिः प्रतिपादितास्मिन्पादे प्रसङ्गात् अपि चान्यदुक्तम् ॥
निदानं तापानामुदितमथ तापाश्च कथिताः
सहाङ्गैरष्टाभिः विहितमिह योगद्वयमिति ।
कृतो मुक्तेरध्यायो पुरुषभेदः स्फुटतरो,
विविक्तं कैवल्यं परिगलिततापाचितिरसौ ॥

**Colophon :**

इति वाचस्पतिमिश्रविरचितायां पातञ्जलभाष्य व्याख्यायां कैवल्यपादः चतुर्थः ॥

## 334

**Sl. No. 35096** योगसूत्रभाष्यटीका **Ms. No. B. 1101**

**Beginning :**

मैत्रीं द्रवान्तःकरणाच्छरण्यं
कृपाप्रतिष्ठाकृतसौम्यमूर्तिम् ।
तथा प्रशान्तं मुदिताप्रतिष्ठं
तं भाष्यकृद्व्यासमुनिं नमामि ॥

रत्नाकरः प्रवादानां भाष्यं व्यासविनिर्मितम् ।
शिष्याणां सुखबोधार्थं टीकेयं तत्र भास्वती ॥ ६ ॥

End :

तथाचोक्तं पञ्चशिखाचार्येण-धर्मिणामिति ।

धर्मिणां–सत्त्वादिगुणानां मलधर्मिणां परिणामिनित्यानां कूटस्थनित्यैः क्षेत्रज्ञैः पुरुषैः सह अनादिसंयोगाद् धर्ममात्राणां–सर्वेषां मह–

Colophon:

— — —

Extra information :

B. 1101 & B. 1102 द्वयं मिलित्वा एको ग्रन्थः ॥

## 335

SI. No. 35097 | योगसूत्रभाष्यटीका | Ms. No. B. 1102

Beginning :

–दीदीनां द्रष्ट्रा सह संयोगः अनादिरपि संयोगो न नित्यः प्रवाहरूपत्वात् निमित्तजन्यत्वाच्च । +

संयोगेति ॥ स्वरूपस्य असामान्यविशेषस्याभिधित्सया–अभिधानेच्छया । पुरुष इति ॥ पुरुषोपदर्शनात् महत्तत्वानां व्यक्तत्वम् । तथा च पुरुषविषया बुद्धिः ज्ञाताहं भोक्ताहं इत्याकारोत्पद्यते ॥

End :

स्वरूपप्रतिष्ठापि चितिशक्तिर्बुद्धिसम्बन्धात् सद्वैता बुद्धिप्रतिष्ठेव प्रतिभासते + पुरुषस्येति । ॥ ३४ ॥

सुप्रसन्नपदां टीकां भास्वतीं श्रद्धयाऽप्लुतः ।
हरिहरयतिश्चक्रे साङ्ख्यप्रवचनस्य हि ॥

Colophon :

इति वैयासिकपातञ्जलसाङ्ख्यप्रवचनभाष्यस्य टीकायां साङ्ख्ययोगाचार्य श्रीमद्धरिहरानन्दारण्यकृतायां भास्वत्यां चतुर्थः पादः । समाप्तश्चायं ग्रन्थः ॥

ईश्वर उवरच—

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ।
मुनीनां मोक्षसिद्ध्यर्थं मया प्रोक्तं वरानने ॥
राजयोगामृतं नित्यं सद्यो मुक्तिप्रदायकम् ॥

End:

शृङ्गाटके यस्तु मनोनियम्य
त्रिकोणमार्गे शि ×
ब्रह्मान्तरङ्गः प्रणवैकणोमि
रष्टावधानी हठराजयोगी ॥
बन्धत्रयेणाशन बन्धनेन
मन्त्रेण नादश्रवणेन योगी ।
भवेत्तथा कैवल कुन्तकेन
ध्यानेन चित्राष्टविधा विधानि ॥

Colophon:

इति श्रीराजयोगसिद्धान्तरहस्ये वेदान्तसारे सकलयोगरहस्ये गौरीशिव संवादे राजयोगामृते योगसाधनो नाम द्वितीयः पटलः ५ ॥

## 340

Sl. No. 35121 राजयोगभाष्यम् Ms. No. P. 4111/2

Beginning;

एवं हठयोगलक्षणम् । विस्तरेण निशम्य प्राकृतः सद्गुरुमिदमवादीत् ॥ राजयोगं वदक्ष × येतिंस तु विनय सद्वदनं गुरुभक्ताग्रगण्यं शृणु सावधानेनेत्यादरणैवमाह— राजयोगः राज्ञा उपये गस्तथोच्यते । योगानां राज इति राजयोगः ॥

End :

तारकानुसन्धानेन तारकेशार्धबिम्बमध्यमार्गेणार्गलपरिविजृम्भमाणमब्रतेजः कूटपाटवास्फोटन दशदशायमानतेजो भूत्वा तत्समीपगविश्वव्योमव्याप्त परिपूर्णचन्द्रमण्डलनिष्ठ सान्द्रामृतनिष्यन्द बिन्दुसन्दोह पानपरितृप्त सदानन्द रूपनिश्रेयः प्राप्य निस्संशयतत्वाकाशो भूत्वा सदानन्दावधूत कृपावशान्मुक्तोन्मति भावितव्यः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचिते विजृम्भितयोगशास्त्रकृते पञ्चमप्रकरणं समाप्तम् ॥

**341**

Sl. No: 35122 **योगसूत्रभाष्यम्** M. No. P. 8745/2

Beginning :

अर्धोद्घाटितलोचनस्थिरमनोनासाग्रदत्तेक्षणा
चन्द्रार्कावपि लीनतामुपनये निष्पन्दभावान्तरे ।
ज्योतीरूपमशेषबाह्यरहितं देदीप्यमानं परं
तत्त्वं तत्पदमस्ति वस्तुमपरं वाक्यं किमत्राधिकम् ॥
भ्रुवोर्मध्ये शिवस्थानं मनस्तत्र विलीयते ।
ज्ञातव्यं तत्पदं तूर्यं तत्र कालो न विद्यते ॥

End :

वायुमिडापिङ्गलसञ्चारकेवलमुक्तक्रमेण सुषुम्नबिलं + श्रेयः प्राप्य निस्संशयत्वा कारो भूत्वा सदानन्दावधूत कृपालेशामुक्तोस्मीति भावितव्यः ॥

Colophon :

इति श्रीमच्छङ्कराचार्यविरचिते योगसूत्रभाष्यं सम्पूर्णम् ॥

**342**

Sl. No. 35729 **योगसूत्रभाष्यप्रदीपिका** Ms. No: C. 425[5]

Beginning :

श्रीकृष्णं परमानन्दमात्मानं सद्गुरुं स्मरन् ।
विघ्नेशममृतेशं च नत्वा नुत्वा समारभे ॥ २ ॥
अथातो राजयोगोक्तसूत्रभाष्यप्रदीपिका ।
भण्यते बालकृष्णेन मुनिना मुक्तिसिद्धये ॥ २ ॥

End :

मुक्तोऽस्मीति सदा स्वस्मिन् भावितव्यः स्वयं पुमान् ।
इतीयं राजयोगस्य दीप्यतां मे प्रदीपिका । ॥ ७२ ॥

इयं परमहंसेन बालकृष्णेन मौनिना ।
लिखिता राजयोगस्य सूत्रभष्यप्रदीपिका ॥

Colophon :

इति श्रीमत्परमहंस बालकृष्णब्रह्मानन्दप्रणीत राजयोगप्रदीपिकायामष्टमा श्वासः ॥

इति राजयोगप्रदीपिका समाप्ता ॥
शालिवाहशके बाणाक्ष्यश्विचन्द्रसमन्विते । (?)
रुधिरोद्गारिसंवत्सरज्यैष्ठ्यां जाता प्रदीपिका ॥

343

Sl. No: 35132 शिवयोगचिन्तारत्नसंग्रहः Ms. No. P. 5682/1

Beginning :

वैराग्यभक्तिसुज्ञानैः केवलैरात्ममूर्तये ।
इत्याचार्यं नमस्कृत्य सर्वानुग्रहकारणम् ॥
सर्वागमौ दधौ तेन गुरुणो संग्रयोगिनाम् ।
धारणार्थं योगचिन्तारत्नसंग्रह उच्यते ॥

End:

देयं शान्ताय दान्ताय शिवभक्तिरताय च ।
शिववन्मन्यते यस्तु आचार्यं तत्त्वपारगम् ॥
शिवाद्गुरुतरा भक्तिर्यस्य नित्यं गुरोस्सदा ।
तस्य देयमिदं ज्ञानमन्यथा न कदाचन ॥

Colophon :

इति वेदशिरशिवागमप्रकरणप्रवीणेन श्री वृषभयोगीन्द्रगुरुणा प्रणीतः शिवयोगचिन्तारत्नसंग्रहः समाप्तः ॥

344

Sl. No. 35133 शिवयोगदर्पणः Ms. No. P. 8743

Beginning :

देवदेव महादेव करुणाकर रक्षक ।
शिवयोगिहृदम्भोजचिदादित्यस्वरूपक ॥

शिवज्ञानामृतोदन्वत्प्रवर्द्धुं सकलांनित्रे ।
जगद्गुरो धर्मरूप नित्यमुक्तिप्रदायक ॥

**End :**

तुर्यातीतस्थले ज्ञेयो पराशक्ति सुबोधया ।
निवृत्तिपथिनां प्रोक्तं पञ्चशक्तिस्वरूपकम् ॥

**Colophon:**

शिवयोगदर्पणं सताप्तम् ॥

## 345

**Sl. .No 35134** **शिवयोगप्रदीपिका** **Ms. No. P. 4106/1**

**Beginning :**

परमयोगिमनोम्बुजषट्पदं
त्रिविधकारणकारणमव्ययम् ।
सगुणनिर्गुणतत्त्वमनामयं
गुरुसदाशिवलिङ्गमहं भजे ॥
श्रीमद्गुरुप्रसादेन योगं ज्ञात्वा शिवात्मकम् ।
वक्ष्यामि सम्प्रबोधाय शिवयोगप्रदीपिकाम् ॥
शिवतत्त्वविदां श्रेष्ठ वक्ष्यामि शृणु तेऽधुना ।
शिवयोगमिदं गुह्यं अपि त्वद्भक्तिगौरवात् ॥

**End:**

परमे × काशशब्द बोधविविन्दोभिरेतत्पदं
हिरिनागाम्बकसाम्बयो × ×
× × श्चैव सोर्धकैः ॥

**Colophon:**

इति श्रीसदाशिवेन्द्रयतीन्द्रकृता शिवयोगदीपिका समाप्ता ॥

**346**

Sl. No: 35134 शिवयोगप्रदीपिका Ms. No. A. 363/a

**Beginning :**

परमयोगिमनोऽम्बुजषट्पदं
त्रिविधकारणकारणमव्ययम् ।
सगुणनिर्गुणतत्त्वमनामयं
गुरुसदाशिवलिङ्गमहं भजे ॥
श्रीमद्गुरुप्रसादेन योगं ज्ञात्वा शिवात्मकम् ।
वक्ष्यामि सुप्रबोधाय शिवयोगप्रदीपिकाम् ॥

**End :**

अभ्यासशूराय जितेन्द्रियाय
गुरौ शिवे भक्तिसुनिश्चलाय ।
देयं रहस्यं शिवयोगशास्त्रं
यो मूढदाता गुरुपातकी स्यात् ॥
शिवागमरहस्यार्थसिद्धसिद्धान्तपद्धतिम् ।
संक्षेपतः कृताऽलोड्य शिवयोगप्रदीपिका ॥

**Colophon :**

— — —

**347**

Sl. No. 35137 शिवयोगप्रदीपिका Ms. No. P. 8903/1

**Beginning :**

वन्दे शिवं शिवानन्यां शक्तिं वागीश्वरीं तथा ।
तत्तदुद्बोधने चोक्तमाचार्योत्तममन्वहम् ॥
विद्यादाननिधिं विवेकलतिकाधारैककल्पद्रुमं
वित्ताशेषविशेषदोषविबुधैः संसेव्यमानं सदा ।
वीरेशासनजाततान्त्रिकफलाधिक्षैकदक्षं शिव-
ज्ञानोन्मीलनकारिचेन्नबसवेशाख्यं गुरुं सत्क्रिये ॥

End :

पुरा बाणाविजसायकावधसमुद्रर्तुकरे इ तथा ।
निधिबाणावितिपिञ्चदापटविकास्त्वेवं शिवाकं मया ॥

Colophon :

— — —

348

Sl. No. 35138 शिवयोगप्रदीपिकाटीका Ms. No. P. 8903/2

Beginning :

योगीश्वरप्रार्थितेन बसवाराध्यधीमता
स्वस्तिका क्रियतेस्वीका शिवयोगप्रदीपिका ॥
आगमाम्नायसंमत्या रहस्यार्थप्रकाशिका ।
श्रुतमात्रादियं ब्रह्मसाक्षात्कारविधायिनी ॥
ಮುಮುಕ್ಷುಗಳ ಹೃದಯಗುಹಾಂತರಾಳವಂ ಬೆಳಗಲೆಂದು ಶಿವಯೋಗಪ್ರದೀಪಿಕೆಯೆಂಬ ಯೋಗಶಾಸ್ತ್ರವಂ ಮಾಡಲುದ್ಯುಕ್ತನಾಗಿ ನಂ ಗುರೋರದಿಕಮಿತ್ಯಾದಾಪ್ತವಚನಪ್ರಾಬದ್ಧನಾದ—

End :

ಅಂಬಕವೆನಳೆರಡು ಅಂತು ೨೮೭ ಎಂಬ ಸಂಖ್ಯೆವಲೆಕ್ಕದಿಂದವೆ ಏತತ್ ಈ ಶಿವಯೋಗಪ್ರದೀಪಿಕೆಯೆಂಬ ಶಾಸ್ತ್ರವು ಕೃತಂ ಮಾಡಲ್ಪಟ್ಟಿತ್ತು. ಶ್ರವಣಂ ನಾದಂ श्रवणं दर्शनवलोकनं तारस्य × श्रीबसवाराध्यदेवविरचितायां शिवयोग प्रदीपिकाटीकायाममनस्कपटलः पञ्चमः ॥

Colophon :

टीका सहं लयं (?) शिवयोगि विरचितं शिवयोगप्रदीपिकाशास्त्रं सम्पूर्णमगमत् ॥

349

Sl. No. 35139 शिवयोगप्रदीपिकाटीका Ms. No. P. 363/b

Beginning :

विद्यादाननिधिं विवेकतिलकाधारैक कल्पद्रुमं
वीताशेषविशेषदोषविबुधैः संसेव्यमानं सदा ।

विश्वेशाननजाततान्त्रिककलादीक्षैकदक्षं शिव-
ज्ञानोन्मीलनकारिचेन्नबसवेशाख्यं गुरुं संश्रये ॥
ಶ್ರೀಮತ್ತತ್ವವನಿಜಮೋಕ್ಷೈಕಸಾದನಂಗಳಾದ ಶಿವಾಗಮಂಗಳಲ್ಲಿ ಯಾನಜ್ಞಾ
ಕ್ರಿಯಾ—

**End :**

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
ಎಂಬ ಶ್ರುತಿಯು ಪ್ರಮಾಣದಿಂದಲೂ ಯೋಗ್ಯನಾದಾತಂಗೆ ಕೊಡಲುಚಿತ
ವೆಂಬುದಭಿಪ್ರಾಯು ॥
ಈ ಪ್ರಕಾರವಾದ ಸದಾಶಿವಯೋಗೀಶ್ವರ ಚತುರ್ವಿಧಯೋಗಸ್ವರೂಪವಂ
+ ಏತತ್ ಈ ಶಿವಯೋಗ ಶಾಸ್ತ್ರವು ಕೃತಂ ಮಾಡಲ್ಪಟ್ಟಿತ್ತು.
ಶ್ರವಣಾ ನಾದ ಶ್ರವಣಂ + ಟೀಕಾಯಾವಂ ॥

**Colophon :**

इति श्रीमद्वेदवेदाङ्गागमपुराणस्मृतीतिहासप्रतिपादितश्रीमद्वीरशैबमार्गप्रतिष्ठापनाचार्य श्रीबसवाराध्यदेशिकविरचितायां शिवयोगप्रदीपिकायां अमनस्कपटलः पञ्चमः × चेन्नसदाशिवयोगिविरचितं शिवयोगप्रदीपिकाशास्त्रं सम्पूर्णम् ॥

## 350

**Sl. No. 35140** शिवयोगप्रदीपिकासारः **M. No. C-821**

**Beginning :**

स्वाचार्यं पञ्चधा ख्यातं शिवयोगपरायणम् ।
चतुर्विधाभ्यासयोगशीलिनं ज्ञानशीलिनम् ॥
पूर्वापरपरारूढं श्रीसदाशिवयोगिनम् ।
प्रणम्य सहजानन्दयोगी निर्वाणमार्गगः ॥

**End :**

निर्मोहयौवनापूर्णो निर्विकारो महाकृपः ।
अतिमात्रतरः सत्त्वो महात्मा स प्रकीर्तितः ॥
तरन्ति ते महाम्भोधिं तारयन्ति महामतीन् ॥

Colophon :

[इति श्रीगुरुसदाशिवयोगिनाथविरचिते योगशास्त्रे शिवयोगप्रदीपिकासा गुरुशिष्यसंवादे प्रत्यक्चैतन्यगतिनिरूपणं नाम तृतीयः पटलः] ॥

## 351

Sl. No. 35142 षट्कर्मसङ्ग्रहः Ms. No. P. 5230/1

Beginning :

अथ घटशोषणलक्षणम् ।
धौती वस्ती तथा नेती त्रारकं नौलिकं तथा ।
कापालभाति चैतानि षट्कर्माणि प्रवक्ष्यते ॥
पूर्वषट्कमिदं गोप्यं घटशोधनकारकम् ।
विचित्रगुणसंधानं पूज्यते मुनिपुङ्गवैः ॥

End :

कपालभाती विख्याता कफामय विशोषणी ॥
अथकपालभाती कर्म ।
अस्तेवलोक्ककारस्थ व्यर्थ सव्यापसव्ययोः ।
कपालभाती विख्याता कफामयविशोषणी ॥

Colophon :

— — —

## 352

Sl. No. 35143 समाधिप्रकरणम् Ms. No. P. 4694/2

Beginning :

शङ्करं किङ्करं वाचं मूकं × नं गुरुं गजम् ।
अहं भाव × रित्युक्तो मशकं मां नमाम्यहम् ॥
ओंनमो ब्रह्मादिभ्यो गुरुभ्यः । सर्वोपप्लवोंऽहमस्मि । अथ समाधय उच्यन्ते । तत्रादौ नित्यसमाधिः ।

**End :**

अन्यदेहाभिमानिनो जीवस्य जनकादिभिरपि कृतानि राधिताखानि प्रारब्धस्यातिरिक्तानि कर्माणि क्षीयन्ते । भस्मभावं प्राप्नुवन्ति । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेति भगवद्वचनात् ततः कृतकृत्यो भवति । ओंतत्सत् ॥

**Colophon :**

इति श्री विवरणयतिना विरचितं समाधिप्रकरणं सम्पूर्णम् ॥

## 353

**Sl. No. 35145** समाधिलक्षणम् **Ms. No. P. 7982/61**

**Beginning :**

योनिस्थानकमंघ्रिमूलघटितं कृत्वा दृढं विन्यसेत्
मेढ्रे पादमथैकनेकहृदयं धृत्वा समं विग्रहम् ।
स्थाणुः संयमितेन्द्रियोचलदशा पश्यन् भवोऽनन्तरं
चेतन्मोक्षकवाटभेदजनकं सिद्धासनं प्रोच्यते ॥

**End :**

आत्मानं हृदयं ध्यात्वा योगी मुक्तिमवाप्नुयात् ।
गुदं × थ नाभिं च हृदयं च तदूर्ध्वतः ॥
घटिकालम्बिकास्थानं भ्रमध्ये च नभोबिलम् ।
कथितानि इयत्तानि ध्यानस्थानानि योगिनाम् ॥

**Colophon :**

हठप्रदीपिकायां समाधिलक्षणं सम्पूर्णम् ॥

## 354

**Sl. No. 35147** समाधिसरणिः **Ms. No. B. 628**

**Beginning :**

शक्त्या स्वाभाविकया वसुधा भूत्वा विभासमानोऽपि ।
अस्त्यद्वितीयभावो यस्तं प्रणमामि परमात्मानम् ॥
कपिलपतञ्जलि कृष्णद्वैपायन मुख्यमुनिवरान् नत्वा ।
तत्तद्वचोनुरोधात् समाधिसरणिः समीर्यते सूक्ष्मम् ॥

End :

इति भागवतः कृष्णः स्वाज्ञानोच्छित्तये चकारेमम् ।
ग्रन्थं समाधिसरणिं कारयिता स प्रसीदतु नृसिंहः ॥ २१ ॥

Colophon :

इति समाधिसरणिः समाप्ता ॥

### 355

Sl. No. 35149 सिद्धसिद्धान्तपद्धतिः Ms. No. B. 271/1

Beginning :

ओं नमोब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः ।
आदिनाथं नमस्कृत्वा शक्तियुक्तं जगद्गुरुम् ।
वक्ष्ये गोरक्षनाथोऽहं सिद्धसिद्धान्तपद्धतिम् ॥
नास्ति सत्यविचारेऽस्मिन् तूत्पत्तिश्चाण्डपिण्डयोः ।
तथापि लोकवृद्ध्यर्थं वक्ष्ये सत्संप्रदायतः ॥

End :

सम्प्रदायप्रवृत्तिर्हि सर्वेषां सम्मता यतः ।
मया शङ्कर नाथोऽसि सिद्धसिद्धान्तपद्धतिम् ॥
लिखित्वा यः पठेद्भक्त्या स याति परमां गतिम् ।
विदधात्वर्धनिलयं भक्तानुग्रहमूर्तिमान् ॥
स्मरानन्दमयं चेतो गाणापत्याभिधं महः ॥

Colophon :

इति सिद्धसिद्धान्तपद्धतौ षष्ठोपदेशः ॥

### 356

Ms. No. 35151 सिद्धसिद्धान्तपद्धतिः Sl. No. B. 895/3

Beginning :

आदिनाथं नमस्कृत्वा शक्तियुक्तं जगद्गुरुम् ।
वक्ष्ये गोरक्षनाथोऽहं सिद्धसिद्धान्तपद्धतिम् ॥

नास्ति सत्यविचारेऽस्मिन् तूत्पत्तिश्चाण्डपिण्डयोः ।
तथापि लोकवृद्ध्यर्थं वक्ष्ये सत्सम्प्रदायतः ॥

End :

लिखित्वा यः पठेन्नित्यं भक्त्या स यति परमां गतिम् ।
स विदधात्वर्थनिलयं भक्तानुग्रहमूर्तिमान् ॥
स्मरानन्दभरं चेतः गणपत्यमिधं महः ॥

Colophon :

इति श्री गोरक्षनाथकृतौ सिद्धसिद्धान्तपद्धतौ अवधूतयोगिलक्षणं नाम षष्ठोपदेशः ॥

## 357

Sl. No. 35154 सिद्धिदर्शनम् Ms. No. P. 10089/5

Beginning ;

भागवते एकादशस्कन्धे—

सिद्धयोऽष्टादश प्रोक्ता धारणायोगपारगैः ।
तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ॥
अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिन्द्रियैः ।
प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ॥ +
गुणेष्वसङ्गो वशिता यत्कामस्तदवस्यति ।
एता मे सिद्धयस्सौम्य अष्टावौत्पातिका मताः ॥

End :

अन्तरायान् वदन्त्येतान् युञ्जतो योगमुत्तमम् ।
आरोप्य ब्रह्मरन्ध्रेण ब्रह्मनीतोत्सृजेत्तनुम् ॥
जन्मौषधितपोमन्त्रैः यावतीरिह सिद्धयः ।
योगेनाप्नोति ताः सर्वा नान्यैर्योगगति व्रजेत् ॥

Colophon :

श्रीमद्भागवते एकादशस्कन्धे पञ्चदशोऽध्यायः ॥

## 358

Sl. No: 35171 हठयोगप्रदीपिका M. No. C. 4690/1

Beginning :

प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण योगिना ।
केवलं राजयोगाय हठयोगः प्रकाश्यते ॥
भ्रान्त्या बहुमतध्वान्ते राजयोगमजानताम् ।
हठप्रदीपिकां धत्ते स्वात्मारामःकृपाकरः ॥

End :

फणीन्द्रसूत्रसंबद्धा व्यासवाङ्मणिभूषिता ।
मद्वाङ्मौक्तिकमाला स्यात्सदा श्रीरामपादयोः ॥
क्वाहं प्रमादनिरतः क्व वात्सल्यं गुरोरिदम् ।
नूनं महात्मनां दीने स्वतश्चित्तं कृपान्वितम् ॥

Colophon :

इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीगोविन्दानन्दभगवत्पूज्यपादशिष्य श्रीरामानन्दसरस्वतीकृतौ सांख्यप्रवचने योगमणिप्रभायां कैवल्यपादश्चतुर्थस्समाप्तः ॥

## 359

Sl. No. 35173 हठयोगलक्षणम् Ms. No: P. 5682/

Beginning :

जलन्धरोड्डीयण मूलबन्धान्
जल्पन्ति कण्ठोदरपायुनेयान् ।
बन्धत्रयेऽस्मिन् परिचीयमाने
बन्धः कुतो दारुणकालपाशात् ॥

End :

निरङ्कुशानां श्वसनोद्गमानां
निरोधनैः केवलकुम्भकाख्यैः ।
उदेति सर्वेन्द्रियवृत्तिशून्यो
मरुल्लयः कोऽपि महायतीनाम् ॥

Colophon :

इति हठयोगः ॥

## 360

**Sl. No: 35174** **हठसङ्केतचन्द्रिका** **Ms. No. B. 282**

**Beginning :**

ज्ञानं कुतो मनसि जीवति दुर्विकल्पे
प्राणोऽपि जीवति मनो म्रियते न यावत् ।
प्राणो मनोलयमिदं न विलीयतेऽ च
मोक्षं न गच्छति नरोऽत्र कथञ्चिदेव ॥
चिरस्य तु द्वय शालिनो यस्य
प्रणो विलोलोऽतिदृढा कुवासना ।
तयोर्विनाशे परिनश्यतोद्वा-
वेकत्र तोसिद्धिरनुत्तमा भवेत् ॥

**End:**

तस्मात्प्रवर्तते योगी हठे सद्गुरुमार्गतः ।
यामज्ञानतवैरायम्मृते स्थैर्यं न चेतसः ॥ १५ ॥
बोधेन प्राणरोधेन वैराग्येण चितं मनः ।
अखण्डराजयोगे स्यात् स्थिरं निर्वातदीपवत् ॥ २६ ॥

**Colophon :**

इति गोविन्ददेवसुत सुन्दरदेवविरचितायां हठसङ्केतचन्द्रिकायां गुणासावन (!) निरुपणं नामोपदेशः ॥

इति षट्चक्रकषनं नामैकादशपरिच्छेदः ।

इति सुन्दरदेव विरचिते योगहृदये राजयोगविवेचने द्वादशः परिच्छेदः समाप्तः ॥

# पूर्वमीमांसा

361

Sl. .No 35175 अङ्गत्वनिरुक्तिः Ms. No. P. 4062

Beginning :

नमामि कुलजां स्वीयकुलजाद्याधिदेवताम् ।
स्वस्वाभीष्टफलप्राप्त्यै ब्रह्मादिभिरभिष्टुताम् ।।
कुमारिसंसेवनलब्धबुद्धिः
कुमारिलप्रोक्तमतानुसारी ।
मुरारिरङ्गत्वनिरुक्तिमेतां
करोति सद्युक्तिगणैरुपेताम् ।।
तत्र अङ्गत्वं न जातिः ।।

End :

प्राकरणिकत्वव्यवहारस्तु सन्निधिपाठनिबन्धनः । अतः प्राकृतत्वादि तावरुद्धेपि यूप ओदुम्बरतानिदेशसंभविताश्रयित्वं सम्भवत्येवेत्यसदुक्तरीत्यै वाश्रयत्वखण्डनमित्यलमनया प्रासङ्गिकचिन्तया ।।

Colophon :

— — — —

## 362

Ms. No. 35178 आध्वरमीमांसाकुतूहलवृत्तिः Sl. No. P. 3025

Beginning :

हेतुहेतुमद्भावसङ्गत्या शे × शेषभावविचारानन्तर × अथातः कृत्यर्थपुरुषार्थयोर्जिज्ञासा × त्यानन्तर्ये । अत इति हेतौ । पुरुषार्थेति प्रयोजकत्वं प्रवर्तकत्वानुष्ठापकत्वपर्यायं × र्तकीभूतेष्टसाध्यताज्ञान मुखेन प्रवृत्त × तु अस्य लोकसिद्धत्वात् कृत्यर्थेति चाप्रयोजकत्वं लक्ष्यते ॥

End :

× स्यैव सम्भवतिः न तु वि × तिसोमस × घिराष वावप्रथमो यज्ञो यज्ञा × मो नरकालत्वे × यानन्तं चर्यस्य प्रकृति सोमेन व्यवहारसात् × पूर्वस्वपक्षे × आदानानन्तरमेव ज्योतिष्टोमस्य दर्शपूर्णमासा —

Colophon :

× श्रीमत्सन्ततसन्त × श्येन कर्मषोडशाररथचक्राकाराद्यनेकश × श्रीशाहजि × शरभजितुकेकाजिभोस × चोळमहीमहेन्द्र मात्यधुरन्धरस्य श्री × ल्य एव तद्य × लापरिमित × मह × पृष्ठाप्तोर्यमवाजपेय × × हादेव × वाजपे × × सुतेनान्नपूर्णागर्भजातेन अपरपदवाक्यप्रमाणय × × याजितोल × वैशयेन वासुदेवदीक्षितविदुषा विरचितायां × र्थपादाः ॥

## 363

Sl. No. 35183 अमृतकला M. No. C. 1583/1

Beginning :

स्वाध्यायविधिवाक्यार्थविचारे प्रयतामहे ।
प्राभाकरगुरोर्दृष्ट्या मीमांसारम्भसिद्धये ॥

अत्र केचिदाचक्षते न मीमांसाशास्त्रमारम्भणीयमिति तद्धि—वेदवाक्यार्थविचारोपायभूतन्यायनिबन्धनम् ॥

End :

अभावव्यवहारमुद्दिश्याद्दष्टिविमर्शतः ।
सा हि भूभागसद्भावमात्रावच्छेदबन्धना ॥
मीमांसोज्वलराशेषनयरत्ननिकषनिजधाम्नः ।
इति शालिकनाथाह्वयापमृतस्य कालमुदाहरद्धीरः ॥ (?)
न वावयविनमवयवानुभवमन्तरेण केचिदुपलभन्ते– अव्यतिरिच्यमान
× नास्त्येवेति वचनभङ्गिमात्रेणोक्तं भवति ॥

Colophon :

— — — —

## 364

Sl. No. 35189 उपक्रमपराक्रमः Ms. No. P. 123

Beginning ;

यस्याहुरागमविदः परिपूर्णशाक्ते-
रंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय
नारायणीसहचराय नमश्शिवाय ॥
उपक्रमस्य बलवत्वमूचिरे
ययोपसंहारविरोधिनो बुधाः ।
प्रतिष्ठितां तामिह तर्कसन्ततिं
प्रबोधयामः प्रतिकूलजल्पितान् ॥
मीमांसकास्तावदुपक्रमोपसंहारयोः विरोधे सत्युपक्रमस्य प्राबल्ये न्यायमेवाहुः ॥

End:

एवञ्च सकलमीमांसकव्यवहारविरुद्धो नयसरणिगन्धानभिज्ञैरर्वाचीनैः
स्वमतस्येत × प्राबल्यदौर्बल्यव्यत्ययो यवनगुरूपदिष्टपादमुख
क्षालनपौर्वापर्य्यव्यत्ययवदुपेक्षणीयः प्रामाणिकैरिति सिद्धम् ॥
विद्वद्गुरोर्महितविश्वजिदध्वरस्य मौलिः
अस्त्यप्पदीक्षित इति प्रथितस्तनूजः ।

अकरोदयमक्लिष्टं आत्मबुद्धिविशुद्धये ।
उपसंहृत्य दुर्न्यायमुपक्रमपराक्रमम् ॥

**Colophon :**

इत्युपक्रमपराक्रमः समाप्तः ॥

## 365

**Sl. No. 35197** **उपक्रमपराक्रमः** **Ms. No. C. 1154**

**Beginning :**

उपक्रमस्य प्रबलत्वमूचिरे
यथोपसंहारविरोधिनो बुधाः ।
प्रतिष्ठितां तामिह तर्कसन्ततिं
प्रबोधयामः प्रतिकूलजल्पितान् ॥

मीमांसकास्तावदुपक्रमोपसंहारयोर्विरोधे सत्युपक्रमस्य याव × न्याय्यमेवमाहुः । सर्वस्यापि शब्दस्य स्वार्थालंघने विरोधः कारणी × ॥

**End :**

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्री सर्वतोमुखमखव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
स्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥
अकरोदयमक्लिष्टामात्मबुद्धिविशुद्धये ।
उपसंहृतदुर्न्यायमुपक्रमपराक्रमम् ॥

**Colophon :**

इति श्रीमद्भारद्वाजकुलधिकौस्तुभ श्रीमदद्वैतविद्याचार्य श्रीरंगराजाध्वरिवर सूनोरप्पयदीक्षितस्य कृतिरुपक्रमपराक्रमः: सम्पूर्णः ॥

## 366

**Sl. .No 35198** **उपक्रमप्राबल्यम्** **Ms. No. P. 901/2**

**Beginning :**

ओम् ॥ × नत्वपरत्वाभ्यां बलवत्युपसंहृतिः ।
नोपक्रमोऽन्यथापात प्रत्ययो बलवान् ॥
उच्चैष्ट्वादिर्मन्त्रधर्मः × द्द्वेति प्रमाणतः ॥

End :

अश्व × र्गग्रहेष्ट्यादिविरोधो स्थित एव च ।
ततो बहुनयाकोप: मृत्युमान् यतिमूर्धनि ॥
उपसंहारबलितावनितासक्तचेतसः ॥

Colophon :

— — —

## 367

Sl. No. 35199 **उपसंहारविजयः** Ms. No. P. 363/b

Beginning :

अत्र स्वार्थे शब्द् × नामप्युपक्रमादीनां समन्वय × उप-क्रमोपसंहाराव × सो: × र्थवादोपप × लिङ्गतात्पर्य निर्णय इति नाप्येतत्ततात्पर्यलिङ्गत्वमु × अनुव्याख्यादि च उपक्रमा दिलिङ्गानां—

End :

अपच्छेदनयेन × निर्गुणवाक्यानां चरमत्वा × क्तितेवेदोवति तयात्प्राथम्यात् । सगुणवाक्यानां प्राबल्यमित्यसदीया × तामुक्तिस्तु × रीत्याश्रयणेन तव सगुणनिर्गुणशास्त्रयोरुपक्रमोपसंहारत्वाभावेनोपसंहारप्राबल्य × ।विषयत्वाभिप्रायेण वा ज्ञेया । मीमांसकोपसंहारादुपक्रमप्राबल्य भंगः ॥

Colophon :

— — —

## 368

Sl. No. 35206 **चिन्त्यसंग्रहः** Ms. No. B. 1042

Beginning :

विनोदनकृतो वीक्ष्य भट्टशङ्करबिन्दुना ।
मीमांसकैस्समुद्धर्तुमशक्यश्चिन्त्यसङ्ग्रहः ॥

षष्ठाद्ये तस्या यावदुक्तमाशीर्ब्रह्म चर्यमतुल्यत्वादित्यत्रोक्तम् । स्त्रिया अध्ययनं प्रतिषिद्धत्वात् न भवति न तु न्यायेन वसन्ते ब्राह्मणमुपनयीते त्यादौ अध्ययनोपयोगिनो द्वितीयाप्रनीतसंस्कार्यत्वेनाविवक्षिलिङ्गसङ्ख्यात्वा-दिति । तच्चिन्त्यम् ॥

**End:**

अतस्तत्प्रख्याधिकरणस्याप्याक्षेपसिध्यै सामानाधिकरण्येन प्रसजन् मत्वर्थ लक्षणाकं तत्प्रख्यन्यायसिद्धनामताकं वाजपेयोदाहरणमग्निहोत्रोद्धारवाक्य-स्थाने अभिषिच्योदाहृतमिति न कोऽपि दोषः ॥

**Colophon:**

इति वाजपेयाधिकरणचर्चा । इति श्रीमच्छङ्करकृतश्चिन्त्यसङ्ग्रहः ॥

**369**

**Sl. No. 35208** **जैमिनीकङ्कणम्** **Ms. No. C. 4365**

**Beginning:**

त्रिपुरारिसुतं देवं चिन्तामणिविनायकम् ।
सेनाविनायकं चैवं नौमि विघ्नापहारकम् ॥
नवनीरदनीलकलेवरं
शिखिपिञ्छयुतं च सुधीवराम् ।
प्रणमामि पयोनिधिजावरं
मुररिपुं च सुराधिपावरम् ॥
नत्वा गुरूनवायुदेवाननन्तभजनप्रियान् ।
करोमि जैमिनीयायाः कंकणं शास्त्रमण्डनम् ॥

**End:**

किञ्च प्राधान्यात्प्रत्ययर्थतायां अर्थात्प्रत्ययार्थस्य प्राधान्या × संख्या-दीनामपि प्रत्ययार्थत्वात्प्राधान्यापत्तेः गुणत्वं न स्यात् । वस्तुतस्तु--

**Colophon:**

— — —

**370**

**Ms. No. 35215** **जैमिनीयन्यायमाला** **Sl. No. C. 1877/1**

**Beginning:**

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
जमिनीयन्यायमाला श्लोकैः संग्रहते स्फुटम् ॥

एको विषयसन्देहः पूर्वपक्षावभासकः ।

श्लोकोऽपरस्तु सिद्धान्तवादी प्रायेण कथ्यते ॥

End :

यजमानार्त्विज्ययोः किं बलवत्पूर्वमुत्तरम् ।

आर्त्विज्यं किं त्रिवर्णस्थं विप्रे योग्येऽथवाऽग्रिमः ॥

विद्यावत्त्वान्न तद्युक्तं ब्राह्मणस्यैव तत्स्मृतेः ॥

Colophon :

इति द्वादशाध्यायस्य चतुर्थः पादः ॥

## 371

Sl. No. 35223 **जैमिनीयन्यायमालाविस्तरः** M. No. C. 1834

Beginning :

वागीशाद्याः + तं नमामि गजाननम् ।

युक्तिं मानवतीं विदन् स्थिरमतिर्भेदे विशेषादयं

भागाप्तोहः क्रमकृत्ययुक्तिनिपुणः श्लाघ्यातिदेशोन्नतिः ।

नित्यस्फूर्त्यधिकारवान् गतसदाव्ययः स्वतन्त्रेश्वरो

भागर्द्धिं श्रुतिमत्प्रसङ्गचरितः श्रीबुक्कणक्ष्मापतिः ॥

निर्माय माधवाचार्यो विद्वदानन्दकारिणीम् ।

जैमिनीयन्यायमालां व्याचष्टे बालबुद्धये ॥

अस्याः न्यायमालायाः देवतानमस्कारप्रतिपादकं श्लोकं पठति ॥ वागीशाद्याः ॥

End :

इति वचनात् व्यक्तौ व्यवहितान्वयः स्यात् तरसशब्दयोर्मध्ये सवनीय शब्देन व्यवधानात् इह तु तरसाः सवनीया इत्यनयोः सन्निधिः श्रूयते । तथा सति ये सवनीयास्ते तरसा इत्यनेन सान्निध्यात् गृहीतेन वाक्येन मामत्वं सवनीयपुरोडाशेष्वेव नियम्यते ॥

Colophon :

इति माधवीये जैमिनीयन्यायमालाविस्तरे तृतीयस्याध्यायस्याष्टमः पादः ॥

## 372

Sl. No: 35216 जमिनीयन्यायमाला Ms. No. C. 3083/1

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥
युक्तिं मानवकीं वदन् स्थिरधृतिः भेदे विशेषार्थभाक् +
जागर्ति श्रुतिमत्प्रसङ्गचरितः श्रीबुक्कणक्ष्मापतिः ॥ +
प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
जैमिनीयन्यायमाला श्लोकैः संगृह्यते स्फुटम् ॥

End :

द्वादशाधिकरणम्—सू ॥ एकपालेमादध्वर्युः पूर्वं भक्षयेत्—
× साम्याद्विकल्पो बाध्यतां सावकाशः समाख्यया ।
नैव वाचनिकं वाध्युभक्षणेऽत्र विभागशः ॥
सिद्धे विकल्पो नो युक्तः स्वीकार्योऽनासमुच्चयः ॥

Colophon:

इति जैमिनीयन्यायमालाविस्तरे तृतीये चतुर्थः पादः ॥

## 373

Sl. No. 35224 जैमिनीन्यायमालाविस्तरः Ms. No. C. 1877/2

Beginning :

जैमिनिप्रोक्तानि धर्मनिर्णायकानि अधिकरणानि न्यायाः अस्य ग्रन्थस्य विषयः । सुशकैः कतिपयरेव श्लोकैः स्फुटीक्रियते इति भावः । स्फुटीभावः प्रयोजनं न्यायमाला संगृह्यत इति ग्रन्थनामनिर्देशपूर्विका प्रतिज्ञा ॥

End :

देवानां स्थितिकृत्युदाहरिरभूत्तत्सूत्रकृज्जैमिनि-
स्तद्भाष्यं शवरोऽभ्यधा × टितवांस्तद्विस्तरं माधवः ।
सोऽयं नित्यकलत्रपुत्रधनभुक् प्रज्ञाधिपत्यस्थितिं
दीर्घायुस्सह वन्धुभिर्विजयतां आचन्द्रमातारकम् ॥

Colophon :

इति श्रीमत्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजि भट्टमाधव विरचिते जैमिनींयन्यायमालाविस्तरे द्वादशाध्यायस्य चतुर्थ पादेन सहाध्यायो ग्रन्थश्च सम्पूर्णः ॥

**374**

Sl. No. 35230 दुप्टीकाव्याख्या Ms. No. P. 3330

Beginning :

× स्य सप्तमस्य वा सङ्गतिकथनपरस्यानन्त्वेमस्तर्कन्तु × × र्थ इति नानुपपत्तिः यदि षष्ठाध्यायेन सप्त × मों × तिदेशप्रसङ्गनारभ्यत इत्यु × × तन्त्रावा × पने दुश्यामियत्तायां प्राप्तायां × × शेनापवदिकी सङ्ग तिश्च ब्रूयाः ॥

End :

किञ्च ज्योतिष्टोमनामधेयबलेन मुख्यानुग्रहन्यायानुसरणे तिसृषु पट्ट × × द्वादश × × स्यायाभावान् × पसत्कालिगुणा × × योत्र × × रणे तु द्वादशसूत्रि × ण्णां वान्तर्भाव × ×

Colophon :

इति श्रीमदद्वैतविद्याचार्य साग्निचित्यसर्वतोमुखातिरात्रसाग्निचित्याप्त-वाजपेययाजिगोविन्ददीक्षितवरनन्दनस्य साग्निचित्यसर्वपृष्ठाप्तोर्यामयाजिश्री यज्ञनारायणदीक्षितानुजस्य तच्छिष्यतालब्धसमस्तविद्यावैशद्यस्याग्निचित्याप्त-वाजपेययाजि श्री वेङ्कटेश्वरदीक्षितस्य कृतिषु दुप्टीकाव्याख्याने वार्तिकाभरणे सप्तमस्याध्यायस्य तृतीयः पादः ॥

**375**

Sl. No. 35231 टुपूटीकाव्याख्या M. No. A. 799

**Beginning :**

तथा एकादशे तन्त्रेण तदपवादभूतावापेन च तत्रावाहानुनिष्पादिनी प्रयोगेयत्ताचिन्ता फलति। तथा द्वादशे प्रसङ्गेन तदपवादभूततन्त्रावाहाभ्यां च प्रसङ्गतन्त्रावाहानुनिष्पादिनी प्रयोगेयत्ताचिन्ता फलतीति फलाभिप्रायं भाष्यमित्यर्थः +

॥ प्रसङ्गसङ्गतिसिध्यर्थं तत्कीर्तनमित्याह— ॥ इयत्ताप्रसङ्गेनेति ॥

**End :**

भूयोऽनुग्रहन्यायानुसरणे तु द्वादशसु तिसृणां षण्णां वा अन्तर्भावात् ॥

**Colophon :**

— — —

**376**

Sl. No. 35232 तत्त्वकमलाकरः Ms. No. A. 383/1

**Beginning ;**

श्रीरामं पितरौ नत्वा कमलाकरशर्मणा।
अर्थशब्दौ निरूप्याथ शास्त्रतत्त्वं निरूप्यते ॥
सन्ति यद्यपि विद्वांसः संनिबन्धाश्च कोटिशः।
तथाप्यमुष्य वैदग्धीं केचिद्विज्ञातुमीशते ॥

**End :**

यो भाट्टतन्त्रगहनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्मभेत्ता।
योऽत्र श्रमः किल कृतः कमलाकरेण
प्रीतोऽमुनाऽस्तु स कृती बुधरामकृष्णः ॥

Colophon :

इति श्रीमज्जगद्गुरुनारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते तत्त्व कमलाकरे द्वादशोऽध्यायः समाप्तः ॥

## 377

Sl. No: 35233 तन्त्रचिन्तामणिः Ms. No. P. 400

Beginning :

अनस्य प्रकृतेर्यस्मात् समग्रगुणसं × ।
× निलभन्तेऽन्ये तमीडे नो मम × ॥
× दयश्चन्द्रनागमाम्वातपःफलम् ।
श्रीवेंकटेश्वरमखी सर्वतन्त्रस्वतन्त्रधीः ॥
कृतं साहित्यसाम्राज्यं नाम काव्यमनुत्तमम् ।
चूडामणिर्वितनुते यज्वा तन्त्रशिखामणिम् ॥

End :

सतः परमदर्शनं बिषयानवगमात् प्रयोगस्य परम् । आदित्यवद्यौगपद्यं × स चान्तरो विवादः—

Colophon :

— — — —

## 378

Sl. No. 35234 तन्त्रचिन्तामणिः M. No. B. 1057

Beginning :

अष्टकाः कर्तव्याः गुरुरनुगन्तव्यः तटाकं खातव्यमित्याद्याः स्मृतयः धर्मे प्रमाणं उत नेति संशयः । किं तावत्प्राप्तं नेति । कुतः × प्रमाणं न भवतीति पूर्वः पक्षः ॥ सिद्धान्तस्तु ॥

End :

उपरि समिधां देवेभ्यो धारयतीति विधिरेव समिद्धारणे महापितृयज्ञे त्वधस्तात् समिद्धारणमिति ॥

**Colophon :**

२०७ तम पत्रे—

इति श्रीवत्सकुलतिलक श्रीवैष्णवाग्रेसर श्री तम्बूदीक्षित तनूज़ेन श्री वेङ्कटेश्वरयज्वना कृते मीमांसासङ्ग्रहे तन्त्रचिन्तामणौ तृतीस्य अध्यायस्य तृतीयः पादः ॥

## 379

**Sl. No. 35235** तन्त्रदर्पणम् **M. No. P. 4790**

**Beginning :**

हरिणाङ्ककलाचूडं करुणाभरितेक्षणम् ।
करवाणि महास्वान्ते नरवारणविग्रहम् ॥
× भातिजगज्जनिस्थितिलयाकारो विलासोदयो
देवो विग्रहमद्भुतं वहति × रुज्वलम् ।
श्रेयस्सन्ततिमातनोति सदयं यद्वीक्षणं प्राणिनां
वाग्गुम्भेषु स्वविषमे घटयतु प्रागल्भ्यमन्यादृशम् ॥

**End :**

बन्धाभ्युपगमेन व्यवधानान्नश्यति नापि सम्बन्धः । न च धातुमात्रस्य तृतीयमन्त्रे तयो × रनुपङ्गायोगात् तस्मादाकांक्षानुरोधेन लौकिकवाक्यशेषस्य उपस्थितत्वार्गच्छतामित्यस्यैव × × न विरम्यते ॥

**Colophon :**

इति प्रयोगकुलतिलक × × माणिक्यग्राम रत्नामि × ॥

## 380

**Sl. No. 35237** तन्त्ररत्नम् **Ms. No: P. 4652**

**Beginning :**

× भ वितव्यमितिमेव द्विवचनेत्येकवचनविरोधः । अथ पुंव्यापारस्यैवो-पादानम् फलवाक्येन । स्त्रीव्यापारस्य ततः स्त्रीव्यापरस्य फलवाक्येनानुपात्तस्य फलार्थित्वस्याभावाद्वचनान्तरं सदपि क्रत्वर्थतयैव पत्न्यनुमतिं विदध्यादिति ॥

End :

यथा दत्तं हविर्नश्येदिति हविषो विनाशवचनात् क्रतुवैगुण्यमेव दर्शितम् । लिङ्गानि च दर्शितानि । ब्रह्मणानां हविरित्येवमादीनि ।

आर्त्विज्यं न भवेत्कर्म स्वतः क्षत्रियवैश्ययोः ॥

ब्राह्मणानां तु विदुषा × दिति स्थितम् ॥

Colophon :

इति श्री महोपाध्यायपार्थसारथिमिश्रविरचिते तन्त्ररत्ने द्वादशस्याध्यायस्य चतुर्थः पादः । समाप्तं च तन्त्ररत्नम् ॥

**381**

Sl. No. 35241 तन्त्ररहस्यशिक्षा Ms. No. P. 2177/1

Beginning :

पश्यन् गोदावरीमग्रे प्राङ्मुखः पद्मकासनः ।
नरसिंहवपुर्विष्णुः अव्याद्धर्मपुरे वसन् ॥
गोदावरीरोधसि सन्निविष्टा
गरीयसी धर्मपुरी चकास्ति ।
तत्रावतीर्णस्य नृसिंहमूर्तेः
विष्णोः पदं चेतसि संस्मरामि ॥

End :

× नवमाधिकरणेषूक्तदशमाद्यसिद्धं च । कार्यमुखातिदेशस्यैवाप्रयोजकत्वं उच्यते । तथाह । इयं गौ × यारक्तं × मित्यादौ धामत्रयार्थैकमापनीप्रकाशिकार्थे मन्त्राक्षि—

Colophon :

१४७ पत्र—

इति सप्तमाध्यायार्थः ॥

**382**

Sl. No. 35242 तन्त्ररहस्यशिक्षा Ms. No. A. 683/1

Beginning :

पश्यन् गोदावरीमग्रे प्राङ्मुखः पद्मकासनः ।
नरसिंहवपुर्विष्णुः अव्याद्धर्मपुरे वसन् ॥

भिन्नं क्वचित् कुत्रचिदप्यभिन्न
विरुद्धमेकत्र तथाऽविरुद्धम् ।
तन्त्रद्वयं चापि गुरूक्तरीत्या
वितन्यते तन्त्ररहस्यशिक्षा ॥

**End :**

तच्च शास्त्रं मीमांसासहकृतमेव प्रमाणम् । सा च आरम्भणीयेति सिद्धम् ॥

गम्भीरं गुरुतन्त्रसागरमुखं योऽन्तः प्रवेष्टततः
तत्पारं प्रतियातुमुत्सुकधियः तेषां कृते निर्मितम् ।
सम्यक् तन्त्ररहस्यमेतदुचितैः शब्दैश्च योग्यक्रम
न्यग्भूतप्रतितन्त्रमार्गगतिभिः न्यायत्रजैर्योजितम् ॥
आम्नायान्तिमसीमनि × नानावताराश्रयः ॥

**Colophon :**

इति श्रीमद्रामानुजाचार्यविरचिते तन्त्ररहस्ये शास्त्रारम्भ परिच्छेदः पञ्चमः ॥

**383**

**Sl. No: 35243** **तन्त्रनीतिलहरी** Ms. No. P. 4340

**Beginning :**

अखिलगुणनिकायं मन्त्रसाराभिधेयं
निखिलनिगमकायं कृष्णवाचो विधेयम् ।
दनुजरिपुसहायं श्रीमतः स्वं सखायं
दळितकुमति मायं × भजे वैनतेयम् ॥
भट्टाचार्यगुरुप्रोक्तसिद्धान्तलहरीमिमाम् ।
सन्तः पश्यन्तु दयया पक्षिराजविजृम्भिताम् ॥
भट्टानुसारेण नयानशेषान्
प्राभाकरीश्चापि दुरूहनीतीः ।
प्रकाशयन्ती लहरी विभाति
मुक्ताप्रवाळग्रथितेव माला ॥

कामं नयविवेकस्य × दीपिकया सह ।
सूक्ष्मवुद्धिजुषामेषा छाया व्याख्या भविष्यति ॥

End :

संशयाक्षेपसमाधानभाष्यव्याख्यानं तु वस्तुबलमतरीत्या दीपशिखायामेव व्यक्तमिति सर्वं समञ्जसम् ॥

Colophon :

इति श्रीवत्सकुलतिलक सर्वतन्त्र विद्वच्चक्रवर्तिचक्रवर्तिङ्गरनाथदेशिकाध्वरिसूनुना वेदान्ताचार्यगुरुचरणानुजेन तदुभयचरणारविन्दपरिचरणलब्धमीमांसावाल्लभ्येन रामानुजदासेन विरचितायां श्रीमत्तन्त्रनीतिलहर्यां प्रथमस्याध्यायस्य तृतीयः पादः ॥

Extra information :

ग्रन्थान्ते पद्यद्वयं दृश्यते यथा–

योऽसौ नागमयान् शरान् प्रणिहितान् मायाजु × न्द्रद्विषा
निर्धूयस्वयमागते युधिमुदा रामाय सौमित्रये ।
स्वं सख्यं प्रकटीचकार सुतरां श्रीचक्रवर्तिप्रियः
सोऽयं मत्कुलदेवता हि गरुडः कामं विधत्ते कृतिम् ॥
गुणं वा दोषं वा वदति यदि कश्चिन् मम मनो
न हर्षं खेदं वा भजति हि तदा किन्तु सुधियः ।
निरूप्यैव ब्रूयात् × पुरमिह × किं वा वदसि रे
स चैतन्निर्माता मधुमथनकेतौ जयति यः ॥

## 384

Sl. No. 35246 — तन्त्रवार्तिकम् — Ms. No. P. 3015/1

Beginning :

धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् ।

एवं तावद्विध्यर्थवादमन्त्रात्मकस्य धर्मं प्रत्युपयोगः समर्थितः । इदानीं पौरुषेयीषु स्मर्यमाणार्थविधिषु मन्वादिप्रणीतनिबन्धनासु × चाचारेषु चिन्ता ॥

**End :**

तस्मान्नानुषङ्ग इति । प्रयोजनं अनुषङ्गमन्त्रत्वात्तत्प्रायश्चित्तम् । लौकिके त्वमन्त्रत इति । आह च—

आम्नायमानं ह्यनु × × ।

× तुलोकिकानां न मन्त्ररूपप्रतिपत्तिसिद्धिः ॥

**Colophon :**

इति भट्टकुमारिलविरचिते गुरुवाक्यलेशसंग्रह × तन्त्रवार्तिके द्वितीयाध्यायस्य प्रथमपादः ॥

## 385

**Sl. No. 35248** मीमांसातन्त्रवार्तिकम् **Ms. No. P. 4059**

**Beginning :**

मूलत्वं प्रतिपद्यन्ते विधिशून्यत्वात् । न च मूलान्तरं न्याया × न च सर्वेषां स्मृतिप्रणयिनां अविगानं येन पौरुषेयागमबलादुपलब्धपूर्वश्रुतिमूलत्वं +

**End :**

सामर्थ्याधीनत्वाद्वाक्यशेषसिद्धः । आह च—

यथैव पाठः प्रतिपत्त्युपाय-
स्तथैव सामर्थ्यमपि येनैव ।
चोदना न समामनन्ति
सहस्रभागं तु समामनेयुः ॥
इति कृतबहुमार्गं मन्त्रविध्यर्थवादैः
स्मृतिपरिघमुदारं वेदशालोपगूढम् ।
अनभिभवसमर्थं × दुर्गं प्रविश्य
प्रविभजति यस्तु × विश्वामिदानीम् ॥

**Colophon:**

इति गुरुवाक्यलेशसङ्ग्रहे मीमांसातन्त्रवार्तिके प्रथमस्याध्यायस्य चतुर्थः पादः ॥

## 386

Sl. No. 35254 तन्त्रवार्तिकटीका Ms. No. P. 4124/1

Beginning :

उमानन्दनमाराध्य शारदामीश्वरं गुरून् ।
कृत्स्नशास्त्रप्रसादेन व्याख्यास्ये तन्त्रवार्तिकम् ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।

अर्थवादानुदाहृत्य किं किञ्चिद्धर्मं प्रमिमीरन् (?) उतनेति विचारितम्–

End :

न चैवमुभयथाऽपि प्रामण्यसिद्धेः प्रमाणलक्षणासङ्गतिः सङ्गनीया ।

को धर्मः कथंलक्षणक इत्येकेनैव सूत्रेण व्याख्यातम् चोदनालक्षणो धर्मः इति । अत्र कथमिति प्रकारवचनः थमुन्प्रत्यय–

Colophon :

६८तमपत्रे—

[इति श्रीमत्रिकाण्डमण्डनप्रतिवसन्तसोमयाजिभट्टमाधवात्मजभट्टसोमेश्वर विरचितायां तन्त्रवार्तिकटीकायां सर्वानवद्यकरण्यां व्यायसुधाख्यायां प्रथमाध्यायस्य द्वितीयः पादः] ॥

## 387

Sl. No. 35255 तन्त्रवार्तिकटीका Ms. No. P. 4124/2

Beginning :

उक्त समाम्नायैदमर्ध्यम् ।
तस्मात् सर्वं तदर्थं स्यात् ।

अत्र भाष्यकृता उद्भिदादिशब्दानां धर्मप्रमोपयोगसिद्ध्यर्था वा-

End :

अर्थपरत्वाशङ्कानिवृत्त्यर्थः समस्तशब्दः ।
इतिकरणः समस्तोक्तप्रकारपरामर्शार्थः ॥

व्याख्याता तन्त्रटीका बहुभिरपि भरां प्रायशोऽन्यैर्निबन्धैः
उत्सृष्टो ये त्वबोधात् यमनुविदधानैस्तु दुर्बोधतत्त्वाः ।
ग्रन्थास्सारार्थभावा अपि बहुतरा व्याकृतेष्वप्यमीषु
स्पष्टं कार्त्स्न्येन बोधो न हि भवति भृशं प्रायशोऽन्यैर्निबन्धैः ॥
तस्मात्सर्वान्निबन्धात् परमपि चतुः × ॥

**Colophon:**

— — —

**388**

**Sl. .No 35256** **तन्त्रवार्तिकटीका** **Ms. No. A. 369**

**Beginning :**

× तत्प्रामाण्यप्रतिपादनात् लोके सन्नियमादिति च वैधर्म्योपन्यासेनापौरुषेयस्य कृत्स्नस्य वेदस्य क्रियात्वेन समाम्नाय इति प्रवृत्तिप्रयोजनाभिधानात् शक्यते च परिगृहीतुम् । वाक्यं हि चोदना ॥

**End :**

संस्काराश्च केचिदिति । निर्देशाद्वान्यदागमयेदिति । होतात् पूर्वं नाशदोषापहारेप्वन्यद्धविरागमयितव्य नाग्नेययागहविषो निर्दिष्टत्वादिति ॥

**Colophon :**

इति महोपाध्याय श्री परितोषमिश्रविरचिते तन्त्रटीकानिबन्धने अजिताख्ये तृतीयस्याध्यायस्य तृतीयः पादः ॥

**389**

**Sl. No. 35257** **तन्त्रशिखामणिः** **Ms. No. P. 282/b**

**Beginning :**

× देवतात्मक यागान्तरङ्गभूतद्रव्याप × निमित्तकप्रायश्चित्ताधिकारश्चिन्तितः । इह तु बहिरङ्गकालापराधनिमित्तकप्रायश्चिताधिकारश्चिन्त्यत इति पदान्तरत × तन्त्स्यति धेयं × ॥

**End :**

कांक्षादि पूरणमिति चादुच्यते अनुपत्रस्य (?) करणत्वानुपपत्तिलभ्ये नोत्पत्तिनर इपेण (?) व्यापारेण वाचातिकेन मन्त्रेण मन्त्रवर्णादि प्राप्तया देवतया सामान्यविधिप्राप्तेनाज्येनाहवनीयादीनां च तदाकाङ्क्षापूरणमिति न दर्वीहोमापूर्वदत्त इति सिद्धम् ॥

Colophon :

इति श्रीमदद्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रसाग्निचित्याप्तवाजपेययाजिश्रीवेङ्कटेश (श्व?) दीक्षिततियोगानुश्रवप्रमुषितमनीषाविशेषस्य विश्वजिद्याजिनः श्रीराजचूडामणिदीक्षितस्य कृतिषु तन्त्रशिखामणौ अष्टमाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः । ×

दृष्टमदृष्टं वा प्रयोजनं कल्प्यमित्यग्नये जुष्टमित्यादिमन्त्रस्य नोह (?) सिद्धेदुपकारमुखेन पदार्थातिदेशत्वाग्नमे जुष्टमित्यादिमन्त्रस्य प्रकृतिक्लसयक्ष्यमाणदेवताप्रकाश तरइवा (?) लिकारमुखेना विदेशात् । सौर्यादि देवता यक्ष्यमाणसूर्यादी (?) ×

## 390

Sl. No. 35258 तन्त्रशिखामणिः Ms. No. P. 1564

Beginning :

× न्तरबाधस्याप्राप्तबाधत्वेऽपि दशमे स चिन्तित इत्यर्थः ॥

End :

विकल्प एवन्यायः । नन्वेवं शरशारूस्यापि चोदकस्यापेक्षत्वान्न चोदकप्राप्तकुश ×

Colophon :

[इति श्रीमद्वेदान्तविद्याचर्यस्य सर्वतन्त्रस्य श्रीचित्याप्तवाजपेययाजिश्रीवेंकटेश्वरदीक्षितनियोगानुभवसमुन्मिषित श्रीशेषाद्रिदीक्षितयोर्वैमात्रेयस्य मनीषाविशेषस्य प्रतिदिनप्रबन्ध परमेश्वरषण्माषासार्वक्रविश्वजिदतिरात्रयाजि श्रीनिवास श्रीकेशवदीक्षितयोर्वैमात्रेयस्य कामाक्षिगर्भसम्भवस्य श्रीमदर्धनारीश्वर दीक्षितगुरुसहजलब्धविद्यावैशद्यस्य विश्वजिद्याजिनः श्रीराजचूडामणिदीक्षितस्य कृतिषु तन्त्रशिखामणौ दशमस्याध्यायस्य त्रितीयः पादः ।]

## 391

Sl. No. 35259 तन्त्रशिखामणिः M. No. P. 2120/2

**Beginning :**

शरणागतभृत्पादस्तरुणारुणसारथिः ।
शरणं रघुनाथो मे करुणावरुणालयः ॥

अभ्युदयकालापराधादि × धा पञ्चशरावे पूर्वत्र द्रव्यदेवतात्मक यागान्तरङ्गभूतद्रव्यापचारनिमित्तप्रायश्चित्ताधिकारः चिन्तितः । इह तु बहिरङ्गकालाद्यपराधनिमित्तकप्रायश्चित्ताधिकारः चिन्त्यत इति पादान्तरत्वमानन्तर्यं चेति विज्ञेयम् ॥

**End :**

बाह्लीकानामन्वयव्यतिरेकादिना यवान्नप्रियतो अवगमात् विशेषप्रत्युपदेशस्यापि बाह्लिकत्वपुरस्कारात् सर्वसाधारण्यपरत्वावधारणेऽपि शब्दैकप्रमाणके भावनाविशेषान्वये शब्देनावगम्यमाने पारिप्लवत्वोक्तेस्साहसमात्रत्वात् । तस्माद्यथाप्रकरणं व्यवस्थिता धर्माः शतशश्चानुपदिष्टधर्मकेषु सौर्यादिष्वतिदेशेन धर्मप्राप्तिं प्राप्तानां च विकारं—

**Colophon :**

इति श्रीराजचूडामणिदीक्षितस्य कृतिषु तन्त्रशिखामणौ षष्ठस्याध्यायस्य अष्टमः पादः ॥

## 392

Sl. No. 35263 तन्त्रशिखामणिः Ms. No. P. 3878

**Beginning ;**

× कृते × स्मात् समग्र × पदः ।
कांक्षितानि लभन्तेऽन्ये तमीहे सोममव्ययम् ॥
अस्ति गोविन्दयज्वेन्द्रनाग × फलम् ।
श्रीवेङ्कटमख × र्वितन्तस्वतन्त्रधीः ॥
चूडामणिर्वितनुते यज्वा तन्त्रशिखामणिम् ॥
× पूर्वस्मिन्नध्यायषट्के उपदेशात्मकप्रमाणव्यापार—

End :

प्रधानविधिवाक्ये विधीयमानाः समिदादयः पदार्थाः यागगतव्यापारविशेषेण × नैव विधीयन्ते न स्वरूपेण ततश्च तत्र समिदादिश्रवणं तज्जन्य यागगतव्यापारलक्षणार्थं न तु —

Colophon :

[इति श्रीमदद्वैतविद्याचार्यसाग्निचित्याप्तवाजपेययाजि श्रीवेंकटेश्वरदीक्षित × रत्नखेटश्रीविवासदीक्षिततनयस्य कामाक्षीगर्भसंभवस्य × श्रीराजचूडामणिदीक्षितस्य कृतिषु तन्त्रशिखामणौ दशमाध्यायस्य द्वितीयः पादः]

393

Sl. No. 35266 तन्त्रसिद्धान्तदीपिका Ms. No. P. 3575

Beginning :

× द्विषयकःनादिप्रयोगविपयस्त्वात् पीलुशब्दस्य निरुढलार्थःत्वान्नापश × द्य शङ्का । तदपि लुशब्दस्य कत्यपीर्था इति प्रश्ने तीक्ष्णवृक्षस्शनाः पीलुरिति वैद्यनिघण्टुः । पीलुस्तु नरिपादपे ज्ञेयो गूढफलामिख्यो काण्डपुष्प, इति केशवः ॥

End :

तत्रापि कण्टकवितोदनादिविशेषिकेषु स्वसमाख्ययैव उद्गातृसिध्यावैय्यर्थ्यादज्ञातवेदकयज्ञसूत्रलिङ्गादुन्नीतकर्मणां कर्तारमाकाङ्क्षतीति तन्मात्रे यथाप्रकृति उद्गानादौ चोद्गाता एवं याजुष्वेदिकवाजपेयादावप्यूह्यम् ॥

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभ श्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्माणधुरन्धरमहाव्रतयाजि श्रीमदप्पयदीक्षितसोदर्य श्रीमदाचान्दीक्षितपौत्रेणाभूमिदेवनन्दनेनाप्पयदीक्षितेन विरचितायां तन्त्रसिद्धान्तदीपिकायां तृतीयस्याध्यायस्य सप्तमः पादः ॥

394

Sl. No. 35270 दुरूहशिक्षा Ms. No. P. 3968

Beginning :

अखण्डसच्चिदानन्दं खण्डचन्द्रशिखण्डकम् ।
उमयालिङ्ग्यमानं तं परमात्मानमाश्रये ॥

अप्पयदिक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी ॥
× कृपायोगान् चोक्कनाथमहीभुजः ।
दुरूहशिक्षां मन्दोऽपि निश्शङ्कं कृत्यमारभे ॥
× लन्त्यैस्सह × धिविधा लक्षणानि × क्षणो
प्रायेण सिद्धवत्कृत्य पदार्थान् विलिख्य तान् ।
कृतोपपादना ये स्युः मूले विधिरसायने ॥

**End :**

नेदं व्य × मिवभ × दूश्यते। × तत्तथैव व × लेपाय
ते। अथ सत × ड्य तां कमलनाळसूत्रैस्स × कृतं भुवि रसा
धरेत भू + णान्वेषणैर्व × पुरहरे चिरन्तन इदं सखे स्थाप्यताम् ॥

**Colophon :**

इति श्रीमदद्वैतविद्याचार्य विश्वजिद्य × त × अप्पयदीक्षितस्य पुत्रेण अप्पयदीक्षितेन विरचितायां दुरूहशिक्षायां परिसङ्ख्यासमर्थनभङ्गः ॥

## 395

**Sl. No. 35271** **दुरूहशिक्षा** **Ms. No. A· 152**

**Beginning :**

ब्रह्माद्वैतप्रपञ्चनगुरुर्यस्य तातोऽप्पयज्वा
सोऽहं लक्ष्यैस्सह विधिविधालक्षणानि क्षिणोमि ॥
प्रायेण सिद्धवत्कृत्य पदार्थान् विलिखामि तान् ।
कृतोपपादना ये स्युः मूले विधिरसायने ॥

**End:**

तस्माद्विरुद्धं सकलमिव भवद्दृश्यते येन तन्त्रं
इति यदुक्तं दीक्षितैः तत्तथैव वज्रलेपायेत ।
कथं बक्ती (?) निरुध्यतां कमलनालसूत्रैस्त्वया
मदत्रुटितशृङ्खलावलयबन्धनहस्तिसन्धुरः ।
कृतं विधिरसायने तदिह दूषणान्वेषणै-
र्वरं पुरहरे चिरं मन इदं सखे स्थाप्यताम् ॥

Colophon :

इति श्रीमदद्वैतविद्याचार्य विश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोश्चतुरधिकशतप्रबन्धनिर्माणधुरन्धर श्रीकण्ठमतप्रतिष्ठापक महाव्रतयाजि श्रीमदप्पय्यदीक्षितसोदर्यस्याप्पयदीक्षितस्य पौत्रेण रुक्मिणीपरिणयालङ्कारतिलकाद्यनेकप्रबन्धनिर्मातुरप्पदीक्षितस्य पुत्रेण अप्पदीक्षितेन विरचितायां दुरूहशिक्षायां परिसंख्यासमर्थमभङ्गः ॥

**396**

Sl. No. 35273 देवतास्वरूपनिर्णयः Ms. No. C. 1197

Beginning :

ननु किमिदं देवतात्वम्? कश्च तदाश्रयः? कानि च तत्र मानानि?? कथं तेषां बलाबलमिति। न तावत्त्यज्यमानद्रव्योद्देश्यत्वम्। आग्नेयपुरोडाशत्यागसमये प्रमादादुद्देश्यतां गतस्येन्द्रादेर्देवतात्वप्रसङ्गात्। +

End:

तद्धितेन चतुर्थ्या वा देवतात्व निर्णयोत्तरं च दाशमिकन्यायेन तद्विधिमुपेक्ष्य शब्दविधिवेलायां यदि पाञ्चमिकन्यायेन मन्त्रगतः शब्द एव विधीयते न तावता चतुर्थ्या मन्त्रयोर्देवतात्वनिर्णये विपरीतबलाबलापत्तिः +
मन्त्रस्य देवतात्वनिर्णये बलीयस्त्वं व्यवह्रियते। इति चतुर्थीमन्त्रयोर्बलाबलाक्षेपपरिहारः ॥

Colophon :

देवताविषयाशेषदोषराशिविशोषणी।
अनन्तदेववागेषा सतां तोषाय जायताम् ॥

**397**

Sl. No. 35275 धर्मसञ्चारः Ms. No. A. 492

Beginning :

लङ्कालङ्कारलङ्कारणातीतं विभुमद्वयम्।
सीतासीतारतं वन्दे विभीषणविभीषणम् ॥

अधिकरणेष्वधिकधृती रघुपतिरिह शास्त्रपारवित्सूरिः ।
बुधजनपरितोषकृते कुरुते निरतेऽह धर्मसञ्चारम् ॥

अथातो धर्मजिज्ञासेति धर्मो विचार्यते । वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्म इत्युच्यते ।

**End :**

अत एव दध्ना जुहोतीत्यत्र दध्नस्साक्षात्फलसाधनत्वभावेऽपि परम्परया फलसाधनत्वेनापि तृतीयोपपत्तिरित्युक्तम् ॥ तथाचापूर्वद्वारा निश्रेयससाधनत्वेन यागादिः धर्म इति सिद्धम् ॥

यः पृथ्वीभरवारणाय दिविजैस्संप्रार्थितश्चिन्मयः
सञ्जातः पृथिवीतले रघुपते मायामनुप्राप्य यः ।
निश्चिते हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां निधाय जगतां तं जानकीशं भजे ॥

**Colophon:**

इति श्रीरघुपतिकृतौ धर्मसञ्चारो नाम पूर्वमीमांसाप्रकरणं समाप्तम् ॥

## 398

Sl. No. 35276 **धर्मसञ्चारः** Ms. No. A. 898

**Beginning :**

लङ्कालङ्कारलङ्कारणातीतं विभुमद्वयम् ।
सीतासीतारतं वन्दे विभीषणविभीषणम् ॥
अधिकरणेष्वधिकधृती रघुपतिरिह शास्त्रपारवित्सूरिः ।
बुधजनपरितोषकृते कुरुते निरते हि धर्मसङ्ग्रहम् ॥

अथातो धर्मजिज्ञासेति—

**End :**

अथ एव दध्ना जुहोति इत्यत्र दध्नः साक्षात्फलसाधनत्वाभावेऽपि तृतीयोपपत्तिरित्युक्तम्। तथाचापूर्वद्वारा निःश्रेयससाधनत्वेन यागादिः धर्म इति सिद्धम् ॥

**Colophon :**

इति श्री रघुपतिकृतौ धर्मसञ्चारो नाम पूर्वमीमांसाप्रकरणं समाप्तम् ॥

## 399

Sl. No. 35279 **नयविवेकः** Ms. No. A. 589

Beginning :

त्रिपाद्यामनवद्यं यन्मतं व्यक्तं गुरोस्त्वतः ।
विस्तरं सङ्ग्रहं कर्तुं भवन् संक्षिप्य वक्ष्यति ॥
आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥

उक्तं कार्यमर्थं प्रतिपादयतो वेदस्य प्रामाण्यमिति । मतद्वयेऽपि समान मिदं पूर्वपक्षोत्थानायोक्तम् ॥

End :

एवं विधशङ्कापनयापेक्षं साध्यशास्त्रे भिन्नमिति परोक्तमचिन्तितसिद्धत्वं हेयम् ॥ किमति । शास्त्रभेदोऽध्यायार्थोऽभिमतः ॥

Colophon :

[ इति श्रीमहोपाध्यायभवनाथमिश्रविरचिते मीमांसानयविवेके प्रथमस्याध्यायस्य चतुर्थः पादः ॥ ] (इति ५७ पुटे)

## 400

Sl. No. 35281 **नयविवेकव्याख्या** Ms. No. P. 1710

Beginning :

प्राणताज्ञानसन्दोहध्वान्तध्वंसनकर्मठम् ।
नमामि तुरगग्रीवं हरिं सारस्वतप्रदम् ॥
तत्सूनुना वरदराजबुधा × मेण
व्याख्यायते नयविवेक इति प्रबन्धः ।
सत्सम्प्रदायम × ते × दीपिकेति ॥ +
तत्र त्रिपाद्यां गम्भीरं भवदेवसमीरितम् ।
अहं नयविवेकं तं व्यचक्षे दुर्गहं परैः ॥

End :

तथा स्मृतितोऽपि तत्स्मृत्यर्थप्रतिपादनमुक्तिपद × अजाता × न्तोवदिसिद्धम् । तत्र यद्यपि नियतरूपपदबोधो नास्ति ॥

Colophon :

— — —

## 401

Sl. No. 35283 नयविवेकव्याख्या Ms. No. P. 2677/2

Beginning :

चतुर्भुजं पुस्तकविच्चिमुद्रै-
रयां गतं स्वोच्च सदादधानम् ।
× द्यावसहोपविष्टं
नमस्तुरंगाननमिन्दुवक्त्रम् ॥
नत्वा सुदर्शनमहं वरदः करोमि
तां दीपिकां नयविवेकविनो ×· नाय ।
यामन्तरेण कुनिनं महोपकारं
दुर्गेनियोज्य विषये चरितुं नराय ॥ (?)

× नाति संबन्धः । अध्यायान्तरवत् । बाधे हेतुत्वेन किमिति ॥

End :

× निमित्तमेव साक्षदश्यं वैकृतं कु × न वैतदेवमिति दोषः । कथं तर्हि इत्यत्राह इतीति कथं तर्हि वि × मस्तेमेवैश्यापि-कारइत्यत्रात वैश्यक × इति ॥

Colophon :

इत्यात्रेयस्य श्रीसुदर्शनार्य शिष्यस्य श्रीरङ्गनाथ सूनोर्वरदार्यस्य कृतौ नयविवेकदीपिकायां षष्ठस्य ×

## 402

Sl. No: 35290 न्यायबिन्दुः Ms. No. C. 72

Beginning :

नत्वा जैमिनिमाचार्यं शबरस्वामिनं तथा ।
कुमारिलं च तद्रीत्या न्यायाबिन्दुर्विधीयते ॥
अथातो ब्रह्मजिज्ञासा—

End :

एवं वैदिकलिङ्गान्यपि ब्राह्मणानामिदं हविरित्येवमादीनि ब्राह्मणानि । तस्माद्ब्रह्मणानामेवार्त्विज्यमिति सिद्धम् ॥

Colophon

इति श्रीमद्रामचन्द्रात्मजभट्टवैद्यनाथकृते न्यायबिन्दौ द्वादशस्यचतुर्थः पादः ॥

## 403

Sl. No. 35291 न्यायमञ्जरी Ms. No. P. 199/1

Beginning;

वर्यं यमैदमध्य मन्ति तं इह वैधर्मार्थमेव चिन्त्यत इति कथं लक्षणभेदः । न च पूर्वं सामान्ये × × शेषत्वं चिन्तिवं इत तु कतुविशेष × वस्तद्विशेषश्चिन्त्यत इति सप्त × लक्षणभेदोस्तीति वाच्यम् ॥

End :

इति न्यायमञ्जर्यां चतुर्थाध्यायस्य प्रथमः पादः ॥

न प्राधान्यमिति भावः । वटस्थः शङ्कते ॥ अथेति ॥ ननु प्रतिपत्तित्वेदृष्टार्थता मैत्रावरुणार्थत्वे अदृष्टार्थता स्यादित्यत आह ॥ प्राशस्तु रिति ॥ प्रयोजनमाह ॥ इत्यग्नीषोमीयेति ॥ (?)

Colophon :

उत्तरग्रन्थस्तु सोमनाथदीक्षितीय्यः ॥

## 404

Sl. No: 35296 न्यायरत्नमाला Ms. No. P. 215

Beginning :

अङ्गस्वरूपसम्बन्धः प्रमाणं सप्रकारकम् ।
यदुक्तं वार्तिके सम्यक्तत्संक्षेपेण कथ्यते ॥

यदङ्गस्वरूपं यथाविधं च यत्तस्य प्रधानेन संबन्धः यथा यच्च तत्र प्रमाणं यथा च तत्र प्रमाणं भवति तत्सर्वं यथावार्तिकमनुसन्धास्यामः ॥

End :

मीमांसाब्धिमिति मीमांसैवाब्धिः शाबरभाष्यं मत्या स्वबुद्धिकौशलेन आचार्यैः भट्टाचार्यैः भिकिः (?) पार्थसारथिरिति शेषः ॥

**Colophon:**

इति श्रीरामानुजचार्यविरचिते न्यायरत्नमालाव्याख्यानं नायकरत्नं सम्पूर्णम् ॥

## 405

**Sl. .No 35294** न्यायरत्नमाला **Ms. No. C. 53**

**Beginning :**

आजंन्दममृतं ज्ञानं अजं साक्षिणमीश्वरम् ।
ब्रह्म सर्वमसर्वं च वन्दे देवं हरिं विभुम् ॥
मीमांसार्णवसंभूतैः कुमारस्वामिना हृतैः ।
न्यायरत्नैरहं मालां संग्रथ्नामि मनोहराम् ॥
तत्र तावदिमे केचित् पूर्वपक्षं प्रचक्षते ।
आचार्यकनियोगार्थः स्वाध्यायः संप्रयुक्तितः ॥

**End :**

वार्तिके बहुशो निमित्तस्यैवौद्देश्यत्वाभिधानान् इत्यलमतिविस्तरेण ॥ तस्मात् सिद्धः काम्यनित्यविशेषः इति ॥

पार्थसारथिना सम्यग्विशेषः काम्यनित्ययोः ।
आचार्यमतमाश्रित्य ह्ययं लेखः प्रदर्शितः ॥

**Colophon:**

इति ज्ञात्मसूरिसुतपार्थसारथिसूरिविरचितायां न्यायरत्नमालायां नित्य-काम्यविवेकः ॥

## 406

**Sl. No. 35297** न्यायरत्नमाला **Ms. No. C. 2931**

**Beginning :**

सम्यक् नयाञ्जनसमेधितमस्तदोष-
माम्नायसंज्ञमनुशास्ति विशुद्धचक्षुः
मानान्तरानधिगतं खलु धर्मतत्वं
तत्वान्तरञ्च पुरुषोत्तमसंज्ञकं तत् ॥

आम्नायाति × धीम × रति यस्सद्भावनागोचरः
स्वेस्वे कर्मणि यः प्रशास्ति पुरुषान् योग्याधिकारक्रमान् ।
अस्पष्टभावमपरीक्षितदुष्प्रवेश-
माचार्यतन्त्रमधिकृत्य दृढप्रकाशम् ।
न्यक्कृत्य पार्थरथसारथिरन्यतन्त्रं
सत्प्रीतये ग्रथितवान् नवरत्नमालाम् ॥
गुरुतन्त्रनियन्त्रितोऽप्यहं
बहुमानादिह पार्थसारथम् ।
विवृणोमि मतान्तरश्रितां
स्थिरभावां नयरत्नमालिकाम् ॥

End :

॥ मीमांसाब्धिमिति ॥ मीमांसैवाब्धिः मीमांसाब्धिश्शब्दा × ममत्वा स्वबुद्धिका + तेन आचार्यैः धीरः पार्थसारथिरिति शेषः ॥

Colophon :

इति श्रीरामानुजाचार्यविरचितन्यायरत्नमालाव्याख्यानन्नायकं सम्पूर्णम् ॥

## 407

Sl. No. 35300 न्यायसङ्ग्रहः Ms. No. C. 683/1

Beginning :

× × विद्वज्जनो मन्यते ।
जातालीनमथापि स्तवद × तानेत्रोत्पलं निर्मलम् ॥
× × गुणादोषवेदिनः ।
गतौतृतीयो गतो विचलत्या षट्को परापरौ । (?)
प्रयुक्तिचिन्तामहवर्णयामः तैरेव मानैः विस + सनाथैः ।

End :

निषेधतो विकल्पःस्यात् ग्रहणात् ग्रहणादिवत् ।
आत्यन्तिकाननुष्ठानमर्थप्राप्तिनिषेधने ॥

पक्षे × विशेषवचनं भवेत् ।
तत्प्रतिकृतिर्नियुज्यते सा चतुस्त्रिंशच्छब्दवाच्यत्वात् ॥

Colophon:

इति श्री भाक्तनृसिंहभट्टोपाध्यायसुत श्री नारायणभट्टविरचिते भट्ट-भावानुसारे न्यायसंग्रहे पञ्चदशोध्यायः ॥

## 408

Sl. . No 35302 पदतत्त्वम् Ms. No. C. 4724/2

Beginning :

× रां चार्थभेदावसेयः ।

न च वर्णाः स्वरूपेण नित्यत्वविभुत्वाभ्यां देशकालोपाधिक्रमं बिभ्रति यद्भेदात्पदभेदः स्यात्; तदन्यदेव पदतत्त्वं यदत्र विलक्षावभासं बोधयन्तीति शब्दतत्त्वविदः प्रतिपन्नाः । अत्रोच्यते—व्यञ्जकध्वनिधर्मस्य व्यङ्ग्यत्वा शेपितस्य च क्रमस्यार्थाभिधाङ्गत्वं दैर्घ्यादेरिव सम्मतम् ॥

End :

एतदुक्तं भवति— अङ्गं हि नाम विधिबलादुपादीयते निमित्तानुरोधा-त्त्यज्यन्त्येते उभयानुग्रहार्थं वा शक्तं प्रत्युपादीयते अशक्तं प्रति नान्या गतिरस्ति तत्रोभया ॥

Colophon :

— — —

## 409

Sl. No. 35305 पिष्टपशुमीमांसा Ms. No. C. 431/1

Beginning :

शिवं प्रणम्य सुमुखं तातनागेश्वरं गुरुम् ।
विप्राणां वाममार्गस्य खण्डनं यत्तदीरितम् ॥
स्फुटीकरोमि तन्मूर्खमुखमर्दनहेतुतः ।
पायगुण्डो वैद्यनाथः काश्यां साधुनियोजितः ॥
धर्मं चर । धर्मेण पापमपनुदति ॥

End;

तदेतत्सर्वं निर्मत्सरैः एव सहृदयैः भगवद्भक्तैः आकलनीयम् ॥ तेषामेवेदं हृदयङ्गमायास्त्विवति अखिलमिति मङ्गलम् ॥

सर्वयज्ञेश्वरो येन सर्वयज्ञफलप्रदः ।
सर्वयज्ञैकभुग्विष्णुः प्रीयतां पुरुषोत्तमः ॥

Colophon :

इति श्रीमन्नारायणोन्नीता पिष्टपशुपिमांसा ॥

## 410

Sl. No. 35306 — पिष्टपशुमीमांसा — Ms. No. C. 897

Beginning :

नमस्कृत्य गुरून् सर्वान् श्रुतितत्त्वविशारदान् ।
पाखण्डखण्डनं कुर्वे श्रुत्यर्थस्यापनेहितम् ॥

यत (?) पशुमीमांसकेन केनचित् पाखण्डपथि मूढान् प्रवर्तयितुं ग्रन्थाभासं चिकीर्षुणा ।

End :

सर्वकर्मसाद्गुण्यार्थकं ब्राह्मणभोजनादिकं पुनः सामान्यशास्त्राप्तमत्राप्यनिवप्यनिवार्यम् । (?) अतः एव मयूखकारः कृच्छ्रान् पू न (?) वर्तमातवपनसाहचर्यात् पञ्चगव्यादेरपि निवृत्तिरित्युपदिष्टवान् ॥

Colophon:

इति श्रीमत्पायगुण्डोपाख्यवैद्यनाथविरचितं पाषण्डखण्डनं परिपूर्णम् ॥

## 411

Sl. .No 35308 — षिष्टपशुमीर्मांसा — Ms. No. C. 1962

Beginning :

शिवं प्रणम्य सुमुखं तातनागेश्वरं गुरुम् ।
विप्राणां वाममार्गस्य खण्डनं यत्तदीरितम् ॥

स्फुटीकरोमि तन्मूर्खमुखमर्दनहेतुतः ।
पायगुण्डो वैद्यनाथः काश्यां साधुनियोजितः ॥
धर्मं चर, धर्मेण पापमपनुदति,
कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत् ।
तस्मान्न लोभात् न मोहात् धर्मं सन्त्यजेत् इत्यादिश्रुतिस्मृतिपुराणादिभिः धर्मस्यावश्यकर्तव्यतोक्ता ।

**End:**

सर्वकर्मसाद्गुण्यार्थकं ब्राह्मणभोजनादिकं पुनः सामान्यशास्त्रप्राप्तमत्राप्यानीय्यनिवार्यम् । अत एव मयूखकारः कृच्छ्रान्यूनव्रते निवर्तमानपनसाहचर्यात्पञ्चगव्यादेरपि निवृत्तिरित्युपदिष्टवान् ॥

**Colophon:**

इति श्रीमत्पायगुण्डोपाख्यवैद्यनाथविरचितपाषण्डखण्डनं परिपूर्णम् ॥

## 412

**Ms. No. 35309** पिष्टपशुमीमांसाखण्डनम् **Sl. No. C. 431/2**

**Beginning:**

अथैतत्खण्डनं शिवदीक्षितकृतं लिख्यते अनुक्रमात्तम् ॥
नमस्कृत्य गुरून सर्वान् श्रुतिशास्त्रविशारदान् ।
पाखण्डखण्डनं कुर्वे श्रुत्यर्थस्थापने हितम् ॥
यच्च पशुमीमांसकेन केनचित् पाखण्डपथि मूढान् प्रवर्तयितुं ग्रन्थाभासं चिकीर्षुणा × इत्युक्तम् ॥

**End:**

पुरुषेणान्यथा विरुद्धं विधिवाक्यं दुरुक्तं तेन प्रेरितो दुरुक्तोक्तः ।
अथवा स्मृतिपूक्तब्राह्मणत्वेन प्रतिपादितो योऽस्ति सोपमो ब्राह्मणोऽस्तु + आद्यस्तु राजभृत्यस्याद्वितीयं क्रयविक्रयी तृतीयो बहुयाजी स्यात् ॥

**Colophon:**

— — —

## 413

Sl. No: 35310 **पूर्वमीमांसार्थसङ्ग्रहः** Ms. No. P. 4164

Beginning :

वासुदेवं रमाकान्तं नत्वा लौगाक्षिभास्करः ।
कुरुते जैमिनिनये प्रवेशायार्थसङ्ग्रहम् ॥

अथ परमकारुणिको भगवान् जैमिनिः धर्मविवेकाय द्वादशलक्षणीं प्रणिनाय । तत्रादौ धर्मं जिज्ञासते । + + + + + +

End :

ईश्वरार्पणबुद्ध्या क्रियमाणस्तु निश्रेयसहेतुः । न च तदर्पणबुद्ध्यानुष्ठाने प्रमाणाभाव इति वाच्यम् । यत्करोषि यदश्नासि इति भगवद्वचनस्यैव प्रमाणत्वात् । स्मृतिचरणे तत्प्रमाणस्य श्रुतिमूलत्वेन व्यवस्थापनादिति शिवम् ॥

Colophon :

इति श्रीमहोपाध्याय लौगाक्षिभास्करोपनामक विरचितपूर्वमीमांसार्थ सङ्ग्रहः समाप्तः ॥

## 414

Sl. No. 35322 **पूर्वमीमांसासूत्रपाठः** M. No. C. 5289

Beginning :

अथातो धर्मजिज्ञासा ।
चोदनालक्षणोऽर्थो धर्मः ।
सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ॥

End :

अनियमो विशेषात् ।
मुख्यो वा विप्रतिषेधात् ।
सत्रे गृहपतिसंयोगाद्धौत्रवत् ।

विप्रतिषेधे परम् ।

प्रभुत्वादार्त्विज्यं सर्ववर्णानाम् ॥

**Colophon :**

इति जैमिनिकृतमीमांसासूत्रे द्वादशस्याध्यायस्य चतुर्थः पादः ॥

## 415

**Sl. No. 35329** **पूर्वमीमांसासूत्रम् (सङ्कर्षकाण्ड)** **Ms. No: A. 343/1**

**Beginning :**

अनुयजनीति ॥

स द्रोणकलशात् ॥

तन्त्रं प्रदा (धा) नम् ॥

शामित्रं तीर्त्वा ॥

ऋत्विग्‍ वा ॥

चयनाङ्गं वा ॥

योग्निम् ॥

गुणचोदना वा ॥

**End :**

प्रत्युञ्चः ॥

पुरस्तादपि ॥

स्वाहाकृत्य ॥

वषट्कृते ॥

स्विष्टकृत् ॥

स्वाहेत्यलेखनः ॥

चित्ताया ॥

भूताना ॥

**Colophon :**

— — —

## 416

Sl. No. 35337 पूर्वमीमांसा सूत्रभाष्यम् Ms. No. P. 3466

Beginning;

× + तव्यो वा एवं वेदवाक्यान्ये × × वेदवाक्यानि विचारयितव्यानि । स्वपदार्थास्त्येयाः तद्यत्नगौरवं प्रसज्येत । तत्र लोके धर्मशब्दो वृत्तादनन्तरस्य प्रक्रियार्थो दृष्टः । न चेह किञ्चिद्वृत्तमुपलभ्यते । भवितव्यं तु तेन, यस्मिन् सत्यनन्तरं धर्मजिज्ञासावकल्पते । तथाहि—

End :

तत्रापि हि सवनीय + × तास्ते + × पाछब्दप्रवृत्ति-विकृतावपि तथैव । यथा छत्रिणो गच्छन्ति ध्वजिनो गच्छन्तीति । यथा वा उक्थ्यो × रूपस्त मा × विंशषोड × वैराजसामेति प्रकृतिलिङ्गेन सामशब्देन वै रूपपृष्ठ इति गम्यते । एवमिडापि × सवनीयानां मांसम × ति ॥

Colophon :

इति शबरस्वामिकृतौ मीमांसाभाष्ये तृतीयस्याध्यायस्याष्टमः पादः । समाप्तश्चाध्यायः ॥

## 417

Sl. No. 35388 पूर्वमीमांसा सूत्रभाष्यम् M. No. P.4058/1

Beginning :

श्रीकृष्णानन्दयोगीन्द्रचरणाम्बुरुहद्वयम् ।
धर्मार्थकाममोक्षाणां निदानं नित्यमाश्रये ॥
जैमिनिं सूत्रकर्तारं शबरं भाष्यकारिणम् ।
तन्त्रवार्तिककर्तृंश्च भट्टाचार्यात् भजाम्यहम् ॥

\+ + + +

[अथातो धर्मजिज्ञासा] ।

लोके येष्वर्थेषु प्रसिद्धानि पदानि सति सम्भवे तदार्थान्येव सूत्रेष्वित्यवगन्त-व्यम् । नाध्याहारादिभिरेषा कल्पनीयेऽर्थः +

**End:**

ननु ततो परमाहुतिं होष्यति सौविष्टकृतेऽवत्ते ततः परमाहुतिर्नास्तीति न प्रत्यभि × × ध्रुवायां भवति ।

प्रत्यभिघार्यते स्विष्टकृदर्थं तु ध्रुवायां भवति ।

प्रत्यभिधारणमिति दर्शयति ×

**Colophon:**

इत्याचार्यशबरस्वामिकृते अध्वरमीमांसाभाष्ये तृतीयस्याध्यायस्य चतुर्थः पादः ॥

## 418

**Sl. No. 35339** पूर्वमीमांसाभाष्यव्याख्या **Ms. No: P. 4069**

**Beginnig**

आभ्यामिति । निगमनवाक्यमेकमित्युसंहारवाक्यमेकमित्यर्थः । कस्य सूत्रावयवस्य व्याख्यानमिति द्वितीये शास्त्रवर्णात् पृच्छति धर्मोजिज्ञासापद स्येत्यत्र अयमभिप्रायः । जिज्ञासा प्रतिधर्मस्य प्राधान्यम् —

**End:**

कश्चिदेवोपादानोपि विध्येकानर्थं पृच्छेत् कस्मात् धर्मो जिज्ञासितव्यः स हिपु रुषनिश्रेयसे संयुनक्ति इतिं प्रतिजानीमहे तदभिधीयते ।

**Colophon:**

१४५तम पत्रे —

इति शालिकनाथकृतायां मन्जुमालायां पञ्चिकायां प्रथमस्याध्यायस्य प्रथमः पादः ॥

## 419

**Sl. No. 35341** मन्जुमाला **Ms. No. A. 871**

**Beginning:**

सृष्टा विद्या नि × × ।

× × वन्देऽपराजितम् ॥

प्रभाकरगुरोर्भावमिति गम्भीरभाषिणः ।

अञ्जसा व्यञ्जयिष्यन्ती पञ्चिका क्रियते ×

. . . . अथातो धर्मजिज्ञासा ॥

. . . . .टीकाकारः प्रयोजनं दर्शयति लोक इत्यादिभाष्यस्येत्यादिना ॥

End :

. . . . .शब्दस्य अतिरिक्तो अर्थो नास्तीति तथा सति वृद्ध क्षति प्राप्तम्। न चेदमुचितं शब्दातिरेकिणां तेषां प्रत्यक्षसिद्धत्वात्। अथायमभिप्रायः ॥

— — —

## 420

Sl. No. 35342 पूर्वमीमांसासूत्रव्याख्या Ms. No. C. 4463

Beginning :

सृष्टिस्थित्यन्तकर्त्री हरिहरविधिभिः सेवितानन्ददात्री
नानातन्त्रोक्तमार्गैर्मुनिभिरपि धिया बालचन्द्रोज्वलांगीम्।
आरक्ताभात्रिनेत्रा × निलया राजराजेश्वरी
सवाचलोद्यातनोतु प्रतिपदकठिने जैमिने सूत्रसंधे ॥
× उकारं प्रोक्तमित्येकारकोशः—

End :

शुभवर्गेऽपवादमात्रं पापग्रहेषु योगगटकेषु सत्सु कारकांशेषु षड्वर्ग सम्बन्धे सति परजातत्वापवाद भवेतत् परजातत्वमित्यर्थः। द्विग्रहे कल्पमुख्यः कारकांशे द्विग्रहयोगे सति कुलमुख्यो भवति ॥

Colophon :

इति श्री नीलकण्ठज्योतिविद्विरचितायां जैमिनिसूत्रव्याखायां सुबोधिन्यां प्रथमाध्यायस्य चतुर्थः पादः। समाप्तः प्रथमोध्यायः ॥

(अयं ज्यौतिषग्रन्थः। प्रमादादत्र पतितः ॥)

## 421

Sl. No. 35343 पूर्वमीमांसासूत्रवृत्तिः Ms. No:C . 4532

Beginning :

नत्वा मुरारेः पदकञ्जरेणून्
महेशितु × गजाननस्य।

देव्या गुरूणां च तेनोमि वृत्तिं
न्यायावलीदीधितिमर्थकल्पाम् ॥

End :

ऋच्यूढं साम गीयत इति श्रुतेः ।
यजुर्लक्षणसूत्रशेषे यजुःशब्दः इति ।
सुगमम् । अग्नीदग्नीन् × × पुरोडाशानलंकुरु प्रोक्षणी—

Colophon :

— — —

## 422

Sl. No. 35344 पूर्वमीमांसाधिकरणानुक्रमणी Ms. No. C. 828

Beginning :

धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्र लक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकः ॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहो बाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात् ॥

End :

सत्रे गृहपतिः कुर्यात्संस्कारस्सर्वकर्मसु ।
आर्त्विज्यं ब्राह्मणस्यैव न्यायः पञ्चदशोदिताः ॥

Colophon :

इति पूर्वमीमासाधिकरणानुक्रमण्यां द्वादशाध्यायस्य चतुर्थः पादः ।
समाप्तश्चायं द्वादशोऽध्यायः ॥

## 423

Sl. No. 35345 प्रकरणपञ्चिका Ms. No. C. 2177/4

Beginning :

स्वाध्यायविधिवाक्यार्थविचारे प्रयतामहे ।
प्रभाकरगुरोः दृष्ट्या मीमांसारम्भसिद्धये ॥

अत्र केचिदाचक्षते । मीमांसाशास्त्रमारम्भणीयमिति । तद्धि वेद-
वाक्यार्थविचारविषयीभूतन्यायनिबन्धनम् ॥

End :

प्रकारोपस्थितो यश्च द्वेधा नासावुपस्थितः ।
तेनौपदेशिको नासौ केवलं × बन्धतः ॥
पूर्वनिवन्धृनिबन्धनमपनेतुं मोवामीगमानेन । (?)
शालिकनाथेन कृतः कृतीनामानन्ददो यत्नः ॥

Colophon :

इति शालिकनाथमिश्रविरचितायां प्रकरणपञ्चिकायां अतिदेशपारायणं नाम प्रकरणं समाप्तम् ॥

## 424

Ms. No. 35348 प्रमाणपारायणम् Sl. No. C. 1583/2

Beginning :

स्वरूपसङ्ख्यार्तफलेषु वादिभि-
र्यतो विवादाद्विबुधा वितेनिरे ।
ततो वयं तत्रातिबोधासिद्धये
प्रमाणपारायणमारभामहे ॥

किं पुनरिदं प्रमाणं नाम । न तावदविसंवादिज्ञानं प्रमाणं, स्मृतेरपि तथाभावप्रसक्तेः ।

End :

स्वरूपमात्रदृष्टं हि वेत्रमाद्यर्थं सरन् पुनः ।
तत्रान्यनाम्नि तां × सदैव प्रतिपद्यते ॥

इत्यभावस्य प्रमाणान्तरत्वे युक्तिः ।

प्राक्तनस्वरूपावग—

Colophon :

इति महाप्राणपणे पञ्चमः परिच्छेदः ॥

## 425

Sl. No. 35349 प्रमेयरत्नम् Ms. No. .C 4721/12

Beginning :

स यत् स्यानदे सति सन्नवतीति स प्रयोजनस्तस्य बोधः । तस्मात् उपास्य एव स भगवान् तदा दुर्ग + विकरणे महाचार्याः, तथा व्योमशरी-

रोऽपि परमात्मा श्रुतौ श्रुतः । इज्यते वारिणा नित्युं यः + + +
इति द्रव्यपदार्थः ॥ अथ गुणेषु—

End :

अन्योन्याभावत्वे प्रतीतिबलात् पदार्थान्तरेहति न च वैलक्षण्ये अन्तर्भावयितुं शक्ये तस्य एकमात्रवृत्तित्वात् । अन्यथा सामान्यापलाप ×

Colophon :

— — —

## 426

Sl. N. 35354 भाट्टचिन्तामणिः Ms. N· C. 2240

Beginning :

× ताभङ्गात् नापि पृषपदार्थस्य ॥ अरात्रीनां प्राप्ततया तद्विध्यनुपपत्तेः । तेन सप्तदशारत्निद्रव्यं वाजपेयोद्देशेन विधीयते । प्राधान्ये च षष्ठी । अव्यवहितान्वयात् प्रकरणानुरोधाच्च पूषपदं चोर्ध्वत्वेन गौणमिति चेन्न–पूषपदे लक्षणापत्तेः ।

End :

पूर्वपठितस्य पुरोडाशपदस्य वाक्यान्तरोपस्थितक्रत्वपूर्वसम्बन्धोपस्थित्या पूर्वसाधनत्वलक्षणायां गौरवमिति न पुरोडाशपदमुद्देशसमर्पकमिति सिद्धान्तयुक्तिर्ज्ञेया ॥

Colophon :

इति गागाभट्टकृतभाट्टचिन्तामणौ तृतीयाध्यायस्याष्टमः चरणः ॥

Extra information :

सूनोरि × × दिनकरस्य कृशापि
वाणी च चित्तजनुषो हृदि सन्निखाता ।
चेतश्च मत्कृतिविधोक्षविकासभावं
भावं तथा दिनकरस्य सुतेऽवदध्यात् ॥
विश्वामित्रकुलध्वजः समभवद्यो भट्टनारायणः
तद्वंशस्य करीरतां भजति यो विश्वेश्वराख्यः कृती ।
गागाभट्ट इति प्रथा दिनकरात्प्राप्तः पितुर्लालनात्
तद्ग्रन्थे समभूत् तृतीयक इहांशो भाट्टचिन्तामणौ ॥

## 427

Sl. No: 35355 भाट्टदीपिकाव्याख्या Ms. No. C. 2242

Beginning :

विधिना त्वेकवाक्यत्वात् कृत्यर्थेन विधीनां स्युः।

विधेः प्रामाण्यं निरूप्य धर्मप्रमाणनिरुपणप्रसङ्गादर्थबादादाविव प्रामाण्यं निरूप्यते।

End :

अतो ब्राह्मणानामेवार्त्विज्यम्।

विश्वामित्रकुलध्वजस्समभवद्यो भट्टनारायणः

तद्वंशस्य करीरतां भजति यो विश्वेश्वराख्यः कृती।

गागाभट्ट इति प्रथां दिनकरात्प्राप्तः पितुर्लालनात्

तस्य ग्रन्थ इहांशको रविमितोऽभूद् भाट्टचिन्तामणौ ॥

समस्त सुकृतस्थितिः + + +

भजेम गुरुविक्रमं दिनकरं तमीशात्मकम्॥

Colophon :

इति श्री भट्टदिनकरतनुजभट्टविश्वेश्वरायरनामकगागाभट्टविरचिते भाट्ट चिन्तामणौ द्वादशाध्यायस्य चतुर्थः। चरणस्समाप्तः अध्यायश्च समाप्तः॥

## 428

Sl. No. 35365 भाट्टदीपिकाव्याख्या(सङ्कर्षकाण्ड) Ms. No. P. 3879

Beginning :

एवं द्वादशभिरध्यायैः प्रकृतिर्विकृतिभेदेन × यान् न्यायान् संशोध्य तैरेव न्यायैरितस्ततो— देदवाक्यार्थनैदम्पर्येण सम्यङ्निष्कृष्य निर्णेतुं एष चतुरध्याय्यारभ्यते॥

End

एतदुत्तरापि व्यासप्रणीता चतुर्लक्षणी शारीरकमीमांसाऽऽस्मज्ञानोपयोगिन्यपि अनुबन्धवेदादिभिर्भिन्नमेव शास्त्रमिति द्योतनाय वाक्याप्र—

प्रतिकारेण याज्यादिपदेन च मङ्गलं ध्वनितमिति सर्वं शिवम् ॥
जैमिनेर्विमलसूक्ति × गम्भीरजो भास्कर: ॥

**Colophon :**

इति श्रीसङ्क्षेपे भाट्टदीपिकायां षोडशोऽध्याय × ग्रेः ॥ (?)
षोडशाध्याय: सम्पूर्ण: ॥

## 429

**Sl. No. 35367** भाट्टदीपिका **Ms. No. P. 5290/1**

**Beginning :**

लक्ष्मीकौस्तुभवक्षसं मुररिपुं शङ्खासिकौमोदकी-
हस्तं पद्मपलाशताम्रनयनं पीताम्बरं शार्ङ्गिणम् ।
मेघश्याममुदारपीवरचतुर्बाहुं प्रधानात् परं
श्रीवत्साङ्कमनादिमीशमनिशं वन्दे विभुं चक्रिणम् ॥
विश्वेश्वरं गुरुं नत्वा खण्डदेवः सतां मुदे ।
तनुते तत्प्रसादेन संक्षिप्तां भाट्टदीपिकाम् ॥

**End:**

पुरोडाशशब्दः सवनीयसम्बन्धिहविःपर इति तस्य सवनीययागलक्षकत्वं सुकरमेव । तदेवं श्रुत्यादिषट्प्रमाणकं अङ्गत्वं निरूपितम् । अतः परं प्रयोज्यत्वं निरूपयिष्यते ॥

**Colophon :**

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां तृतीयाध्यायस्याष्टमः पादः, तृतीयाध्यायश्च ॥

## 430

**Sl. .N 35378** भाट्टदीपिका **Ms. N. C. 1724**

**Beginning :**

अथातः क्रत्वर्थपुरुसार्थयोर्जिज्ञासा—एवं सिद्धे शेषिनिरूपिते शेषत्वे प्रयोजकनिरुपितं प्रयोज्यत्वमिह निरूप्यते । तच्च परोद्देशप्रवृत्तकृतिव्याप्यत्वं चानुष्ठाप्यत्वरूपं कालादिव्यावृत्तं वाजपेयाधिकरणे कौस्तुभ एव उपपादितम् ।

**End :**

यज्ञं व्याख्यास्याम इत्युपक्रम्य ब्राह्मणा ऋत्विज इति कल्पसूत्रकारैः कात्यायनादिभिरार्त्विज्योद्देशेन ब्राह्मणविधानान्मंत्रार्थवादेतिहासादौ चत्तद्रूमक सत्वाच्चब्राह्मणस्यैवार्त्विज्यमिति सिद्धम्। तदेवं निरूपितौद्वादशभिरध्यायैधर्माधर्मौ ॥

जैमिनेर्विमलसूक्तिषुमग्रं
शुद्धिमाय विपुलां मम चेतः ।
प्रीतिमेतु नृहरेः पदपद्मे
येन जन्मनिवहो न पुनः स्यात् ॥

**Colophon :**

इति खण्डदेवकृतौ भाट्टदीपिकायां द्वादशाध्यायस्य चतुर्थः पादः समाप्तः ॥

## 431

**Sl. N. 35380** भाट्टदीपिकाव्याख्या **Ms. N. C. 1201**

**Beginning :**

श्रीगम्भीरविपश्चितः पितुरभूद्यः कोतमाम्बोदरे
विद्याष्टादशकस्य मर्मविदभूद्यः श्रीनृसिंहाद्गुरोः ।
यश्च श्रीशिवभक्तशुद्धचरणैः पूर्णाभिषिक्तोऽभवत्
स त्रेता त्रिपुरत्रयीत्र मनुते तामेव नाथत्रयीम् ॥
मीमांसाशास्त्रजीवातुजैमिन्यादिमुनित्रयम् ।
सरस्वतीं च नत्वाहं व्याकुर्वे भाट्टदीपिकाम् ॥
श्रीखण्डदेवोदितभाट्टचन्द्रिकां
प्रसारयन् षोडशलक्षणीं भुवि ।
स भाट्टचन्द्रस्समुदेति यं व्यधात्
महाग्निचित् भास्कररायभारती ॥
परिपूर्णविद्यां थावय ×
व्यतिरेकानुविधायिनी सती ।

बुधहृत्कुमुदप्रबोध ×
विशदार्था भुवि भाट्टचन्द्रिका ।
प्रारीप्सितस्य ग्रन्थस्याविघ्नताद्यर्थं श्रीचक्रसोमयागौ श्लेषेण स्तौति—
दीक्षाङ्गमिति ॥

**End :**

तेन पाठप्राप्ताग्रतारथन्तरपक्ष एवेति व्यवस्थायास्सिद्धत्वेन तदनुवादमात्र-शङ्काग्रतास्तुत्यर्थं प्रथमवाक्यम् । अत एवोत्तरवाक्यसंयुक्ते पूर्वेवा—

**Colophon :**

इति भाट्टचन्द्रिकायाश्चन्द्रोदयनाम्नि टीकायां भास्कररायस्य कृतौ द्वितीय-सग द्वितीयकः पादः ॥

## 432

**Sl. No. 35379** **भाट्टदीपिकाव्याख्या** **Ms. No. P. 3104**

**Beginning :**

× अन्यांशे नियमरूपोऽपि मन्थनप्रापक एव पर्यवस्यति । मथनस्याग्नि-जननोपायत्वाविशेषेऽपि सुलभोपायेषु बहुषु सत्सु श्रमसाध्योपाये कस्यापि प्रेक्षावतः प्रवृत्त्यभा × ×

**End :**

सङ्गतिं प्रदर्शयन्नुपसंहरति तदेवमिति । सामर्थ्यात् कल्पितं पदमपि दैकवेदेशत्वात् वेदावयवत्वात् प्रमाणमेवेति सूत्रार्थ इति शिवम् ॥

**Colophon :**

इति भाट्टदीपिकायाश्चन्द्रोदयनाम्नि टीकायां भास्कररायस्य कृतौ प्रथमा-ध्याये चतुर्थः पादः ॥

इति श्रीगम्भीराध्वरीन्द्रस्य भारत्युपाख्यस्य सूनोः कवेः भास्करस्य कृतौ चन्द्रिकाटीकने भाट्टचन्द्रोदये पूर्णतन्त्रोऽयमाद्यो मयूखः ॥

## 433

**Sl. No. 35381** **भाट्टदीपिकाव्याख्या** **Ms. No: A. 417**

**Beginning :**

वन्दे ढुण्ढिं महालिङ्गं विश्वेशं मणिकर्णिकाम् ।
ईश्वरश्रीनिवासाद्याहोबिलाख्यगुरूत्तमान् ॥

श्रीभाट्टदीपिकाव्याख्यां भाट्टचिन्तामणिं मुदा ।
दोषसत्वेऽपि कृपया गुणं गृह्णन्तु पण्डिताः ॥

End :

अर्थात् सामर्थ्यात् कल्पनाकल्पितं पदमपि वेदैकदेशत्वात् वेदावयवतुल्यत्वात् प्रमाणमेवेति शिवम् ॥

Colophon:

इति श्रीमच्चोळदेशाग्रपूज्यविद्वत्समाजविराजमानकवेरजोत्तुङ्गतरङ्गशीतकरशीतलशहराजेन्द्रपुरनिवासिकामकायनविश्वामित्रगोत्रजलधिकौस्तुभश्लेषकविसार्वभौमवाञ्छेश्वरसूरिवरप्रपौत्रश्रीमाधवसूरिवरपौत्रश्रीनृसिंहसूरिवरात्मजाश्वलायनसूत्रहोशनिकर्णाटजातीयवाञ्छेश्वरयज्वनः कृतिषु भाट्टदीपिकाव्याख्याने भाट्टचिन्तामण्यभिधाने प्रथमस्याध्यायस्य चतुर्थः पादः ॥

## 434

Sl. No. 35388 भट्टदीपिकाव्याख्या Ms. No. A. 73

Beginning :

अज्ञानतिमिरध्वंसि सत्यज्ञानप्रकाशकम् ।
सर्वाभीष्टप्रदं नौमि श्रीरूपं सुन्दरं महः ॥

यो वेदशास्त्रार्णवपारदृश्वा
यज्ञादिकर्माचरणेऽतिदक्षः ।
सदाशिवाराधनशुद्धचित्त-
स्तं बालकृष्णं पितरं नमामि ॥

श्रीखण्डदेवं प्रणिपत्य सद्गुणं
मीमांसकस्वान्तसरोजभास्करम् ।
अत्यन्तसंक्षिप्तपदार्थतत्कृतौ
प्रभावलीं टिप्पणमातनोम्यहम् ॥

End :

स्वरूपज्ञानस्योक्ताभ्यां प्रमाणलक्षणाभ्यामेव सिद्धेरुत्तरविचारवैयर्थ्यं परिहर्तुं भेदादिनेत्युक्तम् । आदिपदेन विनियोगप्रयोगविधिविषयत्वादिरूपान्तरस्यापि संग्रहः ॥

गम्भीरार्थपदेऽध्याये (?) यदकार्षं तु टिप्पणम् ।
तत्साधनं गुरुकृपा न तु मे बुद्धिवैभवम् ॥

Colophon :

इति श्रीमत्पूर्वोत्तरमीमांसापारावारीणधुरीणश्रीखण्डदेवान्तेवासि कवि-मण्डन शम्भुभट्टविरचितायां भाट्टदीपिकाप्रभावल्यां प्रथमस्य चतुर्थः पादः । समाप्तश्चायमध्यायः ॥

## 435

Sl. No. 35394 **भट्टादीपिकाव्याख्या** Ms. No. A. 79

Beginning :

अथ शम्भुभट्टीयद्वादशाध्यायः प्रारम्भः ॥
अज्ञाततिमिरध्वंसि सत्यज्ञानप्रकाशकम् ।
सर्वाभीष्टप्रदं नौमि श्रीरूपं सुन्दरं महः ॥
श्रीखण्डदेवं प्रणिपत्य सद्गुरुं
मीमांसकस्वान्तसरोजभास्करम् ।
अत्यन्तसंक्षिप्तपदार्थतत्कृतौ
प्रभावलीटिप्पणमातनोम्यहम् ॥

End :

जैमिनेरिति ॥ मन्नसदित्यर्थः । तया श्रुत्या प्रतिबन्धकापगमात् प्रीति-मेत्विति योजना ॥

गूरूपदेशाच्च विभा भावनाभि-
र्निर्णीय मूलार्थमतिश्रमेण ।
कृतं मया टिप्पणमेतदार्यैः
संशोधनीयं गुणदोषविद्भिः ॥ १ ॥

वर्षे नेत्रद्विसप्तद्विजपतिगणिते मासि चेषेकतृक्षे
वारे जैवे प्रभाते सकलपितृतिथौ प्रोष्ठपद्याः परस्याम् ।
काश्यां श्रीवह्रनालो निरुपमचरितः खण्डदेवाभिधानः
प्राप्तः श्रीब्रह्मभावं विबुधवरगुरुः श्रीधरेन्द्रो यतीन्द्रः ॥ ९ ॥

Colophon :

इति श्रीमत्पूर्वोत्तरमीमांसापारावारीणधुरीण श्रीखण्डदेवान्तेवासिकविमण्डन शम्भुभट्टस्य कृतौ भाट्टदीपिकाप्रभावल्यां द्वादशस्य चतुर्थः पादः। समाप्ता चेयं प्रभावली टीका ॥

436

Sl. No. 35397 भाट्टदीपिकाव्याख्या Ms. No. C- 4478

Beginning :

एवं द्वादशभिरध्यायैः प्रकृतिर्विकृतिभेदेन कति यया × न्सं शोध्य तैरेव न्यायैरितस्ततो विप्रकीर्णात्वे वाक्यार्थनैदंपर्येणसम्प × रभ्यते। अत एव संकर्षित प्रत्यधिकरणं —

End :

दधिग्रहमेव प्रकृत्याम्नातं आज्यग्रहणीयात्तैजस्कामस्य सोमग्रहे + + + तृतीयया गुणस्यैव फलभावनाकरणत्वप्रतीतेर्गुणफलसम्भवन्धविधाने व्याज्या × ×

Colophon :

— — —

437

Sl. No. 35402 भाट्टरहस्यम् Ms. No. P. 2950

Beginning :

स्मृति × स्मृतिद्रि पुरारातिं तत्प्रसादावलम्बनात्।
रहस्यं × तन्त्रस्य विशदीकर्तुमीश्महे ॥

तत्र द्वादशलक्षण्यां धर्माधर्माविव जैमिनिनानुष्ठानोपयोगितया विरचितौ। अत एव तेद्यविधर्मक्षरति कीर्तनादेत्यादेका वैषिकतन्त्र (?)

End :

नवीनानां नानामननविशदानामयमहो
सुयुक्तीनां पुञ्जैरिह विरचितः कोपि जगति।
महातर्कस्तर्कप्रयतितमसञ्जाततमसां
सुधाकृन्मीमांसामतकुमुदपूरस्य जयतु ॥

Colopho :

इति श्रीखण्डदेवरचिते भाट्टरहस्ये प्रथमः परिच्छेदः ॥

## 438

Sl. No. 35407 भाट्टरहस्यम् Ms. No. P. 1728

Beginning :

स्मृत्वा स्मृत्वा पुरारातिं तत्प्रसादावलम्बनात् ।
रहस्यं भाट्टतन्त्रस्य विशदीकर्तुमीश्महे ॥
यज्ज्ञानान्नयसाहस्री स्फुटीभवति तत्त्वतः ।
तद्रहस्यं खण्डदेवः प्रकाशयितुमुद्यतः ॥

\+ \+ \+ \+

End :

तदेवं लिङ्गसङ्ख्याव्यतिरिक्तसुबर्थमात्रस्य सिद्धो भावनान्वयः ।
नवीनानां नामतनविशदानामयमहो
युक्तीनां पुञ्जैरिह विरचितः कोपि जहति ।
महातर्कस्तर्कप्रपिततमसन्तमसां
सुधांशुमीशं सामतकुमुदपूरस्य जयतु ॥ (?)

Colophon :

इति श्रीखण्डदेवविरचिते भाट्टरहस्ये प्रथमः परिच्छेदः ॥

## 439

Sl. No: 35409 भाट्टसङ्ग्रहः Ms. No. P. 2180

Beginning :

नत्वा धर्मं वेदगम्यं जैमिन्यादिन् मुनीनपि ।
करोमि बालबोधाय भट्टोक्तन्यायसङ्ग्रहम् ॥

इह खल्वध्ययनादिसम्पत्तिमदधिकारिणमनुष्ठानद्वारा निश्रेयसहेतुवेदार्थभूतधर्मस्वरूपनिर्णयाय वेदकर्तव्यतारूपन्यायनिबन्धनात्मकं शास्त्रं प्रणिनाय भगवान् जैमिनिः ।

End :

अतस्तस्यैव वाक्येन फलसम्बन्धबोधनात् तस्यैव प्राधान्यमन्यस्य तु तदङ्गत्वमिति फलं पूर्वपक्षे दीक्षणीयादीनां प्राधान्याद्विकृतिष्वनतिदेशः । सिद्धान्ते त्वङ्गत्वादतिदेश इति ॥

Colophon :

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रसुधीन्द्रगुरुपादशिष्यराघवेन्द्रयतिकृते चतुर्थाध्यायस्य चतुर्थः पादः ॥

**440**

Sl, No. 35413 भाट्टसारः Ms. No. A. 446

Beginning;

एवं पूर्वषट्के उपदेशाश्चिन्तिताः। उत्तरषट्केचातिदेशाश्चिन्त्यन्त इति षट्कयोर्भेदो ध्येयः। यदन्यसम्बन्धमनपेक्ष्याधर्माणां प्रत्यायकं प्रत्यक्षमानुमानिकं वा शास्त्रं तदुपदेशः। श्रुतस्यैवोपदेशत्वे विश्वजिति फलस्यैवोपदेशिकत्वनापत्तेः। अतिदेशस्तु —

अन्यैत्रैव प्रतीतायाः कृत्स्नाया धर्मसन्ततेः।
अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयत इति ॥

End :

फलचामसविधानच्चोयरेषाम्। सान्नाय्येन च विप्रतिषेधे सोमपीथहेतुत्वात् चतुर्थाधिकरणे च निर्देशात्। अन्वाहार्ये च दर्शनात इति सूत्रचतुष्टये च अनेकलिङ्गान्यपि भाष्ये दर्शितानि। तस्माद्ब्राह्मणानामेवार्त्विज्यमिति।

यदाराधनरूपाणि कर्माणि निखिलान्यपि।
तद्ब्रह्मभे प्रसन्नं स्यादनया कर्मचिन्तया ॥
भाष्यवार्तिकटीकादिनानाग्रन्थावमर्शिना।
श्रीराघवेन्द्रेण यतिना कृतोऽयं भाट्टसंग्रहः ॥

Colophon:

इति श्रीभाट्टसंग्रहे श्रीराघवेन्द्रयतिकृते द्वादशाध्यायस्य चतुर्थः पादः ॥

**441**

Sl. No: 35417 भाट्टसंग्रहः Ms. No. C. 1171

Beginning :

रघुवरचरणद्वन्द्वध्यानसुधास्वादनित्यतृप्तेन।



श्री कृष्णतातसुधिया क्रियते कुतुकेन भाट्टसारोऽयम् ॥

प्रमाणाधीनसिद्धिकतया प्रमेयस्य प्रमाणमादौ निरूप्यते। तत्र प्रमाकरणं प्रमाणम् । अनधिगताबाधितार्थज्ञानं प्रमा ॥

End :

अत एव अग्नींषोमीयपशोः न पूर्णमासामावास्याकालिकत्वं, किन्तु प्रधान भूतसोमस्येति तृतीयचतुर्थपादयोः समुच्चयविकल्पचिन्ता ॥

Colophon :

— — —

## 442

Sl. No. 35418 भाट्टसिद्धान्तमञ्जरी M. No. C. 2420

Beginning :

× नानृतं वदतीत्यश्वाभिधानीमेवमादिषु स्वार्थहानिः परार्थ स्वीकारा × इति त्रिदोषताराग × श्वादौ चोत्तरे हेतीति × प्राप्तषोडशिके षोडश्युत्तरेत्यादिके भवेत् ।

End :

प्रसुत्वादार्त्विज्यंसर्ववर्णानां × ब्राह्मणानामिदं हविः इति लिङ्गात् ब्राह्मणानामार्त्विज्यमिति च स्मृतिः न क्षत्रियविशोः, किन्तु ब्राह्मणस्यैव तद्ध्रुवम् ।

भाट्टसिद्धान्तमञ्जर्यां बालचन्द्रकृताविह ।
सम्पूर्णो द्वादशोऽध्यायो नवषष्टिनयैर्युतः ॥
पञ्चपञ्चाशदधिक शन्तसंख्याककारिकाः ॥

Colophon :

इति द्वादशाध्यायस्य चतुर्थः पादः ॥

## 443

Sl. No: 35419 भावनाविचारः Ms. No. C. 2217

Beginning :

स कोऽपि गोपिकामनोऽनुरञ्जनीनिरञ्जनः ।
करोतु नन्दनन्दनो मुदा मुदास्पदं हरिः ॥

इत्थमाधाननिरूपणानन्तरं तज्जन्याग्निसाध्याग्निहोत्रविषयिणी चिन्ता प्रस्तूयते।

End:

स्वार्थं लः कर्मणीति द्विवचनैरेकतां चैतु × ×

तस्मात्तत्र कर्मार्थक इह सह सकर्मकाद्धातुतो नः।

संज्ञा तङ्साहचर्यात् कगपि च सवता तस्य लस्येति सूत्रम्

विध्यर्थं वास्तु मा तत् जगति विजयते भाट्टमार्गो गरीयान् ॥

Colophon:

मीमांसकरीत्या भावनाविचारः समाप्तिमगमत् ॥

## 444

Sl. No. 35420 भाषारत्नम् Ms. No. C. 2418

Beginning:

कल्पसूत्रस्मृतिपुराणवृद्धवाक्यादिरूपः अष्टकादिबोधकः तस्यापि सूत्रत्वादिना प्रामाण्यम्। अविशेषादुभौ वेति प्रतीकश्रुतिविरुद्धस्य लोभादिमूलकस्य वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णातीत्यादेः इव प्रामाण्य-प्रसङ्गात्।

End:

इति यथामति किञ्चिदुदीरितं

मतविवेकतया व्यपदिश्य यत्।

विरहितेन गुणागुणसंविदा

क्षमत तद्विबुधाः शिशुचापलम् ॥

यदीयकरुणापाङ्गसञ्जातप्रतिभावशात्।

परिष्कृत वचोरत्नं रामैतत्त्वत्पदेऽर्पये ॥

\+ \+ \+

शिशुकौतुकाद्यदिहतद्विाषां

शुकगीरिव प्रमुदमावहतु ॥

वर्षे संख्यापूरणे वत्सराणां
माघे मासे कृष्णपक्षे शुभेऽह्नि ।
एकादश्यां भार्गवे पूर्णमेत-
द्भाषारत्नं रामपातु प्रसिद्धम् ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारीण नैय्यायिकरामपण्डितात्मजलक्ष्मीधर पण्डिततनूजन्म श्रीबालकृष्णपण्डितेन्द्रडिम्भेन वीरेश्वरेण विरचितं भाषारत्नं नाम मीमांसाप्रकरणं समाप्तम् ॥

## 445

Sl. . N 35424 | मयूखावलीसङ्ग्रहः | Ms. N. P. 3952

Beginning :

× त्रिपाद्यां करिष्यमाणस्य विचारस्य शास्त्रसंगतिं तावद्दर्शयति । अथात इति । अथ वेदाध्ययनानन्तरं अतः अध्ययनस्य वृत्तत्वात् धर्मस्य अलौकिकश्रेयस्साधनस्य जिज्ञासा विचारः कर्तव्यः इति ।

End :

उत्पत्तिशास्त्रमपेक्ष्यैव अधिकारशास्त्रद्रव्यत्वं इति भावः । ननु × भेदमात्रमेव शास्त्रभेदे तन्त्रं न तु निरपेक्षत्वादिविशिष्टं गौरवादिति वरं × प्रत्य × उद्भिदेति द्रव्यदेवतस्येति द्रव्यदेवतासम्बन्धानुपपत्ति ×

Colophon:

— — —

## 446

Sl. No. 35427 | मीमांसाकारिका | Ms. No. P. 4612/2

Beginning :

अथातो धर्मजिज्ञासा धर्मार्थो विधिचोदितः ।
तत्प्रमाणं परीक्ष्यं स्यात् व्याख्यातैस्तत्प्रमीयते ॥
विधिस्त × मानमेव नित्यश्शब्दः पदात्मकः ।
न × कथानता नित्यानित्यसमाख्यया ॥

प्रथमः पादः ।

मन्त्रार्थवादः प्रमुखः प्रमाणानीति वार्तिके ।

स्युरर्थवादास्तुत्यर्थाः विधिवन्निग्रहा अपि ॥

End :

याजनाना × ज्ययोर्तिप्रतिषेधपरं बली ।

आर्त्विज्यं ब्राह्मणायैव कुर्युः सर्वेषु कर्मसु ॥

Colophon :

द्वादशोऽध्यायः । चित्रपटः समाप्तः ॥

## 447

Sl. N. 35430 मीमांसाकौस्तुभः Ms. N. P. 1306/2

Beginning :

विघ्नध्वान्तनिवारणैकतरणिः भक्तैकचिन्तामणिः

विद्याकाननगाहन × मच्चित्तभूषामणिः ।

भूयादेष कुतर्ककर्कशधियां हर्ता प्रहर्ता यथा,

मोदा × सुधियां सदैव सविता कात्यानीशात्मजः ॥

End :

तस्मादर्थप्रत्यायनार्थ इति सिद्धं प्रामाण्यम् ॥

मीमांसाम्बुधिं प्रमथ्य विविधैः न्यायोच्चयैः निर्झरैः

कृत्वा जैमिनिसूत्रमन्दरममुं वेदं तथा वासुकिम् ।

यत्कोलाहलसंज्ञमेव कथितं ग्रन्थान्तरं सज्जनैः

श्रीकृष्णस्य तु भूषणाय सपरयः कौस्तुभाख्यो मणिः ॥

Colophon

इति श्रीमत् पूर्वोत्तरमीमांसापारावारपारीणरुद्रसूनोः खण्डदेवस्य कृतौ मीमांसाकौस्तुभे प्रथमस्याध्यायस्य द्वितीयः पादः ॥

## 448

Sl. No. 35437 मीमांसाकौस्तुभः Ms. No. P. 3411

Begining :

विघ्नध्वान्तनिवारणैकतरणिर्भक्तौघचिन्तामणिः

विद्याकाननगाहनैकसरणिर्मच्चित्तभूषामणिः ।

भूयादेष कुतर्ककर्कशधियां हर्ताऽपहर्ता तथा
मोहानां सुधियां सदैव सविता कात्यायनीशात्मजः ॥
शश्वद्बोधतरङ्गा विद्यागङ्गोत्तमांगे यस्य ।
श्रीरुद्रदेवसंज्ञं जनकं वन्दे सदा स्फूर्त्यै ॥

**End :**

मीमांसांबुनिधिं प्रमथ्य विबिधै × योच्च × जरैः
कृत्वा जैमिनिसूत्र × दरमुं वेदं × वासुकिम् ।
× कृतं ग्रन्थान्तरं सज्जनैः
× पणाय स परं यः कौस्तुभाख्यो मणिः ॥

**Colophon:**

श्री रुद्रदेवसूनोः खण्डदेवस्य कृतौ × मांसाकौस्तुभे प्रथमाध्यायस्य × × ॥

## 449

**Ms. No. 35439** मीमांसासूत्रव्याख्या **Sl. No. P. 3563·2**

**Begining :**

विघ्नध्वान्तनिवारणैकतरणिर्भक्तैकचिन्तामणि-
र्विद्याकाननगाहनैकसरणिर्मच्चित्तभूषामणिः ।
भूयादेषकुतर्कशधियां हर्तापहर्ता तथा
मोहानां सुधियां सदैव सविता कात्यायनीशात्मजः ॥
(आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।)
अत्र सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं, वायुर्वै क्षेपिष्ठा देवता इत्यादयोऽर्थवादाः + +

**End :**

(सर्वेषां त्वेकमन्त्यं यतोऽयं सवनाधिकारः ।)
तत्र हेतुपानस्य भाक्तत्वादिति व्याख्येयम् ॥

मीमांसाम्बुनिधिं प्रमथ्य सुदृढैर्न्यायो निर्जरैं
कृत्वाजैमिनिसूत्रमदन् मुदं तथा वासुकिम् ।
यद्धालहलसंज्ञमेव कलितं ग्रन्थान्तरं सज्जनैः
श्रीकृष्णस्य तु भूषणाय स परं यः कौस्तुभाख्यो मणिः ॥ (?)

Colophon :

श्रीरुद्रदेवसूनोः कृतिरेषा खण्डदेवस्य ।
मीमांसकौस्तुभाख्या शेषाध्याये द्वितीयाङ्घ्रे ॥
इति श्रीरुद्रसूनुखण्डदेवकृतौ मीमांसाकौस्तुभे तृतीयाध्यायस्य द्वितीयः पादः ॥

450

Sl. No. 35454 मीमांसाचन्द्रिका Ms. No. C. 2114

Beginning :

नमो नवघनश्यामकामकामितदेहिने । (?)
कामछामसौदामकणकामुकरोहिणे ॥

स्वाध्यायोऽध्येतव्य इत्यत्र स्वर्गार्थमध्ययनं विधीयते । विश्वजिदादिवत् फलाश्रावणात् ।

End :

समाख्या तु कठादिपुरुषेणानादिकठादिचरणपुरुषैव प्रियवचनात् असाधारण्येनाध्यापनात् तस्माद्धर्माधर्मयोर्वेद एव मानं वेदो मानमेवेत्यवधारणद्वयं सिद्धम् । द्वितीयमौत्पत्तिकादिसूत्रैराद्यन्तपूर्वैः सूत्रैः ।

Colophon :

इति परमहंसपरिव्राजकाचार्यनारायणतीर्थाध्यापितश्रीमत्परमानन्दसरस्वतीशिष्यब्रह्मानन्दसरस्वतीविरचितमीमांसाचन्द्रिकायाः प्रथमाध्यायस्य प्रथमः पादः समाप्तः ॥

451

Sl. No. 35455 मीमांसादर्पणम् Ms. No. C. 4442

Beginning :

यज्ञकर्मप्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारः स्वप्रयुक्तस्तदर्थत्वात् । सिद्धेऽतिदेशेऽधुनातिदिष्टानां पदार्थानां मन्त्रसामऽसंस्काराणां द्वारान्तरसम्बन्धनिमित्तान्यथाभावात् ।

**End:**

सामान्यवाची सामशब्दो । विशेषवाचिनो बृहद्रथन्तरादिशब्दश्च गानमात्रे वर्तते । ननु गानविशिष्टायामृचीत्य × निर्णयः सप्तमस्य द्वितीयपादे सिद्धः । सोत्रवक्ष्यमाणविचारोपयोगितया गीतेः सा ×

**Colophon:**

इति श्रीमीमांसादर्पणे दशमाध्यायस्य प्रथमः पादः ॥

## 452

Sl. No. 35456 **मीमांसन्यायप्रकाशः** Ms. No. P. 121

**Beginning:**

× मत्कारूणिकेन भगवता जैमिनिऋषिणा अथातो धर्मजिज्ञासेत्यादिना द्वादशसु अध्यायेषु धर्मो विचारितः । तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः । यथा यागादिः । स च यजेतेत्यत्र स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य विधीयते ।

**End:**

श्रीगोविन्दार्पणबुद्ध्या क्रियामणस्तु निःश्रेयसहेतुः । न च तदर्पण बुद्ध्यानुष्ठाने प्रमाणाभावः । यत्करोषि यदश्नासि यज्जुहो . . णम् । इति स्मृतेः । अस्याश्चाष्टकादिस्मृतिवत्प्रामण्यादित्यन्यत्र विस्तरः ।

क्वाहं मन्दमतिः क्वेयं प्रक्रिया भाट्टसम्मता ।
तस्माद्ध विलसो × × ॥

**Colophon**

× कविना केनापि यूनामूना
नानापण्डितमौलिभूषणलसाभाधीराङ्करेणेधुना । (?)
श्रीरामेश्वरसूनुना कुशलिना देव्याः कृपाभाजिना
ग्रन्थोऽयं लिखितो मु × णे नमः ॥

## 453

Sl. N. 35460 **मीमांसान्यायप्रकाशः** Ms. N· C. 1005

**Beginning:**

यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलम् ॥

अनन्तगुणसम्पन्नं अनन्तभजनप्रियम् ।
अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणम् ॥

इह खलु परमकारुणिकेन भगवता जैमिनिऋषिणा अथातोधर्मजिज्ञासेत्यादिना द्वादशस्वध्यायेषु धर्मः विचारितः ।

End:

अस्याश्च अष्टकादिवत् प्रामाण्यादित्यन्यत्र विस्तरः ॥

+ + +

ग्रन्थरूपो मदीयोऽयं × व्यापारः सुशोभनः ।
अनेन प्रीयतां देवः गोविन्दो भक्तवत्सलः ॥

Clophon:

इति अनन्तदेवसूनुना आपदेवेन कृतं मीमांसान्याप्रकाशसंज्ञकं मीमांसा प्रकरणं समाप्तम् ॥

## 454

SI. No: 35462 मीमांसान्यायप्रकाशः Ms· No. C. 2701

Beginning:

वन्दे श्रीसच्चिदानन्दपादद्वन्द्वसरोरुहम् ।
वन्दारु × ह्लादिद्वन्द्वतापोपशान्तये ॥ १ ॥
यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलम् ॥ २ ॥
अनन्तगुणसम्पन्नमनन्तभजनप्रियम् ।
अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणम् ॥ ३ ॥

इह खलु परमकारुणिकेन भगवता जैमिनिना ऋषिणा अथातो धर्मजिज्ञासेत्यादि ।

End:

क्वाहं मन्दमतिः केयं प्रक्रिया भट्टसम्मता ।
तस्माद्भक्तेर्विलासोऽयं गोविन्दगुरुपादयोः ॥
ग्रन्थरूपो मदीयोऽयं वाग्व्यापारस्सुशोभनम् ।
अनेन प्रीयतां देवो गोविन्दो भक्तवत्सलः ॥

विविधविषयधर्मग्रहिमुग्धेक्षणानां
प्रणतभयविहंतद्ब्रह्म यत्तन्नतोऽस्मि ॥

Colophon :

इति श्री अनन्तदेवसूनुना आपदेवेन कृतं मीमांसान्यायप्रकाशसंज्ञकं मीमांसाप्रकरणं समाप्तम् ॥

455

Sl. No. 35467 मीमांसापरिभाषा Ms. No. P. 3304

Beginning :

सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ।
गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥
बालानां शास्त्रसिद्धार्थलेशबोधाय धर्मतः ।
मीमांसापरिभाषेयं क्रियते कृष्णयज्वना ॥

इह खलु महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायां —

End :

मुख्ययागक्रमादभिघारणक्रम इत्येवं श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिक्रमैरेव कर्मानुष्ठानं, अन्यथाऽनुष्ठाने वैगुण्यमित्यलम् ॥

Colophon :

इति श्रीकृष्णयज्वकृता मीमांसापरिभाषा सम्पूर्णा ॥

456

SI. N.35469 मीमांसापादुका Ms. N. B. 292

Beginning :

यत्र श्रीर्नित्यहृद्या निरुपधिगृहिणी नन्दति च्छन्दवृत्त्या
यस्यापत्यं प्रजेशप्रभृति विहरणं यस्य विष्वक्परार्थम् ।
लीलाभोगापदेशव्यतिभिदुरमिदं यस्य विश्वं विभूतिः
सत्तासिद्धानुकम्पा निधिरवतु स नः सप्तलोकीगृहस्थः ॥

End :

शाक्योलूक्याक्षपादक्षपणककपिलामर्त्यवन्द्यप्रधानैः
अन्यैराम्नायचर्चाकवचधृतिकनद्रोमुखद्वीपिभिश्च ।
बध्नीयः क्षोभितविश्रुतिरिह बहुधा जायमानेन वेगान्
प्राक्कालेकालेऽभिगुप्ता कलहमतितरा त्यक्षतां रक्षतान्नः ॥

Colophon :

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु मीमांसापादुका सम्पूर्णा ॥

## 457

Sl. No. 35470 — मीमांसापादुकाटीका — Ms. No. SB 293

Beginning :

श्रीमत्त्रय्यन्तसिद्धान्तदेशिकेन्द्रस्य सूनुना ।
वर्ण्यते वरदार्येण मीमांसापादुकान्वयः ॥

आचार्यः खलु श्रीमद्रामानुजार्यप्रणीतां शारीरकसिद्धान्तप्रक्रियामभिरक्षितुं पुनः सेश्वरमीमांसामास्थाय शावरादिभाष्यव्यावृत्तं बोधायनवृत्त्यनुसारि व्यारचयन् × परसमाध्यादिसिद्ध्यर्थं मङ्गलमाचष्टे ।

End :

केवलं प्रत्यक्षसिद्धप्रज्ञाभिवृद्धभावानुवादमात्रमिति न रागप्राप्तत्वविरोधो मीमांसाश्रवणस्येति पश्यन्तु सन्तः ॥

Colophon :

— — —

## 458

Sl. No. 35471 — मीमांसाबालप्रकाशः — Ms. No. C. 1358

Beginning :

अथ द्वादशलक्षण्याः संक्षिपत्यत्र शङ्करः ।
जिज्ञासुभ्योऽतिबालेभ्यो विस्फुटं गहनं ततः ॥ १ ॥
लक्षणशब्दो मीमांसाशास्त्रे प्रमाणाध्याययोर्दृष्टा ।
चोदनालक्षणोऽर्थो धर्मः । अथातः शेषलक्षणमिति ।

**End :**

निर्वापयोर्लोकेऽपि सत्वेन व्यभिचारान्न दर्शपूर्णमासिकयोरेवोपस्थितिः सम्भवतीति सिद्धान्तिनोक्त लिङ्ग विहितौ यावालम्भननिर्वापाविति विशेषणान्नायं दोष इत्याशङ्क्य एवं तर्हि लिङ्गोऽनुवादकत्वाद्गुणविधिन लभ्यते। उभयाश्रयणे च युगपद्विध्यनुवादविरोध इत्युत्तरितमिति॥

**Colophon :**

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरन्धर श्रीमद्भट्टनारायणात्मज भट्टशङ्करकृते मीमांसाबालप्रकाशे द्वादशाध्यायः॥

## 459

**SI. N. 35473** **मीमांसामकरन्दः** Ms. N. P. 8604/2

**Beginning :**

× श्चिरवर्तिनीं क्षितितले पुष्णातु कृष्णाम्बुदः
कश्चित्तापहरोगृहीतकमलः कल्लोलिनीवल्लभात्।
धिन्वन् जीवनदानतो जगदिदं तन्वन्नदीनां श्रियं
प्राप्तः साधुकदम्बजृम्भणकरः श्रीवेङ्कटक्ष्माधरः॥

\+ \+ \+ \+

तत्सुतो वेङ्कटाचार्यस्तर्कव्याकृतितन्त्रवित्।
तनोति धीमान्मीमांसामकरन्दं सतां मुदे॥

एवमपि प्राशस्त्ये लक्षणा दुर्वारैव। लक्षित एव प्राशस्त्यहेतोः समर्पणादित्यास्तां विस्तरः। तदर्थशास्त्राद्वाक्यनियमाद्बुद्धशास्त्रादविद्यमानवचनादर्थविप्रतिषेधात्स्वाध्यायवदवचनादविज्ञेयानित्यासंयोगागान्मन्त्रानर्थक्याम्॥

**Colophon**

— — — —

## 460

Sl. No. 35475 **मीमांसाप्रशंसा** Ms. No: P. 4583/1

Beginnig

क्षणिको हि प्रयोगः सः धात्वर्थस्य भावनया भावनायाश्च धात्वर्थेन सहाव्यभिचरितसम्बन्धात् । आह च —

याद्दशी भावनाख्याते धात्वर्थश्चापि याद्दशः ।
नासौ तेनैव रूपेण शक्यतेऽन्यैः पदैः क्वचित् ॥
आख्यातवर्ती धात्वर्थः साध्यरूपः प्रणीयते ।
साध्यात्मकोऽपि धात्वर्थो यदा नाम्नाभिधीयते ॥

End :

न तु भावनयाव्यभिचरितसम्बन्धानां साध्यादीनां अपेक्षास्तीत्यतोऽशापेक्षाण्येव भावना, तस्यां च यागस्य करणत्वाद सोमस्य करणत्वान्यथानुपपत्तिप्रसूतमत्वर्थलक्षणा सोमपदे सोमवतेति सिद्धम् ॥

Colophon :

इति श्रीमद्बालदेवात्मजबाबादेवेन कृता शास्त्रप्रशंसा ॥
श्री जगदीशसूनुर्विजयते ।
बालदेवस्य विदुषो बाबादेवेन सूनुना ।
वि × ईशसूनु चरणकमलेषु मच्छिरपातः ॥

## 461

Sl. No. 35477 **मीमांसासारसंग्रहः** Ms. No. C. 4507

Beginning :

आम्नायस्य 'क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते । अस्याः । अध्ययनस्य फलभावनाख्यक्रियार्थत्वात्प्रामाण्यं धर्म इत्युक्तं पूर्वम् ।

End :

अचार्यैरधिकरणान्युक्तानि सहस्रसंख्यानि ।
तत्सिद्धान्तान् पादैस्तत्संख्यैर्भट्टशङ्करोऽबध्नात् ॥
चकार केशवो ग्रन्थं मीमांसासारसंग्रहम् ।
प्रीयतां तेन विश्वात्मा भवानीशङ्करः सदा ॥

**Colophon :**

इति श्रीभट्टविश्वनाथात्मजाहिताग्निकेशवविरचिते मीमांसासारसंग्रहे भट्टशङ्करीयकारिकाविवेचने अधिकरणमालादिग्रन्थफक्किकासंग्रहे द्वादशाध्यायस्य चतुर्थः पादः ॥

## 462

**Sl. No. 35479** वार्तिकटीका **Ms. No. C. 4375**

**Beginning :**

अर्थवादमन्त्रनामधेयानि धर्मे प्रमाणानि तेभ्यः × प्रमित्यनुदयात् । अर्थवादानां चाख्यायिकादिप्रतिपदानेनेति एकोक्षतया (?) सन्निहितविध्येक वाक्यत्वयौगात् ।

**End :**

भाष्येऽङ्गोपकृतिस्तथा । करणशक्त्यैक्यात् तद्बद्धोधकांगजन्योपकारैक्यं अंगबहुत्वं तु × कार्यभेदात् यथौदनानिष्पादकस्थालीकाष्ठतण्डुलादि कारक मे ×

**Colophon :**

— — —

## 463

**Sl. No. 35481** वाक्यार्थपद्धतिः **Ms. No. A. 805**

**Beginning :**

× नत्वा गुरूनपि गुरोः कुर्वे वक्यार्थपद्धतिम् ॥

तत्रादावेव लक्षणमुच्यते । वेदत्वं नाम प्रमाणवाक्यत्वम् । प्रामाण्यं नामानपेक्षत्वम् । तेन स्मृत्यादिवाक्ये नातिव्याप्तिः । स च वेदस्तावत्सामान्यतो द्विविधः । मन्त्रो ब्राह्मणं च । मन्त्रोऽपि तावद्विविधः ।

**End :**

अध्ययनस्य काम्यतानिविष्टत्वेन अविधायकत्वेन विधेयत्वायोगात् । किञ्चेदं नियमद्वयसाधारणं दूषणं क्रत्वनुप्रवेशाभावेन स्वाध्यायाध्ययननियमासंभव इति ॥

**Colophon :**

— — —

## 464

Sl. No. 35483 **वाक्यार्थरत्नम्** Ms. No. B. 376/1

Beginning;

उपास्महे महो रामनामकं यन्नियोगतः ।
नियुक्तोऽधिकृतः कर्मकर्तेष्टफलमश्नुते ॥
रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥

End :

इत्थंप्रकारस्तु गुरोस्सम्प्रदायः प्रदर्शितः ।
यथाश्रुतं यथाप्रज्ञं विद्वद्भिः परिगृह्य ताः ॥
इति श्रीवत्सदूर्वासमारयार्यस्य सूनुना ।
अहोबलेन वाक्यार्थ रत्नंप्राकाशि सूरिणा ॥

Colophon :

इति वाक्यार्थरत्नं सम्पूर्णम् ॥

## 465

Sl. No: 35486 **वायार्थरत्नव्याख्या** Ms. No. A. 723/b

Beginning :

कृष्णं गोविन्दमनिशं श्रीगोपीजनवल्लभम् ।
वन्दे पार्थरथारूढं ज्ञानमुद्रालसत्करम् ॥
सुवर्णपदसंहत्या मुद्रयाभीष्टया गुरोः ।
वाक्यार्थरत्नं सुधियां धृतये योजयाम्याहम् ॥

इह मङ्गलारम्भा ग्रन्थाः प्रचीयन्ते निष्प्रत्यूहं परिसामाप्यन्ते चेति वचनेन + मङ्गलमादावारचयति ।

महः — उपास्महे इत्यन्वयः ।

End :

तेन धर्मसमाख्यया ब्रह्मसमाख्यया च यो रामो वेदशिरःप्रतिपाद्यो वाक्यार्थरत्नसमर्पणेन स रामः प्रीतो भवत्वित्यर्थः ॥

Colophon :

इति मारयार्यतनयेन अहोबलदेवेन विरचितायां वाक्यार्थरत्नप्रकाशिकायां सुवर्णमुद्रिकायां स्वर्गकामविदन्यनियोज्यपरत्वनिरूपणं नाम चतुर्थः परिच्छेदः समाप्तः ॥

**466**

Sl. No. 35489 वाददिनकरः Ms. No. P. 5910

Beginning :

× × × ×

अथातो धर्मजिज्ञासेतिसूत्रे को धर्मः कथंलक्षणकः कोऽस्य साधनानि किंपरश्चेति भाष्ये अकारप्रश्लेषेण च + धर्माधर्मनिरूपणं प्रतिज्ञातम् ।

End :

वाजपेयेनेष्ट्वेतिवत् साहित्यबोधकमिति × स्तोत्रोपकरणस्य स्तोत्रार्थत्वेन प्रयोजनापेक्षत्वात् । न च ध्रुवचमसोन्नयनयोरवदानरूपत्वेन सोमयागोपक्रमत्वात् सोमहोमे च सोमयागसमाप्तेस्तन्मध्यपतितानां स्तोत्राणां आमनहोमवत् सोमयागार्थत्वमिति वाच्यम् । स्तोत्रप्रकरणस्य ध्रुवचमसोन्नयनकालार्थसंयोगेनैव स्तोत्राणां तन्मध्यपातसिद्धेरिति ॥

रामेश्वरप्रपौत्रो नारायणशर्मणः पौत्रः ।

श्रीरामकृष्णसुनुर्दिनकरशर्मा × × ॥

Clophon :

इति श्रीमद्रामेश्वरसूनुनारायणसूरिरामकृष्णात्मजदिनकरकृते वाददिनकरे चतुर्थाध्यायस्य चतुर्थः पादः, अध्यायश्च समाप्तः ॥

**467**

Sl. No: 35490 वादोद्योतः Ms. No. B. 1049

Beginning :

देवर्षिरक्षस्सङ्घानां अवाङ्मनसगोचरम् ।
प्रत्यक्षमपि तद्धाम सर्वदा समुपास्महे ॥
द्विजराजैकमूर्धन्यं वृषारूढं शिवान्वितम् ।
काश्यां सर्वोपदेष्टारं भावये शङ्करं गुरुम् ॥

End :

अनेनाभिप्रायेणोक्तं लक्षणं हि पुरोडाशावनया यो हि कालस्येति सूत्रे दशमेनांगवेलायामागन्तव्यमितिवत् कालोपलक्षकता पुरोडाशयोः न विशेषणता स च काल आग्नेयादनन्तर इति ॥

Colophon :

इति श्री जगद्गुरुनारायणभट्टसूनुमीमांसापारावारीण भट्टशङ्करात्मजभट्ट रङ्गनाथदामोदरनृसिंहानुजभट्टनीलकण्ठकृतौ वादोद्योते लक्षणापरिच्छेदः समाप्तः ॥

## 468

Sl. No. 35493 विधिदर्पणः Ms. No. P. 127

Beginning :

यस्स्मृत्यैव विनापि कालनियमं द्रव्यव्ययं चार्थिनां
सर्वेषां युगपच्चतुर्विधफलप्राप्तौ निधानात्मकः ।
धर्मः सिद्धवचोऽपि शोधितवपुः शब्दान्तरादौ भिदा
माने सत्यपि रुपभेदरहितस्तं रामरूपं भजे ॥
आकृष्टे × × चाधिकार्थप्रदम् ॥
कोल्लरीकुलपाथोधिसुधाकरमहं भजे ।
जननीं जनकाम्बां च लक्ष्माम्बां सोमयाजिनं ॥
गतमात्सर्यविदुषः प्रणम्य शिरसा मुहुः ।
तेषामनुज्ञां सम्प्राप्य करोमि विधिदर्पणम् ॥

End:

ततश्च प्रकृतोद्देश्यसम्बन्धित्वेन प्रकृतधात्वर्थप्रतियोगिकत्वेन प्रकृतविध्य विधेयप्रकृतधात्वर्थानुष्ठानभिन्नेतरनिवृत्तिफलको विधिः परिसंख्याविधिरिति लक्षणार्थः पर्यवस्यति इति समञ्जसमिति ॥

Colophon :

इति कोल्लूरिनारायणशास्त्रिविरचिते विधिदर्पणे विधित्रयनिरूपणं सम्पूर्णम् ॥

**469**

**Sl. .N 35496** **विधिरसायनम्** **Ms. N. P. 216/1**

**Beginning :**

विख्याता मुनिवर्यसूक्तिषु विधास्तिसो विधिस्रोतसां
आचार्यैर्विशदं विविक्तविषयास्ताश्च व्यवस्थापिताः।
किं तत्रास्ति विचार्यमार्यमथिते मार्गे निसर्गोज्ज्वले
नानोदाहरणैस्तु ताः प्रविशदीकर्तुं प्रवर्तामहे ॥

**End :**

एवं प्राप्ते भणामस्त्रिविधविधिजुषां लक्षणानां विभागं
दृष्टार्थो यः स सर्वो भवति नियम इत्यभ्युपेत्य व्यवस्थाम्।
अर्थाद्वा शब्दतो वा स्वविषयगलितादेवकाराद्वचो वा
यः स्यात्कस्यापि बाधः स भवति परिसंख्येति रीतिं च कृत्वा ॥

**Colophon:**

— — —

**470**

**Sl. No. 35497** **विधिरसायनम्** **Ms. No. P. 432/1**

**Beginning :**

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः॥
यत् कुमारिलमतानुयायिना
निर्मितं विधिरसायनं मया।
पद्यरूपमनतिस्फुटाशयं
तम् सुखावगतये विविच्यते ॥
प्रारिप्सितस्य + समाधत्ते ×
विख्यातं मुनिवर्यसूक्तिषु +
किन्तु प्रवर्तामहे ॥

End :

प्रकृतौ विकल्पितस्य षोडशिग्रहाभावस्य निवृत्तेरभावेन षोडशिग्रहप्राप्तौ तदभावनिवृत्तेरभावे निवृत्तिनित्यत्वासंभवात् इतिचेन्न अभेदेपि व्याप्तिसत्वेन तत्संभवात्, भेदगर्भव्याप्तेरविवक्षितत्वात् ॥

Colophon :

— — —

## 471

Sl. No. 35504 विधिरसायनखण्डनम् Ms. No. C. 1267

Beginning :

विध्यादित्रयलक्षणानि रचितान्याचार्यवर्यैर्निरा-
कुर्वन्तोऽप्पयदीक्षिता व्यरचयन् सिद्धान्तजाते क्वचित् ।
आक्षेपं त्विह कुर्वते बहुमतीं श्चैतन्नरासाक्षमाः
तेषामेष कृते तु शङ्करबुधस्यारम्भ उज्जृम्भते ॥

End :

अन्यथा अवघातादिप्राप्तिः अवघाताङ्गनिवृत्तिनियता न भवतीति तत्र लक्षणं न वर्तेतेति । इति त्रिचत्वारिंशत्तमश्लोकदूषणम् ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यभट्टनारयणात्मज भट्टशङ्करकृतं विधिरसायनदूषणं समाप्तम् ॥

## 472

Sl. No. 35509 विधिरसायनव्याख्या Ms No. P. 2948

Beginning :

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयस्स मे दिशतु शाश्वतिकं मुकुन्दः ॥

यत्कुमारिलमतानुसारिणा
निर्मितं विधिरसायनं मया ।
पद्यरूपमनतिस्फुटाशयं
तत्सुखावगतये विविच्यते ॥

प्रारिप्सितप्रकरणाविघ्नपरिसमाप्तये सूत्रकारस्य महर्षेरनुस्मरणरूपमङ्गलमाचरन्नेव प्रकरणारम्भं तावदाक्षिप्य समाधत्ते ।

**End :**

तत्र षोडशिग्रहप्राप्तिव्यतिरिक्तायास्तत्प्रकृतौ विकल्पितस्य षोडशिग्रहाभावस्य निवृत्तेरभावेन षोडशिग्रहप्राप्तौ तदभावनिवृत्तिनियतत्वासम्भवात् इति चेन्न अभेदेऽपि व्याप्तिसत्त्वेन तत्सम्भवात् भेदगर्भव्याप्तेरविवक्षितत्वात् ॥

**Colophon :**

विधिरसायनं समाप्तम् ॥

## 473

**Sl. No. 35510** विधिरसायनव्याख्या **Ms. No. P. 6773/b**

**Beginning :**

जन्मस्थेमलयं समस्तजगतां यस्यैव लीलायितं
यस्मिन्नायतते भवास्थिरमहारोगक्षयः प्राणिनाम् ।
तद्ब्रह्मादिभिरप्यगम्यविभवं विश्वाधिकं शाश्वतं
साम्बं ब्रह्म रसालमूलरसिकं साक्षात्क्रियासंसदा ॥

यत्कुमरिलमतानुसारिणा
निर्मितं विधिरसायनं मया ।
पद्यरूपमनतिस्फुटाशयं
तत्सुखावगतये विविच्यते ॥

प्रारीप्सितस्य प्रकरणस्याविघ्नपरिसमाप्तये सूत्रकारस्य महर्षेरनुस्मरणरूपं मङ्गळमाचरन्नेव प्रकरणारम्भं तावदाक्षिप्य समाधत्ते ॥ विख्याता ॥

End :

'सर्वोऽपि विधिर्नियमविधिरिति सर्वोऽपि निषेधः परिसङ्ख्या × ङ्गीद्धृत्यापूर्वविध्यादीनां लक्षणानि विभज्य दर्शयिष्यन्त इत्यर्थः। तानेव लक्षणान्याह—

Colophon:

६७ तमे पत्रे—

इति श्रीमदप्पयदीक्षितस्य कृतौ विधिरसायनस्य सुखमुखोपयोगिन्यां त्रिविधलक्षणाक्षेपे परस्परातिदेशः ॥

## 474

Sl. No. 35512 विधिरहस्यम् Ms. No. C. 2257

Beginning :

तत्राभिधा सपूर्वकल्पो भावनाज्ञानतत्प्रवर्तकम्। तस्मिन् सत्य-प्रवृत्तेश्चेति मूलम्। तस्यायमाशयः—

अभिधा नाम पदार्थविशेषः। प्राकट्यापरनामा विधिनिष्ठो याग-जनकः विधिना वा यागोऽभिहित इति प्रतीतिसिद्धः। तस्यैव ज्ञानं प्रवर्तकम्।

End:

अतः स्वीयसाध्याकरणत्वव्याप्यसम्बन्धावच्छिन्नप्रतियोगितत्पुरुषाभाव-विशिष्टसन्ध्याकालत्वमेव कालिकसम्बन्धेन तत्पूरुषीयप्रत्यवायं प्रति स्वरूप-सम्बन्धेन हेतुरिति वक्तव्यमिति न काप्यनुपपत्तिः ॥

Colophon :

इति विधिरहस्यम् ॥

## 475

Sl. No. 35514 विधिसुधाकरः Ms. No. P. 3075

Beginning :

श्रीमद्रामानुजार्यं श्रुतिशिखरिशिखाधाविमेधाविभास-
प्रोद्यद्व्याहारशुम्भैर्विदर × कुमताडम्बरं तं भजामि।
यद्भाष्याम्बोधिगर्भप्रसृमरसुमहायुक्तिवीचीविहारः
नेदुरन्ते विक्षिप्तप्रतिकथकघटादूषणा हि तृणानि ॥

शेषार्यवंशवार्धीन्दुरनन्तायार्यकोविदः ।
नत्वा × लादिमाचार्यान् वक्ष्ये विधिसुधाकरम् ॥

विधिनिषेधार्थवादरूपेण वाक्यं त्रिविधम् । तत्र प्रवर्तकं वाक्यं विधिः ।

End :

तन्निर्धारणानियमस्तत्र दृष्टेः × यध्यप्रतिबन्धः फलमिति सूत्रे तथोक्तत्वात् अप्रतिबन्धप्रयोजकत्व × फलकर्मविशिष्ट-प्रतिब × च्छेदकीभूताभावप्रतियोगित्वरूपमुत्तेजकत्वं सिषाध-यिषायां अनुमित्यप्रतिबन्धप्रयोजकत्वस्य सिद्धिनिष्ठाप्रतिबन्धक ×

## 476

Sl. No. 35513 विधिविचारः Ms. No. ·P 5403/4

Beginning :

विधिरत्यन्तमप्राप्तौ पाक्षिके नियमः स्मृतः ।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्या निगद्यते ॥

विधिस्त्रिविधः । अपूर्वविधिः नियमविधिः परिसङ्ख्याविधिश्चेति ।

End :

तत्र चाश्वगर्दभरशनासाधारणस्य रशनाशब्दस्याश्वाभिधानीमित्यादिना-श्वरशना विधीयते । सोऽयं परिसङ्ख्याविधिः ॥ एवं पञ्च पञ्च नखा भक्ष्या इत्यादावपि द्रष्टव्यम् ॥

Colophon :

— — —

## 477

Sl. No. 35519 शास्त्रदीपिका Ms. No: P.291 1

Beginnig :

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते । अथातो धर्मजिज्ञासेत्यत्र प्रमाणस्वरूपसाधनफलैः साङ्गैर्धर्मो जिज्ञास्यत्वेन प्रतिज्ञातः ।

**End :**

ब्राह्मणादीनां इदं हविरित्येवमादीनि ।
तस्मात् ब्राह्मणानामेवार्त्विज्यमिति सिद्धम् ।
मध्ये तन्त्रं यस्य एषां विधानं
तेषु प्रोक्तो मुख्यतन्त्रप्रसङ्गः ।
जिज्ञास्यौ यो धर्म उक्तश्चतुर्धा
सप्रज्ञातैर्लक्षणैः द्वादशान्तैः ॥

**Colophon :**

इत्युपाध्यायपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां द्वादशाध्यायस्य चतुर्थः पादः ॥

## 478

**Sl. No: 35531** **शास्त्रदीपिका** **Ms. No. C. 1663**

**Beginning :**

लक्ष्मीकौस्तुभवक्षसं मुररिपुश × कौमोदकी-
हस्तं पद्मपलाशताम्रनयनं पीताम्बरं शार्ङ्गिणम् ।
मेघश्याममदारयीवरचतुर्बाहुं प्रधानात्परं
श्रीवत्सांकमनाथनाथममृतं वन्दे मुकुन्दं मुदा ॥
शबरस्वामिनं नत्वा × वार्यं च जैमिनिम् ।
कुमारिलमतेनाहं करिष्ये शास्त्रदीपिकाम् ॥

**End :**

चोदनैकवाक्ययतया चोदनामूलतया च प्रमाणीभवता चोदनाविषयेणावधारणेन प्रामाण्यं निरस्तम् । नापि साधितं उपरितनेन तु पादत्रयेण तत्साधयिष्यते । यथाह—

प्रमाणत्वमिदं प्रसिद्धमुक्त्वेह धर्मं प्रति चोदनायाः ।
अतः परं तु प्रविभज्य वेदं त्रेधा ततो वक्ष्यति तत्र योऽर्थः ॥

**Colophon:**

इति श्रीपार्थसारथिमिश्रकृतौ शास्त्रदीपिकायां प्रथमस्याध्यायस्य प्रथम पादः ॥

## 479

Sl. No. 35539 शास्त्रदीपिकाव्याख्या Ms. No. C. 315

Beginning :

श्रीरामकृष्णपितरं नमाख्यां च मातरम् ।
श्रीरामं च शिवं नत्वा व्याख्यास्ये शास्त्रदीपिकाम् ॥
यस्तु राणकचौर्येण स्वपाण्डित्यं प्रकाशयत् ।
निनिन्द बहुभाषिवास्तस्य शिक्षेह तन्यते ॥
मूर्खान् प्रतारयन् बालान् यः सिद्धान्तमनीनशत् ।
विन्यस्य तस्य शिरसि दशार्धं कमलाकरः ॥

End :

\+ मांसेन पयस्याद्ययोगात्तत्स्थाने मांसं भवतीत्यर्थः ।
रामकृष्णतनूजेन कमलाकरशर्मणा ।
योऽत्र श्रमः कृतस्तेन प्रीयतां ताटकान्तकः ॥

Colophon :

इति श्रीमज्जगद्गुरुमीमांसकसार्वभौमरामेश्वरभट्टसूनुनारायणभट्टसुतरामकृष्णभट्टात्मजसकलविद्याविशारदमहामहोपाध्यायकमलाकरभट्टकृते शास्त्रदीपिकालोके तृतीयोऽध्यायः ॥

## 480

Sl. No. 35542 शास्त्रदीपिकाव्याख्या Ms. No. · 1294

Beginning :

निवीतमिति । प्रासङ्गिकं समाप्य प्रकरणस्य श्रुत्यादित्रयेण सह विरोध × प्रकृतावुत्कर्षानुष्कर्षौ वक्तुं गुणा × विध्यर्थवादविचारमाह दर्शेति । उपवीतविध्येकवाक्यतया अर्थवादत्वस्य सिद्धेः कथं विधित्वशङ्कत्याशङ्काविधिं —

End :

आज्यसांनायादिधर्मैः वैपरीत्यापत्तेः विनिगमनाविरहेण त्रयाणां प्रकरणात् । न चात्र तथेत्याह—सर्वं चेति फलितमाह—तस्मादिति । प्रयोजनं तु ग्रहाश्रितगुणकामानां नित्ये अग्निष्टोमे अनङ्गत्वासंस्थास्वप्रवृत्तिः सिद्धान्ते इति ॥

Colophon :

इति जगद्गुरु मीमांसकनारायणभट्टसूनुरामकृष्णभट्टात्मजसकलशास्त्रविशारदकमलाकरभट्टकृते शास्त्रदीपिकालोके तृतीयाध्यायस्य षष्ठः पादः॥

## 481

Sl. No. 35543 शास्त्रदीपिकाव्याख्या Ms. No. C. 2722

Beginning :

तृतीयेषर्था × वीति सा × स्वरूपे च हेतुं प्रकारं प्रमाणं विरोधे च बाधं विरोधः क्वचेति प्रयोज्याप्रयोज्य × हेतुहेतुमद्भावलक्षणामध्याययोः सङ्गतिमाह —प्रसिद्ध इति॥

End :

सर्वकाम्यं सोर्यादिवदेकफलत्वं प्रसक्तमिहापोद्यते एकसे × अन्या इष्टयः कामायाह्रियन्ते सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावित्यत्र संशयपूर्वकं पूर्वपक्षयति—किमयमितिवि॥ विधिविषयी—

Colophon :

इति श्रीमद्भट्टरामेश्वरात्मजनारायणभट्टकृतायां शास्त्रदीपिकाव्याख्यायां चतुर्थाध्यायद्वितीयः पादः॥

## 482

Sl. No. 35544 शास्त्रदीपिकाव्याख्या Ms. No. C. 330

Beginning :

इन्द्रादिवृन्दारकवृन्दवन्द्यं
योगीश्वरैः ध्येयमजं विशुद्धम्।
सद्ज्ञानसौख्यैकतनुं हयास्यं
वन्दे ममानुग्रहदं × मे × ॥

आम्नायस्य क्रियार्थत्वात् आनर्थक्यमतदर्थानां तस्मात् अनित्यमुच्यते॥

End :

मन्त्राः अविवक्षितार्थाः। उच्चारणमात्रेणोपकुर्वन्ति। तदर्थशास्त्रात् यदभिधानसमर्थो मन्त्र सत्रैवार्थे शास्त्रेण विनियोगात् इति सूत्रार्थः॥

Colophon :

इति श्रीविद्वन्मुकुटशेखर श्रीकेशवार्यपुत्रभीमायार्यकृतायां शास्त्र-दीपिकाटीकायां पदार्थदीपिकाख्यां प्रथमाध्यास्य द्वितीयः पादः ॥

## 483

Sl. No. 35545 शास्त्रदीपिकाव्याख्या Ms. No. C 1647

Beginning :

प्रथमाध्यायसङ्गतिमेतदध्यायस्य दर्शयितुमाह—प्रथम इति ॥ नेति ॥ विशेषरूपेणानवगतत्वादिति भावः । निरवशेषेति ॥ विशेषरूपावगतेरपि जातत्वादिति भावः ।

End :

नामरूपादिहेतुभिः शाखान्तरे कर्मभेदः स्यादिति सूत्रार्थः ।
केशवाचार्यपुत्रेण भीमाचार्येण कृता ।
द्वितीयेऽस्मिन् पदार्थानां दीपिकास्तु मुदे सताम् ॥

आदीयते तद्वद्दुर्बलानुरोधेनार्थनिर्णयः न तु प्रबलगुर्वनुरोधेनानियत-पात्रसम्पादनमिति ॥ अनियतपात्रसम्पादनेति ॥ कांस्य एव भोक्तव्यमिति × व्याकृतनियमभङ्गेन जीवनमेव शिष्यस्य दुर्घटं स्यात् ॥

Colophon :

इति श्रीमत्कविकुलतिलकश्रीमत्केशवाचार्यपुत्र भीमाचार्यकृतायां शास्त्रदीपिकाटीकायां पदार्थदीपिकायां द्वितीयस्याध्यायस्य चतुर्थः पादः । अध्यायस्समाप्तः ॥

## 484

Sl. No. 35546 शास्त्रदीपिकाव्याख्या Ms. No. P. 10708

Beginning :

ततः किमित्यत्राह—तत्रेति ॥ सूक्तवाकनिगदस्थमिदं हविरजुषि × मित्यादिकमुदाहरणमित्यर्थः । तत्र संशयं वक्तुं पातनिकामारचयति—तत्र प्रस्थितमिति ॥ अग्नीषोमीयादिदेवतापदपौर्णमास्याधिकारे यथादेवतं विभज्य प्रयोक्तव्यमिति द्वितीयसूक्तवाकनयनिर्णीतमित्यर्थः ॥

End :

यदुक्तं नवनीतवदिति तत्राह— नवनीतविधर्मतयेति ॥ ततो व्यव-धानात् नवनीताद्विपरितधर्मतयातरसंसवनीयहविर्हिंकरोतीत्यर्थः ॥

वृत्तान्तरेणास्मिन्नध्याये वृत्तमर्थमनूद्योपसंहरति शेषइति। तेषां कर्मण विनियोगस्य शेषत्वं हेतुः। + तेषां परस्परविरोधे सति पूर्वसात्परमानं दुर्बलमित्युक्ता तेषां श्रुत्यादीनां अत्र विरोधो नास्तीत्ये × तथोक्तेरित्यर्थः ॥

Colophon :

इति श्रीसकलपण्डितमण्डलाखण्डलचरुकूरिकोण्डभट्टोपाध्यायतनयेन श्रीपितामहयज्ञेश्वरभट्टोपाध्यायशिष्येणकाश्यपगोत्रबह्वृचाग्र × × × तिरुमलयज्वप्रियसोदरेण गागाम्बिकेयेन यज्ञनारायणदीक्षितेन विचिते शास्त्र-दीपिकाव्याख्याने प्रभामण्डलाख्याने तृतीयस्याध्यायस्याष्टमः पादः। अध्यायश्च समाप्तः ॥

## 485

Sl. No. 35551 — शास्त्रदीपिकाव्याख्या — Ms. No. P. 2213

Beginning :

× स्वरूपत्वनेकनिष्पत्तिस्वकर्मशब्दत्वात् पूर्वत्रसान्निध्यज्ञातसाधनानां हविरादीनां तत्सम्बन्धिनां तुषोपवासादीनां च प्रयोजकत्वात्प्रयोजकत्वचिन्ता कृता। अत्र तु परम्परासाधनानां स्वदु × खादीनां प्रयोजकत्वाप्रयोजकत्वे चिन्त्येते इति × स्थान्तरता।

End :

सूत्रार्थस्तु आग्रयणे द्यावापृथिव्यं एककपालं विधाय + एककपालानां सर्वेषां वैश्वदेविनैककपालः प्रकृतिरिति विज्ञायते। ततस्तद्ब्राह्मणस्य न्यायादेव प्राप्तेर्वचनसार्थक्याय वारुणद्व्यानैकैककपालस्यैकातिदेश इति ॥

Colophon :

इति श्रीगण्टेद्योतिनिशाप्रदीपाङ्कविश्वामित्रवंशमुक्ताफलविश्वजिदतिरात्र-याजि सत्यमङ्गलरत्नश्रेणि श्रीश्रीनिवासदीक्षित तन ×

षष्ठाध्यायान्तिमपादसमाप्तिवाक्यं यथा—

इति श्रीगण्टेद्योति × मुक्ताफल-लक्ष्मीभवस्वामिभट्टसुकृतपरिपाकाद्वैत-विद्याचार्यसर्वतन्त्रस्वतन्त्रप्रतिदिनप्रबन्धपरमेश्वरषड्भाषासार्वभौमसाग्निविश्वजि-दतिरात्र × तनयस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरदीक्षितगुरु-चरण × तातिशयलब्धविद्यानैषधस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु कर्पूरवर्तिकाख्यायां षष्ठाध्यायस्याष्टमः पादः। समाप्तश्चाध्यायः ॥

## 486

Sl. N. 35552 शास्त्रदीपिकाव्याख्या Ms. N· P. 3037

Beginning :

वामालता वल्लभभावमुद्रा
सीमाविभागीन्द्रमणी शिवेव ।
रोमावली राजति यस्य मध्ये
सोमावतंसोऽवत सोयमस्मान् ॥
अधीत्य सकलं शास्त्रं अग्रजादीश्वरेर्ष्टितः ।
चूडामणिम × सोऽयं व्याकुर्वे शास्त्रदीपिकाम् ॥

End :

यथा अथैन्द्रवायवाग्रनथशुक्राग्रमथ द्रे आग्रयणाग्रे इत्यादि-वाक्यान्तरावगतरूपस्यापि व्यूथस्य यत्कामो व्यूथच्छन्दसा द्वादशावानयजेत × इति फलाय विधिः तथा वाक्यान्तरावगतरूपस्यावृत्यादेरपि फलार्थ—

Colophon

९९ तमपत्रे—

इति श्री दन्तिद्योतिदिवाप्रदीपाङ्कविश्वामित्रवंशमुक्ताफल × श्रीगजचूडामणिदिक्षितस्य कृतिषु शास्त्रदीपिकाव्याख्यायां कर्पूरवर्तिकाख्यायां प्रथमस्याध्यायस्य चतुर्थः पादः ॥

## 487

Sl. No. 35556 शास्त्रदीपिकाव्याख्या Ms. No. P. 10405

Beginning :

× त्यर्थः अथेति। कथंभावाकाङ्क्षिभिः प्रधानविधिभिरेवाङ्गानुष्ठानसिद्धेः नाङ्गविधीनामपि प्रवर्तकता । विधित्वं चाज्ञातज्ञापकतयापि न विरुद्धम् । तथा विशेष × धेरेव प्रयोजकतया शेषिद्वयसद्भावे कस्य प्रयोजकतेति युक्ता शेषिलक्षणानन्तर्यं चाविहतमिति भावः ।

End:

निमित्तस्य भूतस्य च × स्य प्रापणात् प्राप्तत्वादिति। परेण वेदनाददीक्षितः स्यात् सर्वैर्दि × तथा वैष्णवेष्टिमात्रं न दीक्षित-—

× त्वे निमित्तमित्यार्थिकी सङ्गतिः । सर्वेषामिति । दण्डेन दीक्षयति मेखलया दीक्षयति कृष्णाजिनेन ×

Colophon :

इति श्रीदन्तिद्योतिदिवाप्रदीपाङ्क विश्वामित्रवंशमुक्ताफललक्ष्मीभवस्वामि भट्टसुकृतपरिपाकाद्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रसाग्निचित्यविश्वजिदतिरात्रयाजि सत्यमंगलत्वखेटश्रीनीवासदीक्षिततनयस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वर दीक्षितगुरुचरणासदहजतातिशयलब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतौ शास्त्रदीपिकाव्याख्यायां पञ्चमाध्यायस्य प्रथमपादः ॥

## 488

Sl. No. 35559 शास्त्रदीपिकाव्याख्या Ms. No: C. 316

Beginnig :

तत आह – स चायमिति ॥ निमित्तश्रुतिवशेनाकरणनिवृत्त्यर्थमकरणस्य प्रत्यवायजनकत्वमिव भावनाय × इति श्रीमत्पदवाक्यप्रमाणाभिज्ञश्रीमत्तत्सद्रामचन्द्रात्मजवैद्यनाथकृतायां शास्त्रदीपिकम्व्याख्यायां प्रभाख्यायां षष्ठोध्यायः सम्पूर्णः ॥

End :

अतः एतत्त्रितयरूपाद्यागत् अन्यस्य × कार्यत्वायायाह इयन्तेति। अग्रिमविचारेण पौनरुक्त्याशङ्कायामाह । प्रयोगेति । तथावात्र विनियोगे यत्राग्रे तु प्रयोगे योता विषय इति भेद × र्थइति शिवम् ॥

Colophon :

इति श्रीमत्र × द्वंशवर्तसाधर्ममीमांसाधुरीणरामचन्द्रसूरिवरात्मजवैद्यनाथ कृतायां प्रभाख्यायां दशमस्याध्यायस्य अष्टमः पादः । सम्पूर्णश्चाध्यायः ॥

## 489

Sl. No. 35560 शास्त्रदीपिकाव्याख्या Ms. No. C. 875

Beginning :

एवं द्वितीयेन तु कर्मभेदे × ×

वातोभिदातः परमङ्गचिन्ता ॥



अथास: शेषलक्षणम् । अत्र मेवा व्याख्यातं वार्तिककृता ।

End :

अव्यवहितसवनीयान्वयरूपात् विशेषात् इति । अध्यायार्थं संक्षिप्य श्लोकेनोपनिबध्नाति उक्त इति । इह लक्षणे यदर्थपञ्चकं आद्ये प्रतिश्रुतं सूत्रे × सदसत्तया सहावादि ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधर श्रीभट्टनारायणात्मज भट्टशङ्करकृते शास्त्रदीपिकाप्रकाशे तृतीयस्याध्यायस्याष्टमः चरणोऽध्यायश्च समाप्तः ॥

## 490

Ms. No. 35561 शास्त्रदीपिकाव्याख्या Sl. No. C. 1295

Beginning :

निवीतमिति मनुष्यधर्मः । शब्दस्य तत्प्रधानत्वात् । एवं प्राक्पादे श्रुतिलिङ्गाधिकरणोत्तरपादान्तं यावत् सद्धक्रत्वर्थताके द्वादशोपसदादौ प्रकरणस्य पूर्वैः सह विरोधाविरोधचिन्ताद्वारा उत्कर्षापकर्षौ विचार्य अधुनाऽपि तद्वारैव क्रत्वर्थत्वं पुरुषार्थत्वं च—

End :

मनुष्यधर्मादिविधीन् विचार्य
ततस्त्वनारभ्यविधीनिहाङ्घ्रौ ।
शेषोऽस्ति वेत्युक्तमथ प्रसङ्गात्
तत्स्थापनायाद्यथ चिन्त्यमङ्घ्रौ ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरन्धरश्रीभट्टनारायणात्मजभट्टशङ्करकृते शास्त्रदीपिकाप्रकाशे तृतीयाध्यायस्य चतुर्थःपादः॥

## 491

Sl. No. 35563 शास्त्रदीपिकाव्याख्या Ms. No. P. 200

Beginning ;

सुदूरस्थं देशं हयहृदयविद्येव तुरगात्
नयत्याशुग्रन्थान्यन्मत तव शास्त्रेषु विषमान् ।

अधीत्यैवार्थं या सहृदयमनःसम्मतिपदं ।
विभोर्व्याख्यामुद्रां मनसि कलयता पशुपतेः ॥
गुरुभिरु रुपदिष्ट भावां व्याकुर्वे शास्त्रदीपिकामनघाम्।
आकृष्टसकलसारां लघुभिर्वाक्यैः प्रसन्नगम्भीराम् ॥

End :

शिष्यबुद्धिसौकर्याय श्लोकेन सङ्गृ × ष इति ॥ सूत्रार्थस्तु सवनीयानां मांसं विधीयते। न पुरोडाशानां। कुतः चोदनाविशेषात्। चोदनायां सन्निहितत्वान्वयरूपविशेषलाभादिति ॥

Colophon :

तृतीयस्य अष्टमः पादः समाप्तश्चाध्यायः ॥

## 492

Sl. No. 35566 शास्त्रदीपिकाव्याख्या Ms. No. P. 1011/2

Beginning :

आविष्करोतु विबुधैरभिवन्दनीयां
वाचं स कोपि मम बल्लवसार्वभौमः ।
वंशोपि यत् परिगृहीततया बिभर्ति
वाचालतां त्रिभुवनैकविमोहयित्रीम् ॥
अधिगम्यकलामखिलामग्रभवाद्वेङ्कटाद्रियज्वगुरोः ।
वचनैरनतिप्रचुरैर्व्याकुर्वे शास्त्रदीपिकां विशदम् ॥

End :

× तद्बाधकत्वमस्तीत्यत आह—श्रुतिकल्पनस्य चेति ।
न च प्रत्यक्षश्रुतिमपर्यालोचयतः स्मृतिमूलभूतश्रुतिकल्पनं न सम्भवतीति वाच्यम्।
अनालोचयतः कस्यजातस्यापि श्रुत्यनुमानस्य पश्चाद्विरुद्धश्रुतिदर्शनेन–

Colophon:

[इति श्रीनिट्टिलकुलतिलकसूरुभट्टमहोपाध्यायतनुभवस्य वेङ्कटाद्रियज्वगुरुचरणानुजस्य सोमनाथसर्वतोमखयाजिनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकायां प्रथमास्याध्यायस्य द्वितीयः पादः]

## 493

Sl. .N 35574 शास्त्रदीपिकाव्याख्या Ms. N. P. 2676

**Beginning :**

× वृत्तकथनपूर्वकं सङ्गतिं दर्शयन् वर्तिष्यमाणं × × दित्युपदेशपूर्वकं × त्वरवादित्वादित्यतिदेशस्य तद्विचारयोरपि × ।

**End :**

जिज्ञास्य इति। अथातो धर्मजिज्ञासेति स्वरूपप्रमाणसाधनफलै-श्चतुर्भिः प्रकारैर्ये धर्मजिज्ञास्यत्वेन प्रतिज्ञातस्य प्रथमादिभिः द्वादशान्तै-रध्यायैः प्राज्ञातः धर्म × निर्णयरूपं सिद्धमित्यर्थः ।

**Colophon :**

इति श्री निद्दलकुलतिलकसूरुभट्टमहोपाध्यायतनूभवस्य वेङ्कटाद्रियज्व-गुरुचरणानुजस्य सोमनाथसर्वतोमुखयाजिनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां द्वादशाध्याय × ।

## 494

Sl. No: 35578 शास्त्रदीपिकाव्याख्या Ms. No. P. 9378

**Beginning :**

वंशोऽपि यत्परिगृहीततया बिभर्ति
वाचालतां त्रिभुवनैकविमोहयित्रीम् ।
× × ×
अधिगत्य कलामखिलां अभ्रभवाद्वेङ्कटाद्रियज्वगुरोः ।
वचनैरनतिप्रचुरैः अर्वाक्कुर्वे शास्त्रादीपिकां विशदाम् ॥

आम्नायस्य क्रियार्थत्वात्—

**End :**

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेतेति सूत्रं भाष्यकारेण द्वेध व्याख्यातम् । तत्र प्रथमं दर्शयति अगुण इति — गुणान्तरविधिसिद्ध्यर्थं प्रथमान्वितगुणविशिष्टतया कर्मणोऽनालोचनीयत्वात् नात्र × ×

**Colophon :**

— — —

## 495

SI. N. 35591 **शास्त्रदीपिकाव्याख्या** Ms. N. P. 1173

Beginning :

उपयमुनमुरोजन्यस्तहस्तोत्पलानां
मदचपलचकोरीलोचनानां चलानाम् ।
अपहृतव × कुवाचो निशम्य
स्वयमुपगतहासः पातु नः श्रीनिवासः ॥
गुरुभिरुपदिष्टभावां व्याकुर्वे शास्त्रदीपिकामनघाम् ।
आकृष्टसकलभावां लघुभिर्वाक्यैः प्रसन्नगम्भीराम् ॥

End :

प्रथमाध्याये धर्मप्रमाणचिन्ता प्रवृत्ता ।
इतः परं द्वितीये धर्मभेदस्य तृतीये विनियोगस्य चतुर्थे प्रयुक्तेः पञ्चमे क्रमस्य षष्ठे फलस्य सप्तमादिषु अतिदेशोहबाधतन्त्रप्रसङ्गा ×

Colophon :

— — — —

## 496

SI. N.35596 **शास्त्रमालावृत्तिः** Ms. N. C. 2239

Beginning :

सूर्यवंशावतंसाय दशस्यन्दनसूनवे ।
जगज्जाड्यापहाराय जानकीपतये नमः ॥
मीमांसानलिनीभानुं नत्वा श्रीकमलाकरम् ।
तत्सूनुना त्वनन्तेन शास्त्रमाला विरच्यते ॥
अथ श्रीकमलाकराख्यजनकैः + विरचितो यः शास्त्रमालाख्यकः ।
वृत्तिस्तत्र वितन्यते स्फुरतरानन्तेन तत्सूनुना ॥ +
अथातो धर्मतिज्ञासा॥ ननु स्वाध्ययोऽध्येतव्य इत्यध्ययनविधौ—

End :

इयष्टयेत्यत्र तु तत्तत्फलकरणोद्देशेन कालविधानात् × सहितान कालयोग इति सिद्धादेशकालकर्त्रैक्ये तन्त्रत्वमित्याह—आग्नेयादेरेकदेशक काजताथाङ्गगाम् । इष्टिराजसूयेषु (?)

**Colophon :**

इति शास्त्रमालावृत्तौ एकादशस्याद्यः पादः ।

दशमाध्यायसमाप्तिवाक्यं यथा–१७६ तमे पत्रे–

इति भट्टकमलाकरात्मजानन्तभट्टकृतायां शास्त्रमालावृत्तौ दशमोऽध्यायः समाप्तः ॥

## 497

**Sl. No.** 35598 — **सङ्ग्रहमीमांसा** — **Ms. No. P.** 6238

**Beginning :**

अथातो धर्मजिज्ञासेति सूत्रेण कर्ममीमांसायां प्रमाणस्वरूपसाधनफलैः साभासैर्धर्मविचारं प्रथमाध्याये तस्मिन्प्रमाणं निरूपितम् ।

**End :**

यजनादिभिः ब्राह्मणो धनमार्जयेदिति द्रव्यार्जनशास्त्रे न ज्योतिष्टोमादि शास्त्रस्य ऋत्विगपेक्षस्य विशेषेण त्रैवर्णिकानामार्त्विज्यमाक्षेपं प्रवृत्तस्योपकार इत्येवमादिरूपेण द्वादशे सापवादः प्रसङ्गो निरूपितः ॥

**Colophon :**

— — —

## 498

**Sl. No.** 35599 — **सहस्राधिकरणीसिद्धान्तप्रकाशः** — **Ms. No. B.** 739

**Beginning :**

नत्वा गणेशवाग्रामगुर्वङ्घ्रिन् भट्टशङ्करः ।
सहस्रं वक्ति सिद्धान्तान् सार्धश्लोकशतद्वयम् ॥
अधीतिरत्न दृष्टार्था धर्मे मानं च चोदना ।
धर्मोऽर्थश्चोदनागम्यो न तन्मानपरीक्ष्यता ॥

**End :**

सत्रे गृहपतिः स स्यात् सामर्थ्ये सर्वशक्तता ।
आर्त्विज्यं बलिसंस्काराद्विप्राणामेव तच्च नः ॥
इति द्वादशाध्यायस्य चतुर्थः पादः ॥

आचार्यैरधिकरणान्युक्तानि सहस्रसंख्यानि ।
तत्सिद्धान्तान् पादैः तत्संख्यैः भट्टशङ्करोऽबध्नात् ॥ ५२ ॥

Colophon

इति श्रीमत्पदवाक्यप्रमाणपारावारपरीणधुरीण मीमांसाद्वैतसाम्राज्य धुरन्धर श्रीमद्भट्टनारायणात्मज भट्टशङ्करकृतः सहस्राधिकरणीसिद्धान्तप्रकाशः समाप्तः ॥

**499**

Sl. No. 35606 सेश्वरमीमांसा Ms. No. :P 2242

Beginning :

विहितमनवमर्थं यः पुमर्थैश्चतुर्भिः
सफलयति व × न्य स्वप्रसादेन देवः ।
निखिलनिगमवेद्ये सिध्यतु श्रीसखेऽस्मिन्
भगवति निरवद्ये भक्तिरात्यन्तिकी नः ॥
स जयति जैमिनिरादौ जयति पुनः काशकृत्स्नोऽपि ।
नारायणावतारो जयति परं बादरायणः श्रीमान् ॥

\+ \+

अथातो धर्मजिज्ञासेत्यारभ्य अनावृत्तिः शब्दादनावृत्तिः शब्दादित्येवमन्तं विंशतिलक्षणमीमांसाख्यं एकशास्त्रम् । सा हि मीमांसा + ×

End:

× स्कन्धभूतवेदराशिरस्तीति भगवता व्यासेन ज्ञाप्यते—
महतो वेदवृक्षस्य मूलभूतो महामयम् ।
स्कन्धभूता ऋगाद्यास्ते शाखात्मा भूतयः परे ॥
प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते ।
इत्यादिस्मृतिश्च तत्कालादिभेदप्रतिनियतशाखाभेद ×

Colophon:

# न्यायशास्त्रम्

## 500

Sl. No. 35607 अनुपलब्धिवादः Ms. No. P. 1157/19

**Beginning :**

विषयतासंबन्धेन वृत्तिमतामभावादीनां प्रत्यक्षे विशेषणताप्रत्यासत्तेर्हेतुत्वम् । विशेषणता तु × न्द्रियसंबन्धानुयोगिक—

**End :**

विशेषणविशेषणता घटाभावनिष्ठतत्प्रत्यक्षे २ इन्द्रियसंयुक्त—

**Colophon :**

— — —

## 501

Sl. No. 35608 अनुमितिवादः Ms. No. P. 1157/7

**Beginning :**

यत्र संबन्धावच्छिन्नाधिकरणतैव हेतुतावच्छेदकः संबन्धः तत्र तादृश सम्बन्धेन व्याप्यतांशे पक्षविशेषणहेतुत्व—

**End :**

पक्षविशेष्यकपरामर्शेनानुमिति × सत्त्वादनुमित्यापत्तिरिति विशिष्यैव तादृशपरामर्शयोर्हेतुत्वं युक्तमिति समासः ॥

**Colophon :**

इति श्रीहरिरामतर्कवागीशभट्टाचार्यविरचितः अनुमितिविचारः समाप्तः ॥

## 502

Sl. No. 35609 अन्यथाख्यतिवादः Ms. No: P. 1057/1

Beginnig :

× त्र यदस्तीति विशेषण × प्रमालक्षणे व्यर्थं व्यावर्त्याभावात् । ज्ञानेऽप्यधिकरण प्रक × कत्वमिति वाच्यम् ॥

End :

सत्वभासमानत्वयोः परस्परविरोधेन व्याघातस्योक्तत्वात् । तस्मान्मणिकृन्मतमेव रमणीयमिति संक्षेपः ॥

Colophon:

अन्यथाख्यातिवादः समाप्तः ॥

## 503

Sl. No. 35611 अन्यथासिद्धिः Ms. No. P. 5392/2

Beginning :

तद्धर्मावच्छिन्ननिरूपितनियतपूर्ववृत्तित्वप्रकारकग्रहविशेष्यतावच्छेदकत्वे सति स्वतन्त्रान्वयशून्यत्वं प्रथमान्यथासिद्धमित्युक्तम् । तत्र स्वतन्त्रान्वयव्यतिरेकशून्यत्वं च परम्परा —

End :

ननु प्रथमान्यथासिद्धिलक्षणे + ज्ञानत्वावच्छिन्ननिरूपितस्वतन्त्रान्वयव्यतिरेकशून्ये तद्व्यक्तित्वप्रकारकविशेष्यकप्रत्यक्षनिरूपितनियतपूर्ववृत्तितावच्छेदकप्रथमान्यथासिद्ध्यापत्तिवारकतया सार्थक्यात् । तस्य च ज्ञानत्वावच्छिन्ननिरूपितनियतपूर्ववर्तितानवच्छेदकत्वादिति ।

Colophon :

— — —

## 504

Sl. No. 35613 अन्वयव्यभिचारः Ms. No. C. 3033/1

Beginning :

अन्वयव्यभिचारोऽसौ विबुधैरपरिष्कृतः ।



पद्याभिरामसुधिया प्रकटीक्रियतेतराम् ॥

कारणसत्त्वेऽपि कार्यानुत्पत्तिरन्वयव्यभिचारः इत्याचक्षते । स्वसमानाधिकरणाभावप्रतियोगिकार्यकत्वं तदर्थः । भवति च कपालाकाशसंयोगसत्त्वेऽपि कपालद्वयसंयोगशून्यकाले घटनुत्पादात् ।

**End :**

तदुभयसंबन्धेन तद्विशिष्टाधेयतातदभावनिरूपितकार्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितावच्छेदककार्यतावच्छेदकत्वं अन्वयव्यभिचारः इति सर्वं अतिरमणीयम् ॥

**Colophon :**

पट्टाभिरामविरचितान्वयव्यभिचारपरिष्कृतिः सामञ्जस्यमाप ॥

## 505

**Sl. No. 35614** अपशब्दखण्डनम् **Ms. No. P. 5445/2**

**Beginning :**

उमाकान्तं प्रणम्यादौ लक्ष्मीकान्तं सरस्वतीम् ।
खण्डनं त्वपशब्दस्य क्रियते युक्तिभिर्मया ॥
अरे वैयाकरणदुर्दुरुढाः कोयमपशब्दो नाम ॥

**End :**

विपरितकस्यापि सूचकत्वात् । तस्यात्रापशब्दोद्भावनं निग्रहस्थानम् ॥

**Colophon :**

इति गङ्गादासदीक्षितप्रोक्तं अपशब्दखण्डनं समाप्तम् ॥
रञ्जनाय मतिसोमयाजिनः
भञ्जनाय खलु शब्दशासिनाम् ।
निर्मितं मतिमतां कृते मया
खण्डनं सकलसूरिमण्डनम् ॥

## 506

**Sl. No. 35616** अवच्छेदकताविचारः **Ms. No. C. 1716**

**Beginning :**

इह अनवच्छेदकमित्यत्र अवच्छेदकत्वपदार्थः विशिष्ट + नियतत्वात्तस्य लघुनोऽपि न विशिष्टाभावस्य प्रतियोगितावच्छेदकत्वम् । गगनादावपि सत्ता नास्तीति प्रत्ययप्रसङ्गात् +

ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वव्यक्तीनांत चद्व्यक्तित्वेनाभावकूटत्वमेव साध्यवच्छेदकत्वांशे निवेश्यमतो नोक्तदोषः। इत्यतः तत्तदिति। यद्यपि गुरोरवच्छेदकत्वपक्षेपि स्वप्रतियोगिव्यधिकरणाभावघटित-व्याप्तेस्तत्तत्प्रतियोगिताव्यक्तिगर्भत्वेन दुर्ज्ञेयत्वं ×

Colophon :

— — —

## 507

Sl. No. 35620 **अवयवलक्षणपरिष्कारः** Ms. No. C. 4695/20

Beginning :

न्यायावयवेति उदाहरणत्वं चेह न न्यायगर्भम्—वैय्यर्थ्यात्। साध्याविषयेत्यादि। अयं न दण्डात् दण्डसंयोगाजन्यद्रव्यत्वात् इत्यादौ प्रतिज्ञानिगमनयोः वारणाय साध्याविषयकेत्यादि व्याख्यानम्॥

End :

अतः पञ्चम्यन्तेति। तस्मादित्यत्र तत्पदेन लक्षणा शक्त्यैव तादृशज्ञानो-पस्थितिसम्भवात् पर्वतो वह्निमान् वह्निसामग्रीमान्वा तस्मादित्यादिकस्तु न न्यायप्रयोगः सम्प्रदायविरोधादित्यपि वदन्ति॥

Colophon

— — —

## 508

Sl. No. 35621 **अव्याप्तिलक्षणपरिष्कारः** Ms. No. P. 9337/2

Beginning :

लक्ष्यतावच्छेदकनिरूपिलक्ष्यतावच्छेदकसंबन्धावच्छिन्नाधिकरणताव-न्निरूपितलक्षणीयवृत्तितानियामकसंबन्धावच्छिन्न—

End :

लक्ष्यतावच्छेदकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नत्वं अव्या-प्तेर्लक्षणम्॥

Colophon :

— — —

## 509

Sl. .N 35622 आका क्षावादः Ms. N. P. 2255

Beginning :

सिद्धायांशाद्वाक्यविलक्षणप्रमायां तत्करणतया शब्दज्ञानस्य स्वतन्त्र-प्रमाणता प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति × त्रे शब्दपदं शब्द-ज्ञानपरम् ।

End :

न च भवन्मतेपि विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताक निराकाङ्क्ष-त्वज्ञानाभावविशिष्टविशेष्यकतात्पर्यज्ञानत्वेन हेतुत्वोपगमान्नोक्तदोष इति वाच्यम् । निराकाङ्क्षत्वज्ञाने तत्तत्पुरुषीयत्वनिवेशेन गौरवात् ।।

Colophon :

इति श्री रघुदेवभट्टाचार्यविरचितो आकाङ्क्षावादः समाप्तः ।।

## 510

Sl. No: 35625 आख्यातवादः Ms. No. P. 1739/3

Beginning :

आख्यातस्य यत्नो वाच्यः । पचति पाकं करोति इति यत्नार्थककरोतिना सर्वाख्यातानां विवरणात् । व्यवह × त्युक्ते पचतीत्युत्तरस्य यत्नार्थकत्वं विना अनुपपत्तेश्च । अचेतने रथो गच्छतीत्यादौ च अनुकूलव्यापारो ×

End :

तत्तफलानुकूलतत्तद्व्यापारविशेष एव धात्वर्थः सर्वत्र धात्वर्थाश्रयत्व-मेव कर्तृत्वम् । संख्यावर्तमानत्वादिकं तु × ननुभवप्रसङ्गादनु-पादयेम् ।।

Colophon :

इति महामहोपाध्यायभट्टाचार्यचूडामणितार्किकशिरोमणि विरचित ×

## 511

Sl. No: 35627 आख्यातशिखामणिः Ms. No. p. 4017-1

Beginning :

ओंनमस्सर्वभूतानि विष्टभ्य परितिष्ठते ।

अखण्डानन्दबोधाय पूर्णाय परमात्मने ।।

आख्यातस्य यत्नो वाच्यः पचति पाकं करोतीति यत्नार्थककरोतिना × तोख्यातविवरणात् । व्यवहारादिवद्बोधकं विना विवरणादपि-व्युत्पत्तेः ।

End :

तत्र फलानुकोटितत्त्व्यापारविशेष एव धात्वर्थस्सर्वार्थाश्रयत्वमेक-कर्तृत्वं संख्यावर्तमानत्वादिकं क्वचिदाश्रयत्वादिकमपि चाख्यातार्थ इति गुरुमत-मपि तत्र तत्र तामाशयत्नमनुभवप्रसंगान् अनुपादेयमिति। इति श्री शिरो-मणि निरूपितमाख्यातम् ॥

Colophon :

इति आख्यातशिरोमणिः समाप्तः ॥

## 512

Sl. No. 35630 | आख्यातवादव्याख्या | Ms No. P. 155

Beginning :

नैयायिकः परमतं निराकर्तुं प्रथमतः स्वमतं व्यवस्थापयति— आख्यातस्येति । यत्नो वाच्यः यत्नत्वविशिष्टो वाच्यः । यत्नत्वं शक्यतावच्छेदकमिति यावत् । यथाश्रुते यत्नस्य व्यरपारान्तर्गतत्वेन व्यापारशक्तितावादिमतव्यवच्छेदाप्रतीतेः । शक्तताच्छेदकं च आख्या-तत्वम् ।

End :

तेन पर्यायतापत्तिर्निरस्ता । व्यापारविशेषः स्पन्दादिरूपः। तेन विभागानुकूलपूर्वसंयोगादिमति त्यजतीत्यादिप्रसङ्गो निरस्तः । क्वचिदाश्रयत्वादिकमपीति । भावाख्यातस्थले आश्रयत्वादेरभावात् क्वचिदिति । इदं च मध्यस्थं पूर्वत्राप्यन्वयि, तेन तत्र तत्र प्रथमान्त-पदाभावात् संख्यायः वर्तमानत्वाद्यविवक्षायां च वर्तमानत्वादेरनन्वयेऽपि न क्षतिः ॥

Colophon :

इत्याख्यातवादटिप्पणी समाप्ता ॥

513

Sl. No. 35634 आख्यातवादव्याख्या Ms. No. P 3138

Beginning;

आख्यातस्य यत्नो वाच्यः। पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात् व्यवहारादिविवरणादीनां तं विनाव्युत्पत्तेः किं करोति इति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विना अनुपपत्तेश्च।

End :

संयोगविभागादित्यर्थः। क × श्रयत्वादिकमपि इति भावाख्यात स × आश्रयत्वादेव भावात्। क्वचिदतिप्रसंगादिति। लक्षणा-दिना तादृशानुभवोपपादने तु लाघवपतनस्यैव कारणीकरणीयत्वादिति भावः॥

Colophon :

इति श्री रघुनाथभट्टाचार्यविरचिता अख्यातवादव्याख्या समाप्ता॥

514

Sl. No. 35636 आख्यातवादव्याख्या Ms. No. .P 4017/2

Beginning :

प्रणम्य नीरदश्याममुद्दामगुणमण्डितम्।
आख्यातवादसद्व्याख्या रघुदेवेन तन्यते॥
नैयायिकमतनिराकरणपूर्वकं स्वमतं व्यवस्थापयति। आख्यातस्येति— यत्नो वाच्यः। यत्नत्वविशिष्टो वाच्यः। यत्नत्वं शक्यतावच्छेदकमिति यावत्।

End :

एकदेशजन्यत्वे चैत्रनिरूपितस्वरूप × सम्बन्धस्यान्वयं तथा सत्युप दर्शितकार्यकारणभावेन × व्यतिरिक्तवृत्तित्वस्य विशेष्यतायां निवेशे गौरवात्। तथा च नोक्तदृष्टान्तानामवकाश इत्यत आह—

Colophon :

—

—

## APPENDIX I

## 515

Sl. No. 35638

आ मतत्वप्रबोधः

Ms. No. A. 384

Beginning:

वस्तुदृष्टिविरोधेन जगत्कर्तृव्यवस्थया ।
मोक्षमार्गप्रकाशार्थं आत्मतत्वं प्रतन्यते ॥
चूडामणिसुतेनेह राघवेन विपश्चिता ।
लोकोत्तरचमत्कारी किञ्चिदत्र विधीयते ॥

End:

वाक्चौर्येण च मूकत्वं तस्मात्तत्परिवर्जयेत् ।
परवाक्यं गृहीतुश्च स्वयमुक्तं वदेत्तु यः ॥
आकल्पं पच्यते घोरे नरके पितृभिस्सह ॥
इत्यादिस्मृतेश्च ॥ अत एवमाद्यादिकाव्ये परकीयश्लोकं क्रीत्वैव पुस्तके लिखितमिति दुष्टशिक्षा ॥

Colophon:

इति महामहोपाध्याय श्रीमद्भट्टाचार्यचूडामणितनय श्रीराघवपञ्चानन भट्टाचार्यविरचितवेदबाह्यनिरासे आत्मतत्वप्रबोधः सम्पूर्णः ॥

## 516

Sl. No. 35639

आत्मतत्त्वविवेकः

Ms. No: C. 4400

Beginning:

× मित्युक्तं न तदर्थं स्वप्रयोगित्वं तद्वन्निष्ठात्यन्ताभावप्रतियोगितांतदधिकरणानधिकरणत्वं तदधिकरणं अनधिकरणं यस्य तत्वं तदनधिकरण साध्याध्यधिकरणांतत्वम्—

End:

तदिदमुदयते न न्यायलोकागमानां
व्यतिहतिमवधूय व्यंजितं वर्त्मक्तैः । (?)
नास्य × नामनेममुपं पोषयन् प्रीतये नः ॥
कोष्ठैश्चित्रस्तुतिशतविधौ शिल्पिनः स्यात्प्रकर्षः ॥

निन्दामेव प्रथयतु जनः किंनु दोषान्निरूप्य
प्रेक्षास्त × स्खलितकथनं प्रीणयेदेव भूयः ॥

Colophon :

इत्याचार्य उदयनकृत आत्मतत्त्वविवेकः सम्पूर्णः ॥

## 517

Sl. No. 35640 आत्मतत्त्वविवेकव्याख्या Ms. No. B 809

Beginning :

संसारपटकुविन्दं जगदण्डकलशकुलालमीशानम् ।
सर्गप्रलयसितासितकुसुमस्रङ्मालिनं वन्दे ॥

प्रारिप्सितस्य निर्विघ्नपरिसमाप्तिमुद्दिश्य कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—तस्मै सर्वजनप्रसिद्धाय जगतामीशाय जगज्जननानुकूलचितिशक्तिमते नमः ।

End :

प्रीणयेदेव—सुखयेदेवेत्यर्थः । ×
व्याख्यानगुणदोषाभ्यां सम्बन्धो मत्पितुर्नये ।
अश्रुत्वा मत्पितुर्व्याख्यां अदृष्ट्वा मत्कृतामिमाम् ।
आत्मतत्त्वविवेकस्य कस्य व्याख्यानकौशलम् ॥

Colophon :

इति महामहोपाध्यायश्रीभवनाथात्मजमहामहोपाध्यायसन्मिश्रश्रीशङ्करकृता आत्मतत्त्वविवेककल्पलता समाप्ता ॥

## 518

Sl. No. 35641 आत्मतत्त्वविवेकव्याख्या Ms. No. C 1572

Beginning :

ओं नमस्सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥
निर्माय सारं शास्त्राणां तार्किकानां शिरोमणिः ।
आत्मतत्वविवेकस्य भावमुद्भावयत्ययम् ॥

शिष्टाचारपरम्पराप्राप्तमितकर्मारम्भसमयकर्तव्यताकं कृतमिष्टदेवतानमस्कारं शिष्यान् शिक्षयितुमादौ निबध्नाति— स्वाम्यमित्यादिना ॥

End :

तस्य इति ॥ पञ्चमीनिर्वाणमपवर्गः । स्वयंभोगेनादृष्टकूपादि-त्यर्थ इत्येके । तस्य निर्वाणं विनाशः स्वयं कालविशेषसहकृतात्तत इत्यन्ये ॥

Colophon :

इति महामहोपाध्यायश्रीमद्भट्टाचार्यशिरोमणिविरचित-आत्मतत्व विवेक-भावप्रकाशः ×

## 519

SI. N. 35642 **आत्मप्रत्यक्षसन्निकर्षवादः** Ms. N. P. 1157।5

Beginning :

अथ स्वतन्त्रमानसप्रत्यक्षं प्रति आत्ममनस्संयोगात्ममनसंयुक्तसमवाया-त्ममनस्संयुक्तसमवेतसमवायानां सन्निकर्षाणां हेतुत्व—

End :

चर्ममनस्संयोगयोर्हेतुत्वे बाधकाभावाच्चेत्याहुः । तदसत्—तदपेक्षया संयोगसंबन्धेन शरीरनिष्ठतया मनस्त्वेन कारणत्वस्यैव लघुत्वादिति समासः ॥

Colophon :

— — — —

## 420

SI. N.35644 **आसत्तिवादः** Ms. N. C. 1157।10

Beginning :

गिरिर्भुक्तमग्निमान् देवदत्तेन इत्यादावनासन्नगिरिरग्निमदित्यादिपदार्थयोः परस्परमन्वयबोधानुदयात्—

End :

इत्याद्यनुव्यवसायस्य सिद्धत्वादिति । तस्मात् पदवृत्तिज्ञानजन्या पदार्थोपस्थितिरेव शाब्दबोधाङ्गमिति स्थिति—

Colophon:

इत्यासत्तिविचारः ॥

## 521

Ms. No. 35648 इन्द्रियलक्षणम Sl. No. P 10715/1

Beginning :

इन्द्रियस्य किं लक्षणमित्युक्ते शब्देतरौद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वं इन्द्रियस्य लक्षणम् ॥

End :

ज्ञानकारणञ्च तत् मनस्संयोगश्च—ज्ञानकारण मनस्संयोगः + संयोगस्य आश्रय—-ज्ञानकारणमनस्संथ गाश्रयः + + मनस्संयोगाश्रयत्वं इन्द्रियलक्षणम् । कुत्र वर्तते ? लक्ष्ये वर्तते । अतः + + शब्देतरोद्भूत + + मनस्संयोगाश्रयत्वं लक्षणम् ॥

Colophon :

— —

## 522

Sl. No. 35649 ईश्वरनित्यसुखवादः Ms. No. P. 728/6

Beginning;

ईश्वरः सुखवान्न वेति विप्रतिपत्तिः । अत्र प्राञ्चः–ईश्वरो न सुखवान् सुखसामग्र्यभावादिति । तथाहि—धर्मात्सुखं—

End :

+ साध्यस्य प्रतियोगितया भानासम्भव दिति वाच्यम् । यदि केवलान्वयित्वं अत्यन्ताभावाप्रतियोत्वं साध्यविशेप्यकतद्ग्रहश्चासमानविशेष्यकतया—

Colophon :

— — — — .

## 523

Sl. No. 35650 ईश्वरेच्छाकृत्येकत्वविचारः Ms. No. C. 2457/1

Beginning :

दिनकरभट्टाचार्येण क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत् इत्यनुमानेन + ईश्वरः सिध्यति । एवमीश्वरे सिद्धे + ईश्वरेच्छाकृतिषु × नित्यत्वमेकत्वं च सिध्यतीत्युक्तम् ॥

तत्र + ईश्वरेच्छाकृतिषु भासमानमेकत्वं कीदृशं (?) तन्न तावत् सङ्ख्यारूपं–गुणे गुणानङ्गीकारात् + इति चेत्–अत्र केचिदेवमाहुः ।

End :

अतो निरुक्ताभावविशिष्टज्ञानत्वरूपमेकत्वं वक्तव्यम् ।

ज्ञाने अभाववैशिष्ट्यं च + सम्बन्धेन । + अत्र यद्यपि + अतिप्रसक्तिर्नास्ति तथापि स्वं चैत्रनिष्ठपट विषयकं ज्ञानं + तत्कत्वाभावविशिष्टसाधनत्वं स्यात् इत्यापत्तिर्दुर्वारै वेत्याक्षेपः ।

Colophon :

— — — —

## 524

Sl. No. 35652 उपमानसंग्रहः Ms. No. C. 4416/2

Beginning :

आविर्भेस्तु हृदयं भोजे × किंप्रयि तन्महः ।

उपमानं न यस्यास्ति निर्विकल्पमनात्मकम् ॥

+ अथेति यद्यपि निर्देशकार्थज्ञानस्योपमानसहकारित्वेन शब्द प्रामाण्यस्योपती × तथापि शब्दप्रमाणत्वावच्छेदेन—

End :

ननु वैधर्म्यज्ञानसादृश्यवाने उभे उपमितिकरणे तत्र किन्नयेन कारणतेति चेत् अज्ञातसमयसंज्ञासमयपरिच्छेदन × तत्र करणतेति दिक् ॥

Colophon

इति श्रीप्रगल्भकृतोपमानसंग्रहः समाप्तः ॥

## 525

Ms. No. 35653 उपसर्गबोधकत्वखण्डनम् Sl. No. P. 1157/2

Beginning :

ननु प्राद्युपसर्गो द्योतको बोधको वेति चेत् तत्र आचार्यानुयायिनः । प्राद्युपसर्गोद्योतक एव न तु बोधकः—

लुप्तधातुस्मरणादेव तत्रार्थप्रत्ययात् धातुलोपमजाननः तत्रार्थ प्रत्ययस्यासिद्धत्वात् इति समासः ॥

Colophon :

इति उपसर्गस्य बोधकत्वखण्डनरहस्यम् ॥

## 526

Sl. No. 35655 एकदेशान्वयविचारः Ms. No. P. 3732/3

Beginning :

तिप्तस्झिसिप्थमिब्वस्मसस्तुहिङ् ॥ लुपि युक्तिवद्व्यक्तिवचने लुपि सति प्रकृतिवत् लिङ्गवचने स्तः । पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः अङ्गाः वङ्गाः कलिङ्गाः ।

End :

पञ्चाला जनपदः इत्यत्र बहुवचनार्थस्य बहुत्वस्य पञ्चालनिवासरूप कृत्यर्थैकदेशभूतपञ्चालेष्वन्वयः । गोदौखलतिकमित्यादावपि प्रकृत्यर्थै-कदेशभूतगोदखलतिकादिषु द्विवचनाद्यर्थान्वयः ॥

Colophon :

— — —

## 527

Sl. No. 35657 एवकारार्थः Ms. No. P. 999/11

Beginning :

एवकारो हि समभिव्याहारादिभेदेन त्रिविधः । विशेष्येण समभिव्या-हारे हि तस्यान्ययोगव्यवच्छेदबोधकत्वम् ।

End :

ततश्चैत्रस्वत्ववद्धनं चैत्रान्यस्वत्वाभाववदित्यादिक्रमेण बोधः । एवं च चैत्रो जलमेव भुङ्क्ते इत्यत्रापि ×

इतरस्याधेयतया कर्मत्वे तस्या न प्रतियोगित्रया व्यवच्छेदोन्नेयः ॥

Colophon :

— — —

## 528

Sl. No. 35658 कणादन्यायभूषणम् Ms. No. P. 778/2

Beginning :

जानकीकुचसौवर्णकलशद्वयसंश्रितम् ।
इन्द्रनीलमणिश्यामं नमामि रघुनन्दनम् ॥
श्रीवीरभद्रं यज्वानं सर्वशास्त्रविशारदम् ।
प्रणम्य पितरं कुर्वे कणादन्यायभूषणम् ॥
× बालव्युत्पत्तिसिद्धये ।
वैशेषिकमते तत्त्वं ज्ञाप्यते नातिविस्तरम् ॥

End ;

न च कर्मणैव हि संसिद्धिमित्यन्यथानुपपत्या कर्मणां मोक्षसाधनत्वे सिद्धे ज्ञानस्य सर्वथा मोक्षानुपयोगित्वस्य × शोकमित्य × ह श्रुतिविरोधेन ज्ञानस्य कर्मद्वारा मोक्षोपयोगः कल्प्यत इति वाच्यम् । संसिद्धिशब्दस्य ज्ञानार्थकत्वेनाप्युपपत्तेरुक्तत्वात ×

Colophon :

— — —

## 529

Sl. No. 35661 कणादसङ्ग्रहः Ms. No. P. 2234/1

Beginning :

× × द्वयम् ॥
आत्मविज्ञानसिध्यर्थं वक्ष्ये काणादसङ्ग्रहम् ।
आत्मज्ञानं × ह्याश्रय × पादयवस्तुविवेकः ।
तत × पादयभूतात्मोपासनाजनितधर्म ×

End :

रूपिग्राहिं द्वितीयत्वेन यथैव स्पर्शनं प्रियमिति तु सोपाधिकत्वं स्पर्शं नेन्द्रियत्वस्योपाधेः मनस्त्वं स्पर्शनवदवृत्तिवेगवद्वृत्तिजात्यन्यतमसत्तावदिति ×

Colophon :

— — —

## 530

Sl. N. 35662 **काणादसङ्ग्रहविवरणम्** Ms. N· P. 4690/1

**Beginning :**

यः कर्ता जगतामतर्क्यविभवं ध्यायन्ति यं योगिनो-
वेदा येन निरूपिताः कृतधियो यस्मै नमः कुर्वते ।
यस्मादभ्युदयं व्रजन्ति मुनयो यस्यामराः किङ्कराः
यस्मानाज्य × नया तस्मै नमः शम्भवे ॥

**End :**

अध्येतारतश्च मङ्गलयुक्ता भवन्तीति महाभाष्यकारोक्तरीतिमनुसृत्य ग्रन्थपरिसमाप्तिसमये सर्वाभीष्टसाधकं जगदीश्वरपदाम्बुजसमाश्रयणलक्षणं मङ्गलं ग्रन्थतो निबध्नाति सर्वस्येति । अथ ग्रन्थकारः प्रतिपादितं ग्रन्थ-साम्प्रदायिकत्वोक्तिपूर्वकं स्वाभीष्टदेवतायै समर्पयति । × ×

**Colophon :**

इति श्रीमद्राजाधिराजपरमेश्वरेण निजभुजबलाकान्तसमस्तसामन्तनराधिप चक्रचूडामणिमञ्जीरनीराजितचरणकमलयुगलेन × × श्री वीरनञ्ज-भूपालेन विरचिते काणादसङ्ग्रहविवरणे अभावपदार्थः समाप्तः ॥

## 531

Sl. No. 35663 **काणादसिद्धान्तचन्द्रिका** Ms. No. P. 580/2

**Beginning :**

नत्वा विशुद्धविज्ञानं दक्षिणामूर्तिमीश्वरम् ।
कुर्वे काणादसिद्धान्तचन्द्रिकां बालबुद्धये ॥

इह हि पदार्थनां साधर्म्यवैधर्म्यतत्वज्ञानमपवर्गहेतुरिति पदार्थतत्त्व निरूप्यते । प्रमाविषयः पदार्थः। स द्विविधः । भावोऽभावश्च ।

**End :**

दीधितिकृतस्तु शक्तिसंख्याक्षणकरणत्वकार्यत्वविषयत्वविशेषणत्वादी-नतिरिक्तानेव पदार्थानभ्युपगच्छन्ति । यथाचतत्तथा पदार्थखण्डनादौ व्यक्त-मिति विस्तरभीतेर्नेह प्रतन्यत इति सर्वमनवद्यम् ॥

वटस्य पत्रे मूले च स्थितिर्येषां विकल्प्यते ।
सूरिभिस्तानहं वन्दे विश्वरूपेन्द्रयोगिनः ।
तत्कृपापाङ्गनिर्धूतजडिमाखिलशास्त्रवित् ।
सिद्धान्तचन्द्रिकामेतां गङ्गाधरसुधीर्व्यधात् ॥
अनया विशदीभूते न्यायवैशेषिकाध्वनि ।
निर्विशङ्कं सञ्चरन्तु बाला व्युत्पत्तिकाङ्क्षिणः ॥

Colophon :

इति श्रीसकलविद्यानिधानेन गङ्गाधरसुधीकृता सिद्धान्तचन्द्रिका समाप्तिमगमत् ॥

## 532

SI. No. 35668 कणादसिद्धान्तचन्द्रिकाव्याख्या Ms. No. P. 719/2

Beginning :

नन्दनन्दपदद्वन्द्वं निधाय हृदि चिन्तया ।
तनोति कुतुकं किञ्चिद्रघुदेवस्समासतः ॥
कामहस्तधृतसास्त्रकार्मुकं
पौषमद्भुतमुदीक्ष्य कुप्यतः ।
धूर्जटेर्नयनकोणशोणता
हन्तु सर्वजग × द्रवम् ॥
पदार्थतत्वं यदिदं शिरोमणिः
निर्धृतवान् × मेतस्य दूष × ।
तदेव तर्केण विचारयाम-
स्सदर्थकेने × खण्डनेन ॥
प्रसङ्गात्पदार्थतत्वं विवेक्तुं प्रतिजानीते अथेत्यादिना ॥

End :

तन्मतव्युत्पत्तिरूपसञ्चारशासनवाक्यार्थे अधिकारिविशेषसमर्पकतया व्युत्पत्ति काङ्क्षिण इत्यस्य प्रकृतवाक्यार्थतत्वं निर्वाहकत्वमेवेति शिवम् ।

श्रीदेवसिंहनृपतेस्तनयः
श्रीविश्वरूपयतिराजकृतानुबन्धी ।
श्रीचन्द्रचूडचरणाम्बुजगर्भदासो
गङ्गाधराध्वरिवरःश्रुतपारदृश्वा ॥

श्रीमत्कणादचरणाक्षमुनीन्द्रसूक्ति
पद्मानुसारिविदुषां बहुशो निबन्धः ।
दृष्ट्वा स्वनिर्मितनयोज्वलचन्द्रिकायां
नाम्ना प्रसाद इति यां विवृतिं व्यतानीत् ॥

तत्रेर्ष्यया कतिचित्कलयन्तु दोषा-
नावेदयन्तु च गुणानपरे बुधेन्द्राः ।
तेऽमी चिरन्तननवीननिबन्धभाजो
यस्मात्तदुक्तिलवसङ्कलता ममैषा ॥

Colophon ;

श्रीमद्वाधूलकुलजलधिसुधांशु श्रीदेवसिंहसुमतिनन्दनस्य गङ्गाधराध्वरिणः कृतिः कणादसिद्धान्तचन्द्रिकाप्रसादः समाप्तः ॥

## 533

Sl. No. 35669 कणादसिद्धान्तचन्द्रिकाव्याख्या Ms. No. P. 768/3

Beginning :

यो ध्वान्तमान्तरमुदस्यति बोधदीपा-
लोकेन सर्वमवताद्दयया प्रसन्नः ।
चिन्मुद्रया कलितपाणिरसौ स देवी
गेही वटद्रुमतलेन मम × स्तु ॥
प्रारिसिप्सितस्य ग्रन्थस्य ×
× चिकीर्षितं प्रतिजानीते—नत्वेत्यादि ॥

End :

आदिपदेन विशेषत्वादिपरिग्रहः । × संभावितशङ्कानिरसनं तदीयग्रन्थ एव सुव्यक्तमित्याह—यथा चैतदिति । प्रकारणमुपसंहरति इतीति ॥

Colopon ;

इति वाधूलकुलजलधिसुधांशुश्रीदेवसिंहसुमतिनन्दनस्य गङ्गाधराध्वरिणः कृतौ कणासिद्धान्तचन्द्रिकाप्रसादः समाप्तः ॥

श्रीमत्कणादचरणाक्षमुनीन्द्रसूक्ति
पद्यानुसारिविदुषां बहुशो निबन्धान् ।
दृष्ट्वा स्वनिर्मितनयोज्वलचन्द्रिकायाः
नाम्ना प्रसाद इति यावदमुं व्यातानि ॥ नातं (?)

## 534

Sl. No. 35664 **काणादसिद्धान्तचन्द्रिका** Ms. No. P. 719/1

Beginning :

ओं नमस्सर्वभूतानि विष्टभ्य परितिष्ठते
अगण्डानन्दरूपाय पूर्णाय परमात्मने ॥
अथ पदार्थतत्वं निरूप्यते—
तत्र दिक्कालौ नेश्वरादतिरिच्येते; मानाभावात् ।
तत्र निमित्तविशेषसमवधानवशादीश्वरादेव तत्कार्यविशेषाणां उपपत्तेः ।

End :

तस्मात्कार्यत्वं च × व्यतिरिक्तं भिन्नमेवेति कृतं पल्लवेन ।
अर्थानां युक्तिसिद्धानां मदुक्ता × ।
सर्वदर्शनसिद्धान्तविरोधो नैव दूषणम् ॥
नीतिरेषा न दोषाय सेविता पूर्वपण्डितैः ।
यन्निजोक्तिविचाराय याचन्ते पुरुषः परान् ॥

Colophon :

इति श्रीमहो × चार्यविरचित (पदार्थतत्वनिरूपणं) समाप्तम् ॥

Extra information :

वस्तुतस्तु 'पदार्थतत्त्वम्' 'पदार्थखण्डनशिरोमणिः' इति नामभ्यां प्रसिद्ध एवायमपि ग्रन्थः ॥

## 535

Sl. No. 35670 **कणादसिद्धान्तचन्द्रिका** Ms. No: P. 3287

Beginning ;

प्रारिप्सितस्य ग्रन्थस्य अविघ्नेन परिसमाप्तये कृतमिष्टदेवतानमस्कारात्मकंमङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीतेनत्वेत्यादिना । ननु मङ्गलस्य निष्प्रयोजकत्वान्नाचरणीयं + वाच्यम् ।

End :

प्रमाणाधिक इत्यादौ तद्वासत्वसम्प्रतिपत्तेः ।

प्रकृते विचा × मपातबोधानां शास्त्रव्युत्पत्तिकांक्षिणं तन्मतव्युत्पत्ति निरूपसंचाराशासनवाक्यार्थे अधिकारविशेषसमर्पकतया व्युत्पत्तिकांक्षिण इत्यस्य प्रकृतवाक्यार्थनिवहकत्वमेवेति शिवम् ॥

Colophon :

श्रीदेवसियामठस्तनयप्रतीत

श्रीविश्वरूपयतिराजकृपानुसिद्धिः ।

श्रीचन्द्रचूडचरणाम्बुजगर्भवास

गङ्गाधराध्वरिवरः श्रुतपारदृश्वा ॥

श्रीमत्कणादचरणाक्षमुनीन्द्रसूक्ति

पद्यानुसारि विदुषां बहुशो निबन्धः ।

इति ग्रन्थः समाप्तः ॥

536

Sl. No. 35677 कारकव्याख्या Ms. No. P 2418/2

Beginning;

नत्वा शम्भोः पदाम्भोजे जयरामः समासतः ।

करोति कारके व्याख्यामिह संख्यावतां मुदे ॥

तत्र चैत्रस्य तण्डुलं पचतीत्यादौ चैत्रादावतिव्याप्तिः । अनुमत्यादिप्रकाशनद्वारा सम्प्रदानादेरिव तण्डुलसम्पादनद्वारा × ।

End :

भावक्रियापदे × यस्य धर्मेण धर्मान्तरं निरुक्तत्वसामानाधिकरण्येन सम्बध्यते तत्र सप्तमीति सूत्रार्थ इत्यदोषः ॥

Colophon :

इति श्रीमहोपाध्यायश्रीजयरामन्यायपञ्चाननभट्टाचार्यवि × ॥

537

Sl. No. 35685 कुर्वद्रूपत्वपरिष्कारः Ms. No. C. 4699/30

Beginning :

प्रबहुपवनवेगघट्टितोऽपि

स्खलति न यज्जगदण्ड पिण्डभाण्डः ॥

गुरुलघुतुलनातुलाप्रकाण्ड-

द्रढिमगुणत्रितयस्य यस्य विष्णोः ॥ +

सकलाङ्कुरकारी बीजानुगतं तदकारिबीजव्यावृत्तं कुर्वद्रूपत्वं नाम सामान्यं न कल्पयितुं उचितं गौरवात् ॥

End :

अस्तु वा धर्मयोस्समनियमावच्छेदकत्वग्रहण × प्रतिबन्धकतावच्छेदकं तेन घटत्वस्य × विशिष्ट सत्तात्वे प्रतियोगितावच्छेदकत्वबुद्धिग्रहानुपपत्तिः ॥

Colophon :

— — —

## 538

Sl. N. 35687 क्रोडपत्रम् (कृतिसाध्यताज्ञानकारणताविचारः) Ms. No· .C 93

Beginning :

प्रवृत्तिमात्रे कृतिसाध्यत्वनिश्चयः चिकीर्षा च हेतुः। साक्षाद्धेतुत्वे यत्र पाकादौ कृतिसाध्यताग्रहोत्तरक्रमेणेष्टसाधनताज्ञानचिकीर्षे तत्र प्रवृत्यनापत्तेः। प्रवृत्तिं प्रति कृतिसाध्यताज्ञानस्य साक्षाद्धेतुत्वे तद्धर्मिकनानाविधाप्रामाण्यज्ञानस्योत्तेजकत्वकल्पने गौरवाच्च।

End :

न च कार्यस्थलीयधर्मेच्छायां धर्मत्वप्रकारकज्ञानत्वेनैव हेतुत्वम्। न स्विष्टसाधनत्वज्ञानत्वेनैव हेतुत्वम्। अन्यथा पुत्रसुखत्वमित्रसुखत्वप्रकारकेच्छास्थले स्वेष्टसाधनताज्ञानत्वेन हेतुत्वम् ॥

Colophon :

इति श्री मथुरानाथभट्टाचार्यविरचितः कृतिसाध्यताज्ञा नकारणताविचारः समाप्तः ॥

## 539

Sl. No. 35693 क्रोडपत्रम् (तर्कसङ्ग्रहः) Ms. No. P. 9338/3

Beginning :

यत्प्रकाशाच्च लोकानां मोहान्धतमसश्च्युतिः।

तं वन्दे वेङ्कटसुधीः स्वान्तरायोपशान्तये ॥

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ताः। तल्लक्षणन्तु—स्वभिन्नलिङ्ग-जन्यस्वविशेष्यकस्वसजातीयभेदानुमिति—

End :

स्वसजातीयभेदकत्वे सतीत्यपि विशेषणीयत्वात्। न च यत्राङ्कुरादिविशेषे स्वभिन्नलिङ्गेन स्वसजातीयभेदानुमितिर्न जाता, तत्राव्याप्तिः—

Colophon :

— — —

## 540

Sl. No. 35703 क्रोडपत्रम् (धर्मितावच्छेदकताप्रत्यासत्तिविचारः) Ms. No. P. 2202

Beginning :

अनुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः शामानाधिकरण्यम्। तेन एकपुरुषीयपरामर्शदशायां तच्छून्यपुरुषान्तरस्य नानुमितिः। तस्य समवायरूपकारणिानघटकसम्बन्धेन परामर्शकरणत्वात्। नव्यास्तु-समानधर्मितावच्छेदकत्वं अनुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः।

End :

एतन्मते गौरवमिति वाच्यम्। समवायप्रत्यासत्तिकल्पे विषयभेदेन लिङ्गादिभेदेन भिन्नासु पूर्वोपदर्शितविनिगमनाविरहेण अनन्तकारणताऽधिक्यात् तदपेक्षयात्मव्यक्तिभेदेन उपदर्शितकारणताकल्पनमेवोचितमिति संक्षेपः॥

Colophon :

इति श्री हरिरामतर्कवागीशविरचिता धर्मितावच्छेतकताप्रत्यासत्तिः सम्पूर्णा॥

## 541

Sl. No. 35763 क्रोडपत्रम् (चतुर्दशलक्षणी) Ms. No. .C 1209

Beginning :

श्रीदक्षिणामूतिरशेषमर्थं

विबोधयेच्चेतसि मे निषण्णः।

तत्प्रेरिता मद्रसना × मेत्य
वाग्वादिनी वादयतु प्रसन्ना ॥
यत्सामानाधिकरणेत्यादि ॥

End :

तेषां प्रत्येकं तत्तदवच्छेदकसम्बन्धेन तत्तदवच्छेदकावच्छिन्नसामानाधिकरण्यमेव विवक्षणीयम् । प्रदर्शितस्थले च द्रव्यभिन्नत्वप्रकारकप्रमात्वावच्छिन्नप्रतियोगिता न स्वावच्छेदकीभूतविशेष्यतासम्बन्धमेव विवक्षणीयम् ॥

Colophon :

— — —

## 542

Sl. No. 35799 क्रोडपत्रम् (पक्षता) Ms. No. C. 4671/15

Beginning :

शास्त्राणां परमं रहस्यमखिलाविद्यास्समस्ताः कलाः
श्रौतस्मार्तपुराणतन्त्रनिवहैर्यत्र स्वयं भासुराः ।
तच्चेत्सौम्यकृपाकराक्षलहरीभङ्गैर्जगज्जीवये
त्यक्त्वा श्रीपतिपादपद्ममनौ कुत्रापतेन्मे मतिः ॥ १ ॥

मूले—व्याप्तिपक्षधर्मतयोस्संगत्यप्रदर्शनेनेत्यादि ।

अनुमितिलक्षणैककार्यानुकूलत्वसङ्गत्या व्याप्तिस्वरूपनिरूपणानन्तरं पक्षधर्मातानिरूपणमित्यर्थः ॥

End :

इदं पुनरत्र तत्त्वम्—परम्परायास्सम्बन्धत्वस्य प्रामाणिकत्वे तु उक्तयावत्परम्परासम्बन्धशरीरे अन्तर्भाव्य तादृशपरामर्शसम्बन्धेन वह्निविशिष्टज्ञानत्वेन पर्वतविशिष्टज्ञानत्वेन वा पर्वतपक्षकवह्निसाध्यककलिप्यनिशीलकंव्याबाकं (?) ग्रहप्रकारास्फुटतया परिभावनीयाः ॥

Colophon:

इति पक्षताक्रोडपत्रे तत्त्वदीधितिस्समाप्तिमगमत् ॥

## 543

SI. No. 35826 क्रोडपत्रम् (बाधः) Ms. No. C. 1182

Beginning :

श्रीमद्गोपवधूस्वयङ्ग्रहपरिष्वङ्गेषु तुङ्गस्तन-
व्यामर्दाद्गलितेऽपि चन्द्रनरसस्याङ्गे वहन् सौरभम् ।
कश्चिज्जागरजातरागवयनद्वन्द्वः प्रभातश्रियं
बिभ्रत्कामपि वेणुनादरसिको जाराग्रणीः पातु नः ॥
उद्देश्यतावच्छेदकविधेयतावछेदकतातिरिक्त +

End :

+ बुद्धित्वावछिन्नजन्यतानिरूपितजनकातवछेदकीभूतवह्न्यभाव-
त्वावछिन्नविषयत्वावछिन्नत्वस्य प्रतिबन्धकतायां सत्त्वेऽपि नासम्भवः ॥

Colophon :

इति बाधक्रोडनिष्कर्षः ॥

## 544

SI. No: 35836 क्रोडपत्रम् (व्युत्पत्तिवादः) Ms. No. B. 863

Beginning :

श्रीमत्पद्मसरस्तीरभूतिभूषणविग्रहाम् ।
वन्दे वेकटशैलेन्दुज्योत्स्नां शुकपुरीश्वरीम् ॥
वंगीशवंशजनुषा विदुषा श्रीदेशिकाभिधानजुषा ।
व्युत्पत्तिवादवाणीगूढार्थाः प्रायशः प्रकाश्यन्ते ॥
अभेदतदतिरिक्तसंसर्गकशाब्दबोधप्रकारं सपरिकरमुपपादयति ।

End:

एतत्सूचनायैव पूर्ववत्समासव्यासससाधारणमित्यनिर्दिश्य साकारप्रदर्शन
नीलो घट इत्यादिना निर्दिष्टमिति ध्येयम् । विशिष्टस्वोत्तरत्वसंबन्धेनेनि ।

Colophon :

-- — — —

## 545

Sl. No. 35837 क्रोडपत्रम् (व्युत्पत्तिवादः) Ms. No. C. 1187

Beginning :

व्युत्पत्तिवादे पौषादिसमासविचारे यथाश्रुतशूलपाणिग्रन्थानुसारिणस्तु धनुरादिस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तेषु धनुरादिस्थरविसमाप्य मकरादि-स्थरव्यधिकरणशुक्लप्रतिपादादिदर्शान्तेषु वा पौषादिपदानां रूढत्वमेव स्वीकुर्वन्तीति ।

End :

सिद्धान्ते न वृश्चिकादिसंक्रान्तिमच्छिन्नकार्तिकाद्यप्रसिद्धेः माघादि पदशक्यतावच्छेदकं तु पूर्वोक्तमेव ग्राह्यम् । तत्रासंक्रान्तमाघादेरपि प्रसिद्ध्या एतादृशधर्मस्य शक्यतावच्छेदकत्वासम्भवादिति ॥

Colophon :

श्रीमद्वेदान्तब्रह्मतन्त्रपरकालगुरुचरणसरसीरुहाभ्यां नमः ॥

## 546

Sl. No: 35838 क्रोडपत्रम् (व्युपत्तिवादः) Ms. No. P. 1712

Beginning :

धात्वर्थः प्रथमान्तार्थो प्रधानमिति संशये ।
श्रीमानचलशर्मासौ वक्तुं किञ्चिद्व्यवस्थितः ॥

घटो भवतीति वाक्यात् प्रथमान्तार्थमुख्यविशेष्यकबोधसमर्थमिदं वाक्य मित्याकांक्षां प्रतिसन्दधानो मुख्यविशेष्यं प्रथमान्तार्थं प्रत्येति ॥

End :

नान्यथा कर्मप्रत्ययस्य हेतुव्यापारस्य फलविशेषणत्व एव प्रथमान्तार्थो मुख्यविशेष्यो न तु फलस्य व्यापारविशेषणत्वे इति । पुत्र इष्यते पुत्र-मिच्छतीत्यनयोरर्थभेद इति । भवति गौडमतानामपि परिष्कार इति सङ्क्षेपः ॥

Colophon :

इति श्रीमदचलोपाध्यायकृता टिप्पणी परिपूर्णा ॥

## 547

Sl. .N 35840 — क्रोडपत्रम् (व्युत्पत्तिवादः) — Ms. N. C. 2387

Beginning :

मर्यादेति–मर्यादाशब्दस्य समयबन्धादिपरत्वभ्रमनिरासायाह–सीमेति । समभिव्याहृतक्रियानधिकरणमित्यर्थः । तावन्मात्रस्योत्तरोत्तरकालदेशसाधारणत्वा दाह––कालनिष्ठमिति । +

End :

अवधित्वनिरूपकधर्म इति यावत् ।

तस्य च × नधिकरणकत्वविशिष्टस्वाश्रयकाश्यवधिकधर्मव द्देशव्यापकत्वसम्बन्धेन गमनेऽन्वयः । व्यापकत्वं स्वाधिकरणनिष्ठाभावमतियोगितानवच्छेदकचैत्रकर्तृकगमनत्वादिमत्त्वम् । स्वाधिकरणत्वं च काशीपूर्वत्वादि विशिष्टस्वाश्रयत्वसम्बन्धेनेत्यादिकं पूर्ववदित्यर्थः ॥

Colophon :

इति श्रीमहोपाध्यायतिम्मणाचार्यकृतिषु व्युत्पत्तिवादे मर्यादाघिविध्यर्थक यावच्छब्दप्रकरणविचारः ॥

## 548

Sl. No. 35849 — क्रोडपत्रम् (सत्प्रतिपक्षः) — Ms. No. B. 1160

Beginning :

करेण दधती पुरः × श्रीमती ॥ १ ॥

तरङ्गमोत्तमाङ्गः × सरस्वतीम् ॥ २ ॥

वैश्वामित्रादशेष × वेङ्कटार्यादु × तः ।

श्रीरङ्गार्यः सुमेधाः श्रुतिमकुटवचोनिर्मलीभूतचेताः ।

न्याये निस्सीमभूमा कलयति विदुषां प्रीतयेऽमुं प्रबन्धम् ॥ ३ ॥

नक्षत्रमाला सर्वज्ञमौलेरपि मनोहरा ।

प्रकाशयतु लोकानां सन्मार्गमियमादरात् ॥ ४ ॥

End :

न च पर्वतीयवह्निमान् तादृशपर्वत इति अनुमितिसादायैव वह्निमत्ताशपर्वते लक्षणोपपत्तिरिति वाच्यम् ॥

ताद्दशानुमितेः पौषविषयकत्वाव्यापकविषयताशून्यत्वाभावेन लक्षण
× तादित्याहुः ॥ तदसत् ॥

Colophon :

74 तम पत्रे—

इत्याश्लेषानक्षत्रमुक्ता ×

## 549

Sl. No. 35851 क्रोडपत्रम् (शतकोटिः) Ms. No. P. 3145/2

Beginning :

यस्य श्रीनखकान्तिनाकसरितः कूर्मायतेऽङ्घ्रिद्वयं
सेवानम्रसुरेन्द्रवज्रमकुटीमाला मरालायते।
पश्यन्निर्जरयोषिदम्बकततिः मीनप्रपञ्चायते
क्षोणीशाङ्गलयः पयोज × व्यात्स नारायणः॥

प्रकृतपक्षतावच्छेदक × सत्प्रतिपक्षत्वम्॥

End :

वह्न्यभावव्याप्यवत्कालीनघटवद्ध्रदकालीनह्रदो वह्निमान् इत्यत्र सत्पतिपक्षे अव्याप्तिः। अव्यवहितत्वसंबन्धेन तन्निवेशे अश्रयासिद्धावतिव्याप्तिः—

Colophon :

— — —

## 550

Sl. No. 35853 क्रोडपत्रम् (शतकोटिखण्डनम्) Ms. No. P. 2420

Beginning :

यस्य श्रीनखकान्तिनाकसरितः कूर्मायतेऽङ्घ्रिद्वयं
सेवानम्रसुरेन्द्रवज्रमकुटीमाला मरालायते।
पश्यन्निर्जरयोषिदम्बकततिः मीनप्रपञ्चायते
क्षोणीशाङ्गलयः पयोजमुकुलन्त्यव्यात्स नारायणः॥

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यता × ।

**End :**

प्रकारताशालिनिश्चयविशिष्टनिश्चयीयजलवद्ध्रदविषयतात्वेन विनि-
गमनाविरहेण प्रयोजकता ॥

**Colophon :**

— — — —

## 551

Sl. No. 35854 क्रोडदत्रम् (शतकोटिमण्डनम्) Ms. No. P. 3734/2

**Beginning :**

यस्य श्रीनखकान्तिनाकसरितः काष्ठायतेऽङ्घ्रिद्वयम्
सेवानम्रनरेन्द्रवज्रमकुटीमाल ामराळायते ।
पश्यन्निर्झरयोषिदात्मकततिर्मीनप्रपञ्चायते
क्षोणीशाञ्जलयः पयोजमुकुलन्त्यव्यात् स नारायणः ॥

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपित × सत्प्रतिदक्षत्व
मित्युक्तम् ॥

**End ;**

स्वरूपसंबन्धावच्छिन्नेति ॥
विष्णाविवयिद्वारिणिनिष्णात मतीनां
सिंहासनमेव प्रतिसुष्णातु दुरम्भः ।
कृष्णासरिदुष्णा ×
× सवामनुपुष्णातु सदा नः ॥ (?)

**Colophon :**

— — — —

## 552

Sl. No. 35856 क्रोडपत्रम् (सत्प्रतिपक्षः) Ms. No. C. 1247

नामं नामं घनश्यामं
धाम पद्मासखं परम् ।
कस्तूटिरङ्गसुधिया
कुतुकात् किञ्चिदुच्यते ॥

पक्षतावच्छेदकविशिष्टपक्षग्रहत्वाव्यापक × साध्यतावच्छेदक ×
सत्प्रतिपक्षलक्षणम् ॥

End ;

संशयद्वयस्यापि व्यावृत्तेः | प्रत्येकं व्यावृत्तिप्रदर्शनं निश्चयत्वनिरुक्त्या
दलद्वयापारालं (?) चासङ्गतिमापद्यत इति स्फुटमेवेत्यलम् ॥

Colophon :

— — —

## 553

Sl. No. 35857 क्रोडपत्रम् (सत्प्रतिपक्षः) Ms. No: B. 1027

Beginnig :

रघुवरचरणद्वन्द्वध्यानसुधास्वादनित्यसन्तुष्टः ।
सत्प्रतिपक्षविचारं कुरुते श्रीकृष्णताताचार्यः ॥

सत्प्रतिपक्षलक्षणे प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृत
साध्यतावच्छेदकावच्छिन्नप्रकारतेत्यादिक्रमेण निवेशः कृतः ।

End :

एतेन सुन्दरवह्निमदित्यादौ वह्निमत्त्वादशपर्वतघटकतया विशिष्टद्वयाघटि
तत्वं नास्तीत्यपास्त × तादृशप्रतियोगिताघटितविशिष्टद्वयघटि
तत्वस्याक्षतत्वादिति दिक् ॥

Colophon:

इति श्री कृष्णताताचार्यकृतसत्प्रतिपक्षविचारः सम्पूर्णः ॥

## 554

Sl. No. 35858 क्रोडपत्रम् (शतकोटिखण्डनम्) Ms. No: P. 3033/3

Beginning :

श्रीकृष्णाभिधतातपादचरणांभोजं सरन् तत्कृत-
ग्रन्थोक्ते शतकोटिदूषणगणे कैश्चित् समुद्भावितम् ।
दोषाभासमलम्नकं सरभसं संदर्शयन् पण्डित-
व्रातस्याधिकमोदमद्य तनुते गोपालतातः सुधीः ॥

विशिष्टपक्षग्रहत्वाव्यापकविशिष्टान्तरविषयित्वाव्यापकपक्षसाध्यवैशिष्ट्यग्रह
त्वव्यापक—

End :

किंबहुना–जनकतायां विशिष्टान्तरविषयित्वानवच्छिन्ननिवेशनेन सर्वसाम ञ्जस्ये प्रतिबन्धकतायां तन्निवेश्य तन्निबन्धनाव्याप्त्यादिवारणाय विशेषणान्त रोपादानं प्रक्षाळनाद्धीतिन्यायेन व्यर्थमेवेत्यलं पल्लवितेन ॥

Colophon :

— — —

## 555

Sl. No. 35859 क्रोडपत्रम् (सत्प्रतिपक्षः) Ms. No. P. 3063

Beginning :

नमामि परमात्मानं जानकीप्राणवल्लभम् ।
निवृत्तये समस्तानां प्रत्यूह + रक्षसाम् ॥

प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृतसाध्यतावच्छेदविशिष्टवैशिष्ट्यग्रहविरो धित्वे सति विशिष्टपक्षग्रहाविरोधि—

End :

वृत्तिव्याप्यवत्कालीनह्रदो वह्निमान् इत्यत्र एकरूपेण प्रतिबन्धकत्वप्रक्षे वह्न्यभावाभाववदवृत्तिव्याप्यवत्तादिह्रदे अतिव्याप्त्यापत्तिरित्यर्थः ॥

Colophon:

— — —

## 556

Sl. No. 35860 क्रोडपत्रम् (शतकोटिटीका) Ms. No. P. 3145/1

Begenning ;

यत्पादाम्बुजनि × भिरणुभिः स्त्रीरत्नमाविष्कृतं
यच्चञ्चद्भुजदण्डयोगकधवाभग्नं धनुर्भार्गवम् ।
नानाधान × त्रिते स्थितमग्नुं पीठे भजे सीतया
यं × मुखस्पृश × जानन्त्यपि ॥

गुरुचरणरचितायाः
शतकोट्या विजयराधवस्तनुते ।
धरमतिशितशतकोटिटीकां
गुर्वो सुदुर्गमां × ॥

Enp :

स्वाश्रयत्वानिवेशे मेयत्वविशिष्टसाध्याभावाभाववदवृत्तिमत्पक्षादिति-व्याप्तिः स्यात् । अवच्छेदकतया स्वभाववति—

Colophon :

— — —

## 557

Sl. No. 35865 क्रोडपत्रम् (सत्प्रतिपक्षः) Ms. No. P. 6137

Beginning :

प्रकृतपक्षतावच्छेदकावछन्नविशेष्यगनिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताशालि-अनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सती—

End :

तादृशप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेकविषयित्वावच्छिन्नानुमिति-निष्ठजन्यतानिरूपितजनकतावच्छेदकत्वत्य च × सप्प्रतिपक्षोन्नायके अतिव्याप्तिरितिध्येयम् ॥

Colophon :

इति सत्प्रतिपक्षविभाजकचन्द्रनारायणीयं समाप्तम् ॥

## 558

Sl. No. 35869 क्रोडपत्रम् (सत्प्रतिपक्षः) Ms. No. C. 1238/2

Beginning :

प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिग्रहप्रतिबन्धकानावच्छेदिका सती प्रकृतपक्षसाध्यग्रहाविरोधिप्रकृतपक्षसाध्यग्रहविरोध्युन्नायकतावच्छेदिक यादृश-विशिष्टविषयता तादृशविशिष्टत्वं सत्प्रतिपक्षत्वम् ।

**End :**

विशिष्टसाध्यघटकधर्मव्यावृत्तस्य निवेशनीयतया उक्तासाधारण्यविषयकत्वावच्छिन्नविशेष्यकत्वावच्छिन्नप्रतिबध्यतामादाय लक्षणसम्भवादिति ध्येयम् ॥

**Colophon :**

शङ्करभट्टविरचितं पत्रं समाप्तम् ॥

## 559

**Sl. No: 3587**3 क्रोडपत्रम् (सत्प्रपक्षः) Ms. No. C. 1241

**Begioning :**

सत्प्रतिपक्षलक्षणे सत्यन्तदले पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपित साध्यतावच्छेदकतावच्छेदकावच्छिन्नप्रकाताशारलिग्रहत्वनिष्ठस्वरूपसम्बन्ध रूपावच्छेदकताकप्रतिबाध्यतानिवेशे ह्रदः काञ्चनमयवह्निमानित्यादौ वह्न्यभावव्याप्यवद्ध्रदे अव्याप्तिरिति भट्टाचार्यैरुक्तम् ।

**End :**

प्रकृतपक्षतावच्छेदकावच्छिन्नोद्देश्यकप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुनिरूपित व्याप्तिविशिष्टप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकनिरुक्तानुमितित्वव्यापकविषयताशून्यज्ञानावृत्तित्वस्यैव निवेशनीयत्वात् ॥

**Colophon :**

-- — — —

## 560

**Sl. No. 35876** क्रोडपत्रम् (सत्प्रतिपक्षः) Ms. No. C. 1246/1

**Beginning :**

वन्दे श्रीरामचन्द्रस्य पदपाथोरुहद्वयम् ।
यत्प्रसादादपि शिला विदुषी समजायत ॥

यत्तु ननु वह्न्यभाववांन् ह्रदो वाह्निमानित्यादौ प्रकृतानुमित्यप्रसिध्या सत्प्रतिपक्षाव्याप्तिरिति चेन्न ।

End :

× वह्न्यभावव्याप्यवद्ध्रदत्वविशिष्टस्य वह्न्यभाववद्ध्रदत्वे असत्वेन वह्न्यभावाव्याप्यवद्ध्रदत्वे सर्वोऽपि तदवच्छिन्नोन्नायकतावच्छेदकत्वस्य तत्रासत्वेन लक्षणसमन्वयायोगादिति सुधीभिः विभावनीयम् ॥

Colophon:

— —

## 561

Sl. No. 35891 क्रोडपत्रम् (सत्प्रतिपक्षः) Ms. No. C. 2424/3

Beginning :

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिअनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सती, पक्षतावच्छेदकविशिष्टपक्षग्रहत्वाव्यापकसाध्यतावच्छेदकविशिष्ट—

End :

प्रतिबन्धकतावच्छेदकत्वस्य तादृशप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकत्वस्य च वह्न्यभावव्याप्यव्याप्यद्ध्रवदत्वावछिन्नेऽतिव्याप्तिरिति ध्येयम् ॥

Colophon:

इति सत्प्रतिपक्षपत्रं समाप्तम् ॥

## 562

Sl. No. 35896 क्रोडपत्रम् (शतकोटिमण्डनम्) Ms. No. C. 4 (99

Beginning :

नन्वेवमपि जनकतावच्छेदकत्वं स्वरूपसम्बन्धरूपमेव तावतापि बाधेऽतिव्याप्तिवारणसम्भवादिति चेन्न । प्रतिबन्धकताया अनतिरिक्तवृत्तित्वनिवेशस्यावश्यकत्वे जनकतायाः स्वरूपसम्बन्धरूपावच्छेदक + एव लाघवं सम्भवति ।

End ;

न च वह्न्यभावव्याप्यवह्न्यभावव्याप्यवत्ताज्ञानमपि वह्न्यभावव्याप्यवत्ताविषयकत्वेन प्रतिबन्धकमेवेति + तथापि वह्न्यभावव्याप्यं यद्वह्न्यभाववद्ध्रदकालीनजलं तद्व्याप्यघटितोभयवद्ध्रदेऽतिव्याप्तेः ॥

**Colophon :**

इति श्रीलक्ष्मीनृसिंहशास्त्रिविरचितशतकोटिव्याख्यानानन्दांल्वारुरचित-शतकोटिखण्डननिराकरणं समाप्तम् ॥

## 563

Sl· No: 35935 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. P. 2426/1

**Beginning :**

अथ स्वरूपसम्बन्धरूपावच्छेदकत्वकल्पे पाषाणमयपर्वतातिव्याप्ति-रित्युक्तं तन्न सङ्गच्छते । ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयकत्वान-वच्छिन्नत्वोभयाभाववत्प्रतिबन्धकतावच्छेदकत्वस्य स्वरूपसम्बन्धरूपावच्छेदक-त्वस्य यद्रूपावच्छिन्नविषयित्वे विवक्षणादिति चेन्न ।

**End :**

विरोधिविषयतानिष्ठप्रयोजकतानिरूपितप्रयोज्यतायां + यथा-संनिवेशे वैयर्थ्याभावादिति ज्ञेयं । अथ विरोधिविषयतापदेन साध्यवत्पक्ष-विषयिताबहिर्भूतविषयिता विवक्षिता ।

**Colophon :**

आनन्दाभिधवत्सरोदगयने नानाधिदैवे दिने
मासे फाल्गुनिके छदे हि धवले नत्वा रमावल्लभम् ।
श्रीशैलान्यजो निधाय हृदये त्र्यय्यन्तविद्यागुरुं
सत्सामान्यनिरुक्तिपत्रमलिखत्कृष्णो महामोदतः ॥

## 564

Sl. No. 35936 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. P. 2426/2

**Beginning :**

अथ व्यापकविषयताशून्यत्वं निवेश्य जातिमान्वह्न्यभाववानिति ज्ञान वारेणेऽप्यभाववान्वह्न्यभाववानिति ज्ञानावारणात्—

**End :**

तथापि साध्याभाववद्वृत्तित्वमेयत्वविशिष्टमेयत्वस्य स्वावच्छिन्न विषयताप्रतीतितावच्छेदकसाध्याभाववद्वृत्तिमेयत्वस्य अधिकरणाप्रसिद्धिरिति दिक् ।

**Colophon :**

आनन्दाभिधवत्सरोदगयने नानाधिदैवे दिने
मासे फाल्गुनिके छदे हि धवले नत्वा रमावल्लभम् ।
श्रीशैलान्वयजो निधाय हृदये त्रय्यन्तविद्यागुरुं
सत्सामान्यनिरुक्तिपत्रमलिखत्कृष्णो महामोदतः ॥

## 565

Sl. No. 35941 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. P. 3056/1

**Beginning :**

सर्वक्षत्रियवर्गगर्वमथनप्रोद्भतकीर्तिं सदा
× पादाम्भोजं जगन्नायकम् ॥ १ ॥
अशेषशिष्य × श्रीनिवासगुरुं भजे ॥
गादाधर्यां तत्साक्षात्कारेति । अनुमितिपरामर्शयोः–

**End:**

विशेषणविधया प्रतिबन्धकत्वात् न कालान्तरे प्रतिबध्यज्ञानानुपपत्तिप्रसङ्ग
इत्यास्तां विस्तरः ॥

**Colophon :**

इतिप्रथमलक्षणविचारः ॥

## 566

Sl. .No. 35942 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. N. P. 3139

**Beginning :**

करेण दधती पुरः कमलवासिनी भ्रलतां
स्य × सनमिषेण तद्विहरि मीक्षितुस्तुष्टये ।
शिव ×हितुस्यार्थविभीतये समासेदुषी
दया समुदयात्मिका जयति देवता श्रीमती ॥
\+ + +
मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे बाधितादिहेतावव्याप्तिं सोपपत्तिकं
वर्णयामास गदाधरः ।

यथा हिमवात् वह्निमान् इत्यादौ जलव्यापकवह्न्यभावे दोषः। तथा ह्रदो वह्निमद्वानित्यादौ ह्रदनिष्ठात्यन्ताभावप्रतियोगित्वव्याप्यवह्निरापि दोष एव।

Colophon :

— — —

## 567

Sl. No. 35943 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No: P. 3140

Beginnig :

गादाधर्यां सामान्यनिरुक्तौ—मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः—अथ च प्रथमलक्षणे समूहालम्बनविषयोदासीनपटादि वारणाय धात्वर्थज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकविषयताश्रयत्वनिवेशाव-श्यकतायां—

End :

तत्र प्रथमेऽनुमित्यप्रसिद्धिस्थले निर्वह्निनिष्ठवह्न्यभावादौ लक्षणाव्याप्तिः पूर्वपक्षस्यैवानर्थीत्यादिदीधित्यसङ्गतिः × प्राचीनैर्दोषत्वेन व्यवह्रियमा-णस्य दर्शितलक्षणानाक्रान्ततया लक्षणस्याव्याप्तत्वप्रसङ्गश्चेति॥

Colophon :

इति पुरुषोत्तमशास्त्रिविरचितगादारीयसामान्यनिरुक्ति क्रोडस्समाप्तः ॥

## 568

Sl. No. 35944 क्रोडपत्रम् (सामान्यनिरु ः) Ms. No. P. 3142

Beginning :

श्रीस्तनस्तबकन्यस्तकस्तूर्यध्यस्तकौस्तुभम्।
तिस्तुलोरस्थलं बिभ्रद्वस्तु स्वस्तिकृदस्तु नः॥

ननु यद्विषयकत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वं स दोष इति दोष-लक्षणे ज्ञानस्येत्यत्र + तत्त्वं दोषत्वमित्यर्थः प्रतीयते।

तत्रानुमितिपदेन अनुमितिसामान्यविवक्षणे कस्याश्चिदपि प्रतिबन्ध-कतायाः यावदनुमितिनिरूपितायाः दुर्वचत्वादसम्भव इति—

End :

अनाहार्यविषयितासामान्ये तद्विषयताया अप्रवेशात् + स्वांशेना हार्यत्वस्यैव सर्वैर्निवेशनीयत्वादिति ।

Colophon :

इति शठमर्षणकुलतिलकस्य सर्वतन्त्रस्वतन्त्रस्य ति × लवुक्कपट्टणाण्णया चार्यदीक्षितस्य सुतेन पितृव्यश्रीनिवासार्यकरुणापरिणाहलब्ध × घास कल्पेन वेङ्कटाचार्येण कृते तर्कजञ्झामारुते हेत्वाभाससामान्यलक्षणविचारः ॥

**569**

Sl. No. 35945 क्रोडपत्रम् (सामान्निरुक्तिः) Ms. No. P. 3381/1

Beginning :

यादृशविशिष्टविषयकनिश्चयविशिष्टत्वं प्रकृतानुमित्यवृत्ति, तादृशविशिष्ट विषयताऽन्यप्रतीतिविषयत्वनिवेशे ह्रदो वह्निमान् इत्यादौ वह्न्यभाववज्जल-वद्ध्रदादेर्वारणं न सम्भवति ।

End :

वह्निमान् पर्वतो महानसीयवह्न्यभाववान् इति अनाहार्यज्ञानसंभवेऽपि वह्निमान् पर्वतो महानसीयवह्निमानितिज्ञानीयविषयतायाः वह्निमान् पर्वतो महानसीयवह्न्यभाववानित्यनाहार्य × ×

Colophon

— — —

**570**

Sl. No. 35948 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. P. 3723/6

Beginning :

भवकोदण्डविदितबाहुदण्डैकचण्डिमा ।
भव्याय भूयादव्याजकरुणः कोऽपि भूपतिः ॥ +
दीधित्या फलितः गदाधरगुरुव्याकारविस्तारितः
तस्य न्यायसुरद्रुमस्य भवतु च्छाया सतां भूतये ॥

टीकायां लिङ्गांशनिवेशस्य —

End :

वह्न्यभावकालीनवह्निमद्वृत्तित्वे वह्नित्वाव्यापकीभूताभावप्रतियोगि-त्वादिविशेषणविशिष्टह्रदवृत्तिजलत्वादेरेव तादृशधर्मस्य प्रसिद्धतया उक्ताति-व्याप्तेः दुर्वारत्वात् ॥ × ×

Colophon : — — —

## 571

Sl. No. 35953 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. P. 3728/2

Beginning :

भवकोदण्डविदितबाहुदण्डैकचण्डिमा ।
भव्याय भूयादव्याजकरुणः कोऽपि भूपतिः ॥
वीरराघवपादाब्ज × भूतये ॥
योऽसौ शङ्कर × सतां प्रीयते ॥

टीकायां लिङ्गांशनिवेशस्यानिष्प्रयोजकतयेति । लिङ्गज्ञानमिति— अखण्डाभावसंपादकतयेति ।

End :

एवमाहार्यज्ञाने भेदकूटमादाय दोष उन्नेय इति । एवञ्च विभिन्न-रूपेण प्रतिबन्धकताध्रौव्ये कथमुक्ताव्याप्तिरिति चेन्न—यत्नविषयविशेषे उक्तजातीयदोषविशेषे—

Colophon : — — — —

## 572

Sl. No. 35954 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. P. 3729/1

Beginning :

श्री : स्तबकन्यस्तकस्तूर्यध्यस्तकौस्तुभम् ।
निस्तुलोरस्स्थले बिभ्रद्वस्तु स्वस्तिकृदस्तु नः ॥

ननु यद्विषयकत्वेनानुमितिप्रतिबन्धकत्वं स दोष इति दोषलक्षणे × न षष्ठ्यर्थाधेयत्वस्य तृतीयाप्रकृत्यर्थयद्विषयकत्वेनान्वयः तस्य तृतीयार्थावच्छेद-कत्वेन—

End :

निवेशनीयत्वादिति वाच्यम्। तथा सति भवदुक्ताव्याप्तेः पक्षधर्मतानिश्च-यासमवहिततन्निश्चयोत्तरानुमितौ उभयसत्त्वाद्विरोधिविषयताप्रयुक्तोभयाभावस्य दुरुपपादत्वात्॥

Colophon :

— — —

## 573

Sl. No. 35970 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. C. 985

Beginning :

अथ प्रकृतपक्षकप्रकृतसाध्यकप्रकृतलिङ्गकानुमितिनिष्ठकार्यतानिरूपक-ग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वं हेतुदोषत्वं इति कल्पे—

End :

तादृशविशिष्टविपयकप्रतीतिविषयतानवच्छेदकं यद्यत् स्वं तदन्यत्वस्य विवक्षितत्वात् बाधज्ञान × धकतानुतादृशसाध्याभावरूपविशिष्टविषय-कत्वानतिरिक्तवृत्तिकेत्याहुः॥

Colophon :

इति सामान्यनिरुक्तिवादार्थः समाप्तः॥

## 574

Sl. No. 35974 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. P. 5442/8

Beginning :

यद्विषयकत्वेन लिङ्गज्ञानस्येति मूले द्वितीयलक्षणे संयोगाभाववद्वृ-क्षादौ अव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामते अनतिरिक्तवृत्तित्वनिवेशव्यावृत्तिः बोध्या। न चाव्याप्यवृत्तित्वज्ञानकाले—

Enp :

अलक्ष्यत्वे तु पक्षः साध्यवान् साध्यव्याप्यो हेतुः हेतुमांश्च पक्षः इत्याकारकानुमितेरेव विवक्षितत्वात् इति ॥

Colophon :

इति सामान्यनिरुक्तौ द्वात्रिंशद्विचारः ॥

575

Sl. No. 35978 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. P. 5442/6

Beginning :

यदनुग्रहमात्रेण जयिष्ये सर्ववादिनः ।
तं नमामि विभूत्यर्थं गौरीशं सगणाधिपम् ॥

स्वसजातीयविशिष्टान्तराघटितत्वं मेयत्वविशिष्टव्यभिचारादौ अतिव्याप्तिवारणार्थं भट्टाचार्यैः निवेशितम्। स्वसजातीयविशिष्टान्तराघटितत्वं च—

End :

स्वावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताघटितसंबन्धेन वृत्तित्वनिवेशे प्रयोजनाभावादित्युच्यते, तदा स्वावच्छिन्नाविषयकप्रतीति × × घटकतावच्छेदकत्वमपीत्यवधेयम् ॥

Colophon ;

इति स्वसजातीयविशिष्टान्तराघटितत्वकल्पटिप्पणी सम्पूर्णा ॥

576

Sl. No. 35979 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. P. 5442/7

Beginning :

भवानन्दकल्पः —

हेत्वाभाससामान्यलक्षणे प्रमेयत्वविशिष्टव्यभिचारादौ अतिव्याप्तिवारणार्थं उपात्तविशिष्टान्तराघटितलक्षणस्य व्यभिचारघटितबाधादौ अव्याप्तिमाशंक्य × निवेशितं भवानन्दभट्टाचार्यैः ॥

End :

हेत्वाभासविभाजकरूपेण साजात्यविवक्षणे च तादृशबाधविशिष्ट-व्यभिचारत्वादेः स्वपदेन संग्राह्यत्वाच्च भट्टाचार्योक्तावप्यव्याप्तिः तदवस्थैवेति ध्येयम् ॥

Colo on ;

इति भवानन्दकल्पः समाप्तः ॥

## 577

Sl. No. 35985 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. P. 5445/1

Beginning :

लिङ्गांशस्यानतिप्रयोजकतयेति ॥ न च लिङ्गांशस्य अव्यास्याद्यवार-कत्वेन व्यर्थमित्येव वाच्यम्। अव्यास्याद्यवारकत्वेऽपि अखण्डाभावसम्पादक-तया सार्थक्यात् ॥

End :

न अनुमितिनिष्ठतादृशोभयाभाववत्त्वस्य तादृशवह्निमत्पर्वतविषयिता-प्रयुक्तत्वम् ॥

Colophon :

— — —

## 578

SI. No: 35993 क्रोडपत्रम् (सामान्यनिरुक्ति): Ms. No. P. 9516/2

Beginning :

प्रकृतसाध्यकानुमितिनिष्ठकार्यतानिरूपकसम्बन्धिनिष्ठप्रतिबध्यतानिरू-पितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वं हेतुदोषत्वमिति कल्पे पर्वतो वह्नि-मान् ह्रदश्च तथेति समूहालम्बनज्ञानमादाय पर्वतपक्षकधूमहेतुकवह्न्यनुमिति-स्थले वह्न्यभाववद्ध्रदादावतिव्याप्तिः ।

End :

तादृशविशिष्टद्वयाविषयकप्रतीतिविषयत्वावच्छेदकं यद्यत्वं तदन्य-त्वस्य विवक्षितत्वात् उक्तबाधज्ञानप्रतिबन्धकता तु न साध्याभावरूपविशिष्ट-विषयत्वातिरिक्तवृत्तिकेत्याहुः ॥

श्रीशैलवंशाब्धिसुधाकरस्य
श्रीरङ्गराजस्य सुतेन तेन ।
श्रीवासदासेन गदाधरीय-
ग्रन्थेषु वेतो + ॥

Colophon :

— — —

## 579

Sl. No. 36006 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. C. 1173

Beginning ;

श्रीमद्रघुवरचरणारुणकमलस्यन्दिचारुमकरन्दम् ।
मानसमिषे × त्रपनश्चिन्तां विधेहि बुधमहिताम् ॥
यद्यपि बहुभिः बहुधा हेत्वाभासलक्ष्मणि विशेषः ।
निर्भात एव मत्वा प्रारम्भोऽयं तमप्यसारतमम् ॥

अथ हेत्वाभाससामान्यलक्षणे—

End :

प्रतिबन्धकतावैशिष्ट्यं तत्रैव निवेश्य वह्न्यभावव्याप्यवत्कालीन-ह्रदः वह्निमान् इत्यत्र सत्प्रतिपक्षोन्नायकातिव्याप्तिवारणमपि सुकरमिति व्याचक्रः ॥

Colophon :

— — — —

## 580

Sl. N. 36007 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No· .C 1174

Beginning :

प्रणाम्य शिरसा श्रीशं वेङ्कटाचलशेखरम् ।
लक्षणे हेतुदोषाणां किञ्चिदंशो विचार्यते ॥

दोपलक्षणे ह्रदो वह्निमानित्यादो वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदे अतिव्याप्तिवारणाय विशिष्टा × घटितत्वं निवेशितम् ।

End

भावप्रतियोग्युपहितत्वसंबन्धावच्छिन्नस्वनिष्ठप्रतियोगिताकात्यन्ताभावव - स्वोभयसंबन्धेन । प्राथमिकसंवन्धे प्रकारतायां स्ववैशिष्ट्यं च स्वाव- च्छेदक × ×

Colophon : — — — —

## 581

Sl. No. 36008 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. C. 1175

Beginning :

दुग्धेन्दुकुन्दामृतमुग्धदेहं
दुग्धाब्धिकन्याकनदात्मवत्सम् ।
पूर्णेन्दुबिम्बान्तरपुण्डरीक-
स्फुरद्धयग्रीवमहं प्रपद्ये ॥

अथेत्यादिमले प्रसङ्गसङ्गत्यप्रदर्शनेन न्यूनताप्रसक्तौ तादृशन्यूनत्वं परि- हरति एतावतेति ।

End :

स्वनिरूपितविशेष्यतावच्छेदकसंबन्धावच्छिन्ना या स्वनिरूपितविशेष्य- तावच्छेदकताघटकता तन्निरूपितविशेष्यतानिरूपिता या स्वावच्छेदकसंबन्धा- वच्छिन्नस्वावच्छेदकावच्छि ×

Colophon : — — -- —

## 582

Sl. No. 36014 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. C. 1226/6

Beginning ;

सीताकटाक्षकल्लोलकल्पितोत्पलमालिकम् ।
ध्यात्वा रघूत्तमं कुर्वे युक्तिमुक्तावलीमिमाम् ॥

अति हेत्वाभाससामान्यलक्षणे वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदादौ अति- व्याप्तिः । तद्वारणाय विशिष्टद्वयाघटितत्वं भट्टाचार्यैः निवेशितम् । तस्यार्थः—

**End :**

ह्रदो वह्निमान् गगनात् इत्यत्र असाधारण्याव्याप्तः । यद्वा ह्रदो धूमवान् जलादित्यत्र मेयत्वविशिष्टधूमाभाववद्वृत्तिजलवान् धूमाभाववानिति ×

**Colophon :**

— — —

## 583

Ms. No. 36015 क्रोडपत्रम् (सामान्यनिरुक्तिः) Sl. No. P. 1226/7

**Beginning :**

श्रीमद्रघुवरचरणारुणकमलस्यन्दि चारुमकरन्दम् ।
मानसमिलन्द पीत्व तृप्तः चिन्तां विधेहि बुधमहितम् ॥

अथ हेत्वाभाससामान्यलक्षणे विशिष्टद्वयाघटितत्वनिवेश असम्भवः । वह्न्यभावत्वविशिष्टविषयकनिश्चयविशिष्ट—

**End :**

अथ व्यापकीभूताभावप्रतियोगिगगनसाध्यकघटपक्षकस्थले तादृशगगन व्याप्यगगनवान् घटः इति ज्ञानमादाय बाधेऽव्याप्तिःप्रसज्यते । तथापि गत्यन्तरविरहेण न कोऽपिदोषः इति व्याचक्रुः ॥

**Colophon :**

— — — —

## 584

Sl. No. 36019 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. C. 1176

**Beginning :**

सर्वक्षत्रियवर्गगर्वमथनप्रोद्भूतकि × सदा
विश्राणं परशुं जिगाय भगवान् यो भार्गवो लीलया ।
तं वन्दे नमतामभीष्टफलदं श्रीरामचन्द्रप्रभुं
विद्वत्स्वान्तषडङ्घ्रिसेवितपदाम्भोजं जगन्नायकम् ॥

(तामताम इति ताळे अशुद्धः पाठः)

गादाधर्यां – तत्साक्षात्कारेति ॥ अनुमितिपरामर्शयोरेकदा साक्षात्करा सम्भवात् कथमनुमितौ परामर्शसाक्षात्कारस्सम्भवतीति चेदत्र केचित् ।

End ;

ज्ञानप्रतिबन्धकतामतेऽपि उक्तापत्तिवारणाय प्रतिबन्धकतावच्छेदककोटौ निरवच्छिन्नावछेदकताया निवेशनीयत्वात्–प्रतिबन्धकतावच्छेदककोटौ ज्ञानस्य विशेषणविधया प्रतिबन्धकत्वान्न कालान्तरे प्रतिबध्यज्ञानानुपपत्तिप्रसङ्ग इत्यास्तां विस्तरः॥

Colophon :

इति प्रथमलक्षणविचारः॥

## 585

Sl. No. 36020 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. .C 1177

Beginning :

नत्वा नन्दतनूजं स्मृत्वा गुरुवर्यपादपाथोजम्।
वक्ष्ये वादिहिता[थ] हेत्वाभासस्य लक्षणविशेषम्॥

प्राथमिके नचेत्यादिपरिष्कारे प्रकृतानुमितिप्रतिबन्धकतासामान्यस्य विशिष्टान्तरविषयकत्वव्यापकत्वासम्भवात् तत्र स्वावच्छिन्नविषयकत्वव्यापकत्वनिवेशः।

End :

इत्थं च बाधव्यभिचारोभयविषयकसमूहालम्बनज्ञानस्यापि + तत्र बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वाभावादेव न तत्रातिव्याप्तिरिति सुधियो विभावयन्तु॥

Colophon :

— — —

## 586

Sl. No. 36021 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. C. 1178

Beginning :

रघुवीरपदद्वन्दचिन्तासन्तुष्टचेतसा।
श्रीकृष्णतातसुधिया क्रियते वादकल्पकः॥

अनाहार्याप्रामाण्यज्ञानानास्कन्दितनील × यप्रततित्वाविशिष्ट यद्रूपावच्छिन्ननिरूपकताकविषयिताव्यापिका प्रकृतानुमितिपतिबन्धकता तद्रूपावच्छिन्नत्वं दोषसामान्यलक्षणम्।

ननु अत्र यत्वतत्वयोरननुगमात्—

**End :**

तथापि प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षरूपसत्पतिपक्ष + पेन: विशिष्टद्वयाघटितत्वकद्धेतुविशिष्टद्वयविषयितायां सत्प्रतिपक्षविषयिताघटितविषयिताभिन्नत्वं निवेश्याव्याप्तिवारणं ग्रन्थकारेणैव कृतम् । अत्र च सत्प्रतिपक्षविषयिताघटितविपयिताभिन्नेत्यनेन प्रकृत–

**Colophon :**

— — —

## 587

**Sl. No. 36022** क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. C. 1225

**Beginning :**

स्मारं स्मारं रघूत्तंसपदपङ्करुहद्वयम् ॥
श्रीकृष्णतातसुधिया कौतुकात्किञ्चिदुच्यते ॥

यद्रूपावच्छिन्नविषयत्व व्यापिका + प्रतिबन्धकता तद्रूपवत्त्वं दोषत्वम् । नन्वत्र यद्रूपपदेन वह्न्यभावविशिष्टह्रदत्वस्य ।

**End :**

अतो विशिष्टद्वयाघटितत्वमेवादरणीयमिति ।
इत्थं विशिष्टयुग्माघटितत्वं सम्यगित्युपापादि ।
श्री कृष्णतातसुधिया रघुवरचरणैकसक्तधिया ॥

**Colophon :**

— — — —

## 588

**Sl. No. 36023** क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. C. 1227

**Beginning :**

तुरङ्गमोत्तमाङ्गश्रीविहङ्गमशताङ्गवान् ।
तरङ्गयतु मच्चेतस्यभङ्गुरसरस्वतीम् ॥
नक्षत्रमाला सर्वज्ञमौलेरपि मनोहरा ।
प्रकाशयतु लोकानां सन्मार्गमिदमादरात् ॥

मूलोक्तलक्षणत्वे बाधितादिहैतौ अव्याप्तिः ।

End:

प्रकृतानुमितिप्रतिबन्धकताव्यक्तिनिष्ठ-यद्रूपावच्छिन्नविषयकत्वव्यापकत्व-संबन्धावच्छिन्नयद्रूपनिष्ठाच्छेदकताकाधेयतामादाय लक्षणसमन्वयो बोध्यः ॥

Colophon:

इति शतभिषङ्नक्षत्रमुक्ता ॥

## 589

Sl. No. 36024 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. C. 1228

Beginning:

व्यासः फणिपतिरथ किं जैमिनिरथवाक्षचरण इति।
कथकैर्वितर्क्यमाणाश्शरणं रङ्गेन्द्रपरकालाः ॥

अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्न–विषयिताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता, तद्रूपावच्छिन्नत्वं हेत्वाभाससामान्यसक्षणमभिहितं भट्टाचार्यैः। अत्र केचित् यद्रूपावच्छिन्नविषयितायां प्रकृतानुमित्यवृत्तित्वविवक्षणेनैव सामाञ्जस्ये व्यापकत्वनिवेशनमकलं-- -

End:

वारिताश्च ते प्रायस्तत्र क्रोडकृद्भिरिति नात्र विस्तरभिया तदखिलं विलिख्यत इति निर्म-त्सरास्सुधियो विभावयन्तु ॥

कस्तूरिरङ्गविबुधो वाधूलकुलसम्भवः।
अलीलिखदिदं पत्रमनुकम्पाबलाद्गुरोः ॥

यदि च संशयत्वाभावोऽपि प्रतिबन्धकतावच्छेदके निविशते तदा स्वरूपसम्बन्धावच्छिन्नत्वं तत्र निवेश्यम् ॥

Colophon:

– – – –

## 590

Sl. No. 36027 क्रोडपत्रम् (सामान्यनिरुक्तिः) Ms. No. C. 1231

Beginning:

प्रणम्य शिरसा श्रीशं वेङ्कटाचलशेखरम्।
लक्षणे हेतुदोषाणां कश्चिदंशो विचार्यते ॥

दोषलक्षणे ह्रदो वाह्निमानित्यादौ वह्न्यभाववद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिवारणाय विशिष्टद्वयाघटितत्वं निवेशितं भट्टाचार्यैः ॥

End :

अभाववद्वृत्तित्वं च स्वनिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्म-पर्याप्तावच्छेदकविषयतात्वसंबन्धेन ॥

Colophon :

— — — —

## 591

Sl. No. 35029 — क्रोडपत्रम् (सामान्यनिरुक्तिः) — Ms. No. C- 1233

Begenning ;

यद्रूपावच्छिन्नव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपित. प्रतिबन्धकता तद्रूपावच्छिन्नत्वं हेत्वाभासत्वमित्युक्तं भट्टाचार्यैः । अत्र वायिश्रीनिवासाचार्या वदन्ति ॥

End:

× तत्रितयसम्बन्धेनोपहितत्वं विवक्ष्यते । तदापि दोषविषयकाहार्य-निश्चयसंशय × तानुमि × त्तासम्भवः इति दिक् ॥

Colophon :

हेत्वाभासनिरुक्तौ सीतारामेण रामभक्तेन ।
अनुमित्यवृत्तिबोधनसमाधिरेवं व्यधायि बुधतुष्ट्यै ॥

## 592

Sl. No. 36121 — तत्त्वचिन्तामणिः — Ms. No. P- 4310

गुणातीतोऽपि शास्त्रीगुणसचिवस्त्यक्षरमय-
स्त्रिमूर्ति × स्सर्गस्थितिविलयकर्माणि तनुते ।
कृपापारावारः परमगतिरेकस्त्रिजगतां
नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे ॥ १ ॥
आन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतम्
चिन्तादिव्यविरोचनेन च तयोस्सारं विरोक्ष्याखिलम् ॥

तन्त्रे दोषगणेन दुर्गमतरे सिद्धान्तदीक्षागुरु-
र्गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिम् ॥ २ ॥
इह खलु सकलशिष्टाः एकवाक्यतया—

End:

तथा च विशिष्टशक्तौ विशेषणशक्तिरावश्यकी । नागृही × विशेषणान्यायात् । अथ लक्षणं × न्वयो न तु तीरान्तरस्य तथा प्रवाहोपलक्षिततीरे शक्तिरस्तु न तु प्रवाहेपि चेत् गङ्गापदस्य शक्तौ प्रवा × स्य शक्यत्वेन विशेषणत्वे सम्भ—

Colophon :

इति श्रीमहोपाध्यायश्रीगङ्गेश्वरविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डः समाप्तः ॥

## 593

Sl. .No. 36132 तत्त्वचिन्तामणिः Ms. N. P. 1742

Beginning :

तत्राभिधा सङ्कल्पपूर्वभावनाज्ञानं न प्रवर्तकम् । तस्मिन् सत्य-प्रवृत्तेः । असत्यपि प्रवृत्तेश्च । × प्रवर्तकमिति । गुरवः । तथाहि–ज्ञानस्य कृतौ साध्यायां ×

End :

साधुशब्दस्मरणेऽपिकर्मत्वाद्युपस्थापककर्मविभक्त्यादेरभावाच्च × ति यथाहि पदार्थशक्तत्वेन × पदार्थोपस्थितिः तथापि विभक्त्यर्थकर्मत्वादि शक्तत्वेन ज्ञानादपभ्रंशैकदेशात् तत्तत्स्वरावच्छिन्नात् कर्मत्वाद्युपस्थितिः × वाणीयमर्थरहितापि विशृङ्खलापि सानुग्रहेणहृदयेन विलोकनीया ।

× × मणिरेष न शोभते ।
तथापि हृदये बध्वा सुदृशो यान्त्वलंकृतिम् ॥
गच्छतः स्खलने वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

Colophon :

इति श्रीमहामहोपाध्यायगङ्गेशमिश्रविरचिते तत्त्वचिन्तामणौ शब्दविवेकः तुरीयः ॥

594

Sl. I 36133 तत्त्वचिन्तामणिव्याख्या Ms. No. P. 1773/2

Begenning ;

अथ शब्दो निरूप्यते प्रयोगकृतार्थंतत्वस्तज्जन्यः प्रमाणम् । ननु शब्दो न प्रमाणम् । तथा हि × प्रमाणवत्येव । तच्च शब्दं सति प्रमा × वत्येवेति नायं प्रमाणम् । न च शब्दः न प्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघातः । अस्मात्प्रमाणत्वेप्येतदुत्पत्स्यमानविसंवादादिति चेन्न । आकाङ्क्षादिमतः पदार्थस्य —

End ;

ऐतिह्यं चाप्तोक्तोत्प्रेक्षाशब्द एवान्तर्भूतम् अर्थापत्त्यनुपलब्ध्योस्तु यथायथमन्तर्भावः प्रागेव चिन्तितः । अतः सिद्धं चत्वारि प्रमाणनीत्यत उपरम्यते ॥

ईशाः कुशाग्रमतयो भवतः प्रमाणं
मौलौ विधाय करवारिरुहे समीहे ।
वाणीयमर्थविहतापि विशृङ्खलापि
सानुग्रहेण हृदये च विलोकनीया ॥

मोहाश्रुणा हताक्षाणां मणिरेष न शोभते ।
तथापि हृदये बध्वा सुहृदो × त्वलङ्कृतिम् ॥

Colophon:

इति श्री महोपाध्यायगङ्गेशकृतो तत्वचिन्तामणौ शब्दखण्डस्समासः । समाप्तश्च ग्रन्थः ॥

595

Sl. No. 36155 तत्त्वचिन्तामणिव्याख्या Ms. No. P. 139

Beginning ;

अमुष्मिन्नेतावत्यपरिमिततत्वार्थगहने
प्रसङ्गो मे यद्यप्यह ह परिहासैकफलकः ।

तथापि श्रीगौरीपतिदृढपदाम्भोजयुगले

न भग्नो भक्तिश्चेत् कथय किमशक्यं त्रिजगति ॥

अनुमानपरिच्छेदे तत्त्वचिन्तामणेरयम् ।

पितृव्यहरिमिश्रैरादिष्टो भावः प्रकाश्यते ॥

प्रत्यक्षानन्तरमनुमानस्योद्देशात्—

End :

परमदुःखस्य हि ध्वंसाद्भोगेन चरमविशिष्टज्ञानहेतोः विशेषणज्ञान × विषयज्ञानादिसामग्रीविलम्बेन उपान्त्यदुःखध्वंसानन्तरमेव दुःखनिवृत्तिरिति । वस्तुतस्तु दुःखप्रागभावासहवृत्तित्वं दुखविशेषणम् । न चैवमतिव्या × खध्वंसो न तु प्रकृतः तस्याति × सम्भवादित्यवधेयमिति ॥

Colophon :

इति श्रीमहोपाध्यायजयदेवमिश्रविरचिततत्त्वचिन्तामण्यनुमानप्रकाशः ॥

## 596

Sl. No. 36156 तत्त्वचिन्तामण्यालोकव्याख्या Ms. No. P. 850

Beginning :

वक्त्राणि पञ्च कुचयोः प्रतिबिम्बितानि

दृष्ट्वा दशाननसमागमसम्भ्रमेण ।

भूयोऽपि शैलपरिवृत्तिभयेन गाढं

आलिङ्गितो गिरिजया गिरिशः पुनातु ॥

अधीत्य जयदेवेन हरिमिश्रात्पितृव्यतः ।

तत्त्वचिन्तामणेरित्थमालोकोऽयं प्रकाश्यते ॥

प्रसङ्गान्मङ्गलस्य समाप्तिहेतुतां साधयितुं भूमिकामारचयति-इहेति । इह जगति । खलु वाक्यालङ्कारे ।

End :

× ननु सर्वेण लक्षणेन दण्डादिः सङ्गृह्येत । तत्त्वासंहतदण्डिनोपद ण्डतया भेदाभेदानङ्गीकारे तद्व्याप्तेस्तत्राभावेव तस्यैतदधिकत्वादिति चेत् दण्डत्वमतामार्गतोऽन्यसाद्व्यावृत्तेस्तेन बोधनात् ।

End :

इति श्रीमहामहोपाध्यायजयदेवमिश्रकृतौ तत्त्वचिन्तामणिप्रभायां प्रत्यक्ष परिच्छेदः समाप्तः ॥

## 597

Sl. No. 36157 तत्त्वचिन्तामणिव्याख्या Ms. No. P. 1165

Beginning :

× × × ×

अधीत्य जयदेवेन वारिमिश्रात् पितृव्यतः ।
तत्त्वचिन्तामणेरित्थमालोकोऽयं प्रकाश्यते ॥

प्रसङ्गान्मङ्गलस्य × ति – इहेति ॥ इह लोके खलु वाक्यालङ्कारे एकवाक्यता अविप्रतिपत्तिः ॥

End :

अत एव समयाधीनप्रवृत्तिकत्वं यदेव विभक्तिसमभिव्याहरसहकारितावच्छेदकत्वेनोक्तं तदेव विभाजकोपाधित्वेन उच्यताम् । अतः न विभागव्याघात इत्यपि निरस्तम् । सति प्रमाणभेदे अनुगमकगवेषणादिति ॥

Colophon :

इति श्रीमन्महोपाध्यायसन्मिश्रजयदेवकृतः शब्दपरिच्छेदः ॥

## 598

Ms. No. 36164 तत्त्वचिन्तामणिव्याख्या Sl. No. C. 4427

Beginning :

मया गोकुलनाथेन रश्मिचक्रं वितन्वता ।
उपमानपरिच्छेदमणेरर्थः प्रकाश्यते ॥

अप्येति ध्वंसाधिकरणकालोत्पत्तिकत्वं ध्वंसाधिकरण एव वा–

End :

ननु गोसदृश इति वक्यप्रयोक्तुः साक्षत्सादृश्यविषयक तात्पर्यसत्वेऽपि परंपरयातदविषयकोपमितौ तात्पर्यन्न विरुध्यत इति भावः ।

Colophon

इति महामहोपाध्याय श्रीगोकुलनाथविरचिते रश्मिचक्रे उपमानपरिच्छेदव्याख्याचक्रं समाप्तम् ॥

## 599

Sl. No. 36165 तत्त्वचिन्तामणिव्याख्या Ms. No. P. 469

Beginning :

उपदिष्टं पितृचरणैः स्वयमपि निष्टं × कितं च।
शब्दालोकरहस्यं गोपीनाथो विवेचयति ।

स्वग्रन्थे प्रेक्षावत्प्रवृत्त्यङ्गमौ × त्यपरिहारपूर्वकेष्टदेवताकीर्तनरूपं × प्रतिबन्धविघातकमङ्गलमाचरितं शिष्यशिक्षयै निबध्नाति न जान इति।

End :

इत्यभिप्रेत्याह महाजनश्चेति । नन्वत्र तादृशार्थतामात्रे न्यायमूलकस्मृतावपि भ्रमादिना तथा सम्भवात् अथ संवादिनि तदा × तदविगीतपदवैयर्थ्य ×

Colophon :

— — —

## 600

Sl. No. 36167 तत्त्वचिन्तामणिव्याख्या Ms. No. P-205/a

Begenning ;

× तमसा × चिते पण्डितानां
वन्दे श्रीरामचन्द्रस्मृतिबलविशदाशेषतन्त्रार्थसारः।
देशे विख्यातवासो विविधगुरुकृपालेशतो लब्धबोधो
न्यायाब्धिं तर्कचूडामणिमिह कुरुते बह्व × धर्मराजः॥

End ;

अशरीरित्वसिद्धान्तविरोधं परिहरति तत्रेति। यद्यपि इदं पुत्रादि शरीरेऽतिव्याप्तं, तथा × विरोधस्मृतिबाधस्य विरोधाधिकरणसिद्धत्वेना संगत्यापत्तेरिति॥

Colophon:

इति धर्मराजाध्वरीन्द्रविरचिते तर्कचूडामणौ ईश्वरवादः समाप्तः॥

## 601

**Sl. No. 36197** तत्त्वचिन्तामणिव्याख्या **Ms. No. P. 6370**

**Beginning :**

न्यायमबुधिकृतसेतुं हेतुं श्रीराममखिलसम्पत्तेः ।
तातंस्त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा ॥
श्रीमता मधुरानाथतर्कवागीशधीमता ।
विशदीकृत्य दृश्यन्ते द्वितीयमणिफक्किका ॥

**End :**

न चैवमपि वह्निसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं प्रमेयत्वं तदवच्छिन्नसमानाधिकरणो वह्निरित्यतिव्याप्तिरिति वाच्यं व्यभिचारिणोऽपि वह्न्यादेः

**Colophon :**

— — — —

## 602

**Sl. No. 36209** तत्त्वचिन्तामणिव्याख्या **Ms. No. C. 4076**

**Beginning :**

न्यायाम्बुधिकृत सेतुं हेतुं श्रीराममखिलसम्पत्तेः ।
तातं त्रिभुवनगीतं तर्कालंकारमादरान्नत्वा ॥
श्रीमता मधुरानाथतर्कवागीशधीमता ।
विशदीकृत्य दृश्यन्ते तुरीयमणिपक्किकाः ॥
प्रत्यक्षादिप्रमाणत्रयं निरूपितमिदानीं परमप्रमाणं शब्दो निरूपणीयः ।

**End :**

यदि तर्हि योपि क्वचिद्धेतुर्भवति नचैवं अत्रापि तर्हि × यस्य सम्भवादित्यत आह–क्वचिदिति । तहिश्चयोपीतिरुक्तप्रतियोगितावच्छेदकत्वशून्यत्वरूपयोग्यतानिश्चयोपि यथेति यथा यद्भावेति + नातीतिश्च यस्तदेत्यर्थः ।

**Colophon :**

इति श्री मणिमधुरानाथीये शब्दखण्डव्याख्याने योग्यताग्रन्थरहस्यम् ॥

603

Sl. No: 36218 तत्त्वचिन्तामणिव्याख्या Ms. No. P. 4901

Beginning :

अवसरसङ्गत्या वा कार्यत्वसङ्गत्या वा आसत्तिनिरूपणमभिप्रेत्यासत्ति-लक्षणमुक्तं मणौ—आसत्तिश्चेति ॥ तदनुपपन्नं- -घटेन शुद्धं जलमाह-रेत्यादौ अव्याप्त्यापत्तेरित्यत आह—अव्यवधानमिति ॥

End :

तस्मात्सम्यग्ग्रहस्याश्रमपरिपालनस्य तत्फलं सम्यक्त्वं तु सामर्थ्यमेव । अतो न श्राद्धादेर्ब्रह्मलोकावाप्तिरिति + क्वचिच्चार्थवादिकमिति ॥

Colophon :

अपूर्ववादस्समाप्तः ॥

Extra information :

५६ तमे पत्रे —

इति श्रीयल्लयार्यविरचिते न्यायपारिजाते वर्णनित्यत्ववादः ॥

604

Sl. No. 36251 तत्त्वचिन्तामणिव्याख्या Ms. No. P. 2067/1

Beginning :

कालिन्दी कठिना सरित्तरिरियं जीर्णा भ × क्रमो
नोन्धानां सुतरीतुमस्मि वनिता यास्यामि पारं कुतः ।
इत्युक्त्वा विमुखीमिव स्मितमुखीं धृत्वाञ्चले चञ्चले
नावं प्रापयते शनैर्विहसते कृष्णाय तुभ्यं नमः ॥
निर्गलितमणिमध्यादालोकादौ च विस्तीर्णम् ।
निष्कृष्य युक्तिसारं गोपीनाथ × स्तनुते ॥

End :

× इदन्ताविषयकानुभवजन्यन्वं × रप्रयोज्यत्वमेव तच्छब्द-प्रयोगे नियामकम् । अत एव च प्रत्यभिज्ञाने तत्ता भासते । इदन्ताचानुभवे कालो धर्मान्तरं वेति संक्षेपः ॥

Colophon :

इति रामानुजदीक्षितविरचितमणिदर्पणे प्रत्यक्षपरिच्छेदः ॥ (?)

## 605

**Sl. No. 36397** **तत्त्वचिन्तामणिदीधितिव्याख्या** **Ms. No. A. 201**

**Beginning :**

प्रणम्य गीर्वाणगणैकवन्द्यं
पादारविन्दं पुरुषोत्तमस्य ।
निगूढमाविष्कुरुते प्रयत्ना-
द्गदाधरः पक्षधरस्य भावम् ॥

सङ्गत्यप्रदर्शने मूलस्य न्यूनता स्यादित्यथशब्दो निरूप्यत इति प्रतिज्ञा-
वाक्यादेव सङ्गतिरपि लभ्यत इत्याह—अथेतीति ।

**End :**

कर्तृगतफलजनकत्वव्यभिचारेणोक्तनियमखण्डनसम्भवादत्र भ्रम इत्यादिना
जातेष्ट्यादेस्तत्फलवत्त्वखण्डनमयुक्तमित्याशङ्कां निराकुरुते—नन्वित्यादिना ।

**Colophon :**

इति श्रीगदाधरभट्टाचार्यविरचितायां शब्दमण्यालोकटिप्पण्यां अपूर्ववादसमासः ॥

## 606

**Sl. No. 36401** **तत्त्वचिन्तामणिदीधितिव्याख्या** Ms. No. C. 1761

**Beginning :**

श्रये श्रीमद्देवासुरमकुटमाणिक्यनिकर-
स्रजा राजद्दन्तावलवदनपादाम्बुजयुगम् ।
अशेषप्रत्यूहप्रकरणमनैकान्तनिपुणं
सदा भक्ताभीष्टप्रसरनवकल्पद्रुमदलम् ॥ १ ॥
× प्रतिजानीते ॥ अथ शब्दो निरूप्यत इति ॥

**End :**

अवच्छेदकावच्छिन्नविषयकसमहालम्बनपदस्मृत्यनुपयोगित्वेऽपि पदघटा-
कोत्तरोत्तरवर्णानां श्रौतलौकिक × तदगीचरसुप्र × क्षे
पूर्वपूर्वानुभवोपनतानां पूर्वपूर्ववर्णानां ध्वंसाव × ॥

**Colophon :**

— — —

## 607

Sl. No. 36408 तत्त्वचिन्तामणिदीधितिव्याख्या Ms. No. C. 3482

Beginning :

सस्मिताननसरोजमंगणे
संचरच्चलितचूर्णकुन्तलम् ।
रोचनोल्लसितमालमस्तु मे
कैशवं मनसिशैशवं वपुः ॥
श्री सार्वभौमस्य गुरोः पदाब्ज-
विद्यार्थिनां कल्पतरोः प्रणम्य ।
मणेर्मयूखोऽयमिति प्रयत्ना-
द्विनिर्मितो विज्ञमुदं तनोतु ॥
प्राच्यैरनुचितविविधक्षोधैः कलुषीकृतोऽप्यधुना ।
मणिरयमनुयमसरणिः श्रीजागदीशप्रकाशितं स्फुरतु ॥

End :

समर्थ कारणत्वमिति थावत् तदतिरिक्तं येनेति व्युत्पत्या तदवच्छेदकीभूतो योऽतीन्द्रियधर्मतत्त्सामवायित्वं साध्यमित्यपि वदन्ति विपक्षे बाधकेति । विपक्षे अव्यभिचारसंशयनिवर्तक ×

Colophon :

— — —

## 608

Sl. N. 36411 क्रोडपत्रम् ()प२५६९०२१वभाष्टवि Ms. No· .C 476

Beginning :

सस्मिताननसरोजमङ्गणै-
रिङ्गमाणमतिलोलकुन्तलम् ।
रोचनोल्लसितफालमस्तु मे
कैशवं मनसि शैशवं वपुः ॥
प्राच्यैरनुचितविविधक्षोदैः कलुषीकृतोऽप्यधुना ।
दीधितियुतमणिरेषः श्रीजगदीशप्रकाशितः स्फुरतु ॥

End :

सम्भावनामात्रस्यैवाप्रामात्वादिति भावः। इदं प्रामाण्यदूषणादिकं व्याप्तिनिश्चये सति व्याप्तिनिश्चयत्वं प्रमाणताप्रयोजकरूपं तच्छून्यत्वं पक्षे नास्तीति स्वरूपासिध्या अनुमानाप्रामाण्यं न साधयितुं शक्यत इति भावः ॥

Colophon :

इति श्री महोपाध्याय जगदीशतर्कालङ्कारभट्टाचार्यविरचिता अनुमान-दीधितिटिप्पण्यां अनुमितिग्रन्थटिप्पणी प्रकाशिका समाप्ता ॥

## 609

Sl. No. 36422 तत्त्वचिन्तामणिव्याख्या Ms. No. P. 4816

Beginning :

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।
येषां हृदिस्थो भगवान्मङ्गलायतनं हरिः॥ ×
मन्दा ये मणितत्प्रकाशगहनी ×
व्याख्यानं तदनुग्रहाय तनुते श्रीजातवेदोऽध्वरिः॥
नमस्कृत्यगणाधीशं गुरौ + दक्षिणामुखौ।
आद्यखण्डप्रकाशस्य विवृत्तिं करवाण्यहम्॥
अथ यदि प्रमाणतत्त्वं विवेचनीयं ×

End :

अधिकरणभूतलादावुपलब्धिप्रागभावावस्थानानुपलब्धेः प्रतिबन्धक-संसर्गाभावमात्रस्य हेतुतया उपलम्भप्रागभावस्य निवेशयितुमशक्यत्वाच्च योग्या-नुपलब्धिमात्रस्य निमीलिताक्षन्भवेद्यमि ×

Colophon :

— — —

## 610

Ms. No. 36 423 तत्त्वचिन्तामणिव्याख्या Sl. No. P. 4015

Beginning :

करणवृत्तिहेतुत्वमुद्देश्यतावच्छेदकमिति फलितम्। गुणादेस्संयोगा-भावनिष्ठाव्याप्यव्याप्यवृत्तिजानिरूपकत्वाभावाद्गुणत्वादेर्न तादृशोद्देश्यताव-च्छेदक × च्छिन्नत्वं द्रव्यत्वस्य च तादृशोद्देश्यतावच्छेदकविशिष्टता न दोषलेश इत्यनुसन्धेयम्।

End :

समनियतप्रतियोगिताकस्य वृत्तिमद्वृत्तेः अधिकरणधर्मावच्छिन्ना-भावस्यैव सं × वादतिव्याप्तिः भूतत्वपूर्त × भयाभाववान्। नमाताव्यतरता × त्यत्र निष्ठसाध्यताव ×

Colophon :

— — -- ।

## 611

Sl. No. 36425 तत्त्वचिन्तामणिदीधितिव्याख्या Ms. No.C. 23

Beginniug :

गिरमित्यादि–अत्र क्त्वाप्रत्ययद्वयेन ताद्दशनिधानानन्तर्यलाभात् स्वीय-दीधितिनिर्माणकाले तदसत्त्वस्य सूचनेन सिद्धान्तानुरोधेन गुरुवचनमनुकृष्य इदं निमितमिति स्वीयग्रन्थस्य प्रकर्षातिशयः सूचितः –

End :

उक्तप्रायमिति। पूर्वं पञ्चम्यर्थान्वितो न प्रतिज्ञार्थः। किन्तु तदेकदेशार्थे इत्येवोक्तम्। न हेत्वर्थान्वितौ न प्रतीकार्थ इत्युक्तम्। अतः प्रायमिति।

Colophon :

इति श्री भवानन्दतर्कचूडामणिरचिता अवयवदीधितिव्याख्या समाप्ता॥

## 612

IS No. 36436 तत्त्वचिन्तामणिदीधितिव्याख्या Ms· No. P. 3086/2

Beginning ;

यदालम्बनतो मूढाः पण्डितानां धुरन्धराः।
तमहं जनकं वन्दे गुरुमण्णाख्यभूमणिम्॥
गदाधरीप्रकाशोऽयं क्रियते भावसङ्ग्रहः।
अश्वत्थविदुषा तोषात् छात्राणां सूरिणां कृते॥

सति व्याप्तिनिश्चय इत्यत्र असतो व्याप्तिनिश्चयस्याभावत् सतीति विशेषणं व्यर्थमित्यत आह—व्याप्तिनिश्चये सतीत्यन्वय इति॥

End :

विस्तरस्त्वस × रणमिति वह्निमान् धूमादित्यादौ अवयवाव-छिन्नधिकरणता स्वं तदनुयोगो धूमः तस्य हेतुतावच्छेदकसम्ब ×

× न्यत्वञ्च रूपादिनिष्ठाभिकरणतायामिति तद्वदन्यत्वस्य धूमे सत्वात् लक्षणसमन्वयः ॥ तत्र यद्यप्यवयवावच्छिन्न × क ×

Colophon :

— — —

## 613

Sl. No. 36450 तत्त्वचिन्तामणिव्याख्या Ms. No. C. 4320

Beginning :

मूले नन्विति ॥ उक्तलक्षणलक्षिता पर्वतो वह्निमान् इत्याकारा तद्धेतुः तत्कारणीभूतं यत् व्याप्तिज्ञानं धूमो वह्निव्याप्य इत्याकारकं ज्ञानं तद्विषया व्याप्तिः--

End :

आत्मसमवेतत्वं आत्मसमवायः। आत्मनि द्रव्यत्वेन कालवृत्तित्वमिति प्रतीत्या तत्रावच्छेदकत्वम् ॥ इति अनुमानमञ्जूषायां पञ्चलक्षणी सम्पूर्णा ॥

Colophon :

इति श्रीमज्जगदीशतर्कालङ्कारविरचितानुमानदीधितिव्याख्या कृष्णभट्टीसहिता सिंहव्याघ्रलक्षणसहितपञ्चलक्षणीपर्यन्ता ॥

## 614

Sl. No. 36451 तत्त्वचिन्तमणिव्याख्या Ms. No. C. 5432/4

Beginning :

अनुमानं न प्रमाणं प्रमितिकरणतावच्छेदकधर्मशून्यत्वादिति चार्वाकाः। अनुमानं प्रमाणं प्रमितिकरणतावच्छेदधर्मवत्वादिति नैय्यायिकाः। × समारब्धेतीति। समित्युपस × र्थः साफल्यम्। तस्य × × वैकर × र्थाद्यक्रुतावन्वयः।

End :

दुर्ज्ञेयत्वेपीति पृ × त्यादिति भावः। समशीलतेति ॥ केवलान्वयिसाध्यकस्थलेऽव्याप्ति × मान्यथा अनुमितिः तथा गुरु × र्मावच्छिन्न साध्यकस्थलेऽपीतिभावः।

Colophon :

इति श्रीजगन्नाथचक्रवर्तिविरचिता पञ्चलक्षणटिप्पणी समाप्ता ॥

## 615

SI: No: 36455 तत्त्वचिन्तामणिदीधितिव्याख्या Ms. No. P. 1389

Beginning :

करुणासारकटाक्षां कल्पितकादम्बवासरुचिम् ।
कांचन काञ्चनगौरींकान्तिं कामं नमस्यामः ॥
सम्प्रदायानुसारेण विद्वद्धृदयरञ्जिनी ।
क्रियते वज्रटङ्कार्यैः भवानन्दप्रकाशिका ॥ २ ॥

End :

अयोगोळकीयवह्नाविति तातशनिरूपकत्वसम्बन्धावच्छिन्नावच्छेदकत्व पर्याप्त्यधिकरणीययावन्तः स्वाश्रयां एक व्यक्तिनिष्ठतावत्कत्वाकावप्यव्बाप्तिं लम्भयितुम्। ननु साध्यतावच्छेदकव्यापकत्वमभावस्य विवक्षितं महानसवृत्तित्वा भावस्तु न तथा । किन्तु ह्व—

Colophon :

[इति श्रीद्रविडकुलावतंसवीरवल्लीकुलजलधिकौस्तुभ श्री विबुध वज्रटङ्क विरचिते भवानन्दीयव्याख्याने अनुमानप्रामाण्यवादः समाप्तः ।]

## 616

SI. No: 36456 तत्त्वचिन्तामणिदीधितिव्याख्या Ms. No. P. 4801

Beginning :

यत्र वाचस्पतिर्वक्ति न वेति विचिकित्सते ।
विषये दुर्ग्रहे तत्र कथा कान्यस्य दुर्मतेः ॥
मा × तनयद्वारे सामान्याभावसिन्धुरम् ।
व्यत्त्ययभावत्र × ण्या व्रजेदा × ॥

× मान्याभाव अति रिक्त इतिनव्याः । विशेषाभावकूट एवेति प्राञ्चः ।

(अनुगानखण्डारम्भे)— ॥ श्रीगोविन्देति ॥

अत्र पदाम्भोजेत्यत्र परिणामः । × एतेन दीधितौ निगूढ

विद्गमपातनो विरोधपरिणामात्योमिति पदमित्यादिवचनजातेः—

End :

वाच्यत्वादिपदात् तद्गुणासंविज्ञानबहुव्रीहिणा व्यतिरेकिहेतुपरिग्रहः ।
केवलान्वयिहेतुके तु सर्वेषामेव हेतुमतां ×

Colophon :

११४ तमे पत्रे —
इत्यनुमितिलक्षणटीका समाप्ता ॥

## 617

Sl. No. 36457 तत्त्वचिन्तामणिव्याख्या Ms. No. C. 296

Beginning :

प्रद्योतनस्तिमिरवारणवारणाय
सञ्चारयन्निजकराग्रलसन्नखानि ।
उन्निद्रयन्नखिललोकविलोचनानि
भूयात्तमोनिरसनाय च नः शिवाय ॥
विद्वद्वृन्दधुरीणस्य पितुः पादावनुसरन् ।
भवानन्दवचोव्याख्यां ब्रूते दिनकरः सुधीः ॥

End :

पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहित्वमिति । तत्वं च पक्षसाध्य सम्बन्धाशेषपक्षताधच्छेदकावच्छिन्नानवगाहित्वे सति पक्षसाध्यसम्बन्धावगाहित्वं पर्वतत्वावच्छेदे वह्न्यनुमितिसाधारणमिति । तथा चोक्तपरामर्शजन्यताव—

Colophon :

— — — —

## 618

Sl. No. 36459 तत्त्वचिन्तामणिदीधितिव्याख्या Ms. No. C. 2150

Beginning :

प्रद्योतनस्तिमिरवारणवारणाय
सञ्चारयन्निजकराग्रलसन्मलानि । (?)
उन्निद्रयन्नखिललोकविलोचनानि
मोनिरसनाय च नः शिवाय ॥

विद्वद्वृन्दधुरीणस्य पितुः पादावनुस्मरन् ।

भवानन्दवचोव्याख्यां ब्रूते दिनकरसुधीः ॥

End :

मणौ योग्योपाधीनामित्यादि । इदं व्याप्तिनिश्चयवस्तु । गतिमनुरुध्य तत्सत्वेऽपि तज्जन्यानुमितिवह्न्याद्यनुगताकारविषयत्वेन । तत्सत्वे प्रमात्व सम्भवादिति व्याप्तिनिश्चयाभाव ×

Colophon :

— — —

## 619

SI. No. 36461 तत्त्वचिन्तमणिव्याख्या Ms. No. P. 159

Beginning :

त्रिपुरारातिपादाब्जनखचन्द्रसमुद्भताः ।

कान्तयः शुभदाः सन्तु ममाज्ञानतमोभिदः ॥

भवानन्कृता व्याख्यानुमानमणिदीधितेः ॥

व्याख्यायते निगूढार्था महादेवेन तत्त्वतः ॥

भवानन्दीप्रकाशस्तु विस्तृतो रचितो मया ।

अतः संक्षेपतः कुर्वे व्याख्या सर्वोपकारिणीम् ॥

प्रारिप्सितस्य + प्रतिजानीते नमस्कृत्येति ॥

End :

प्रागभावानभ्युगमे तदभावादेव अन्यत्र तदनुत्पादात् । तदनभ्युपगमे तत्पुरुषीयज्ञानत्वावच्छिन्नं प्रति तादात्म्य × एवं च भेदग्रह प्रतिबन्धकत्वसिद्धौ तदभावरूपापादकबलात् ×

Colophon :

— — —

## 620

SI. No. 36463 तत्त्वचिन्तामणिव्याख्या Ms. No. P. 3095

Beginning :

सहचारेऽतिदुर्बोधे भवानन्दीप्रकाशने ।

करोतु मम सामर्थ्यं शिवासहचरश्शिवः ॥

व्याप्तिग्रहोपाये कथनीय इति पूर्वं व्याप्तिग्रहोपायश्च वक्ष्यत इत्यनेन समारब्धानुमानप्र × होपायानिरूपणे प्रतिज्ञाते तत्कारणीय × तव्याप्तिस्वरूपजिज्ञासया + दुर्वारत्वादिति भावः ।

**End :**

आक्षेपतात्पर्यमाह सर्वस्येति । ताद्दशेति । घटत्वप्रकारकेत्यर्थः । ताद्दशेति घटत्वांशेऽन्याप्रकारकेत्यर्थः । × । घटज्ञानेति । घटत्वप्रकारकज्ञानेत्यर्थः । सामान्यलक्षणव्याख्याकृ × सामान्यलक्षणा ॥

**Colophon :**

इति श्रीमत्पुणतामकरोपनामकमहादेवपण्डितविरचितेऽनुमानमणिदीधिति व्याख्या भवानन्दिप्रकाशाभिधे (?) सामान्यलक्षणाप्रकाशः ॥

## 621

Sl. No. 36465 तत्त्वचिन्तामणिव्याख्या Ms. No. C. 24

**Beginning ;**

नत्वा पदाम्भोजयुगं शिवस्य
स्मृत्वा गुरूक्ताखिलयुक्तिजालम् ।
कृत्वातिग्रेटार्थविभावनां च ×
व्याख्यायते व्याप्तिरहस्यमत्र ॥

ननु अनुमानप्रामाण्यव्यवस्थानिर्वाहक— ॥

**End :**

व्याख्यायां । भट्टाचार्यः भट्टाचार्यशिरोमणिः । इतीति, अत्रशब्दो ग्रन्थसमाप्तौ ॥

भवानन्दवचोव्याख्या महादेवेन निर्मिता ।
सर्वोपकारिणी नाम्ना सम्पूर्णा सदनुग्रहात् ॥
लौकिक्यां लौकिकं यव्यामलौकिकयामलौकिकम् ।
उत्पाद्यायन्यभजन्महादेव कृतार्थताम् ॥ २० ॥ (?)

**Colophon :**

इति श्री काशीवासिमहारामान्वयसम्भूतपुण्यस्तंभकारोपनामकश्रीमन्मुकुन्द पण्डितात्मजमहादेवपण्डितविरचिता अनुमानदीधितिभवानन्दीव्याख्या सर्वोप कारिणी सम्पूर्णा ॥

## 622

Sl. No. 36467 तत्त्वचिन्तामणिदीधितिव्याख्या Ms. N. P. 1325

Beginning :

नमस्कृत्य गुरून् सर्वान् निगूढं मणिदीधितौ ।
श्रीभावनन्दसिद्धान्तवागीशेन प्रकाश्यते

ओं नवइति । परामात्मने सर्वोत्क × उत्कर्षश्च जगत्सृष्टिस्थिति प्रलयकर्तृत्वम्

End :

धर्मानवच्छिन्नवृत्तित्ववृत्तिप्रतियोगिताकोऽभावो बोध्यः वह्निमान् धूमादित्यादौ × तादृशवह्नित्ववृत्तिधर्मेणानवच्छिन्नप्रतियोगिताकस्य धूमत्वाद्य भावस्य धूमादावभावात् ×

न हि क्रियां विना तत्र क्षणादिघटितस्यवर्षस्य सम्भव इति । नित्य. सुख भिव्यक्तिर्मुक्तिरिति म ×

Colophon :

— — —

## 623

Sl. No. 36468 तत्त्वचिन्तामणिदीधितिव्याख्या Ms. No. P. 1552

Beginning ;

शियोरशा × कत्वात्तनो + शिवसन्ततिम् ।
निदर्शयतुमद्वैतं जगतामिव संवृतम् ॥
इह तावदभीष्टकर्मणो निर्विघ्नसमाप्तिमुद्दिश्य बहुशः प्रवर्तमान विनायकार्चनदधिपूर्वादौ मङ्गले दृश्यन्ते प्रेक्षावतः । न च मङ्गलस्य

**End :**

मनसि रूपविरहप्रयुक्तो न रूपानुपलम्भ इति नासौवतत्र योग्यः । अन्ये तु योग्यप्रतियोगिकत्वमेव तन्त्रं सर्वत्र इत्याहुः इति सर्वसुन्दरमिति सङ्क्षेपः ॥

**Colophon :**

इति श्रीमहामहोपाध्यायश्रींशशधरकृतं न्यायरत्नप्रकरणं शशधराख्यं सम्पूर्णं समाप्तम् ॥

## 719

**Sl. No: 36808** न्यायसिद्धान्तदीपिव्याख्या **Ms. No. P. 2825**

**Beginning :**

श्रीकालहस्तिमखिराण्नलगन्तुवंश्यो
यज्ञाम्बिका च जनको जननी च यस्य ।
स प्राक्तनेन सुकृतेन गुरोः कटाक्षात्
जातो ह्यखण्डयतिराडिह रङ्गनाथः ॥
स ब्रह्मनिष्ठहृदयः सततं विमुक्त
शास्त्रोऽपि शिष्यनिवहैः बहुधाऽर्थित सन् ।
हेरम्बवाग्गुरुप्रमुखान् नमन् सत्
प्रीतिप्रदां शशधरस्य तनोति टीकाम् ॥

**End :**

न च तत् संभवति । एकप्रतियोगिकध्वंसात्यन्ताभावयोः एकत्र विरोधादिति चेन्न । संसारदशायां तयोः विरोधेऽपि मुक्तिदशायां विरोधाभावात् इत्यभिप्रेत्योक्तं इति संक्षेपः ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशसरस्वतीपूज्यपादशिष्य श्रीमदखण्डानन्दसरस्वतीविरचितायां शशधरचन्द्रिकायां मोक्षवादः ॥

## 720

**Sl. No. 36805** न्यायसिद्धान्तदीपिव्याख्या **Ms. No.C. 8517**

**Beginning :**

कल्याणाचलकोदण्डं कमाकान्तसायकम् ।
कल्लोलमलितूणीकरलये पुरशासनम् ॥

स्वपक्षरक्षापरिपन्थिकक्ष्या-
शिक्षापगल्भोक्तिभरोभिषग्राट् ।
व्याख्यां विशेषे सितपक्षिलाक्ष-
पादप्रबन्धः कुरुते प्रभाख्याम् ॥

व्याख्यां शशधरस्य तु × ध्वंसितेति ।

End :

अन्यन्ताभावमुक्तिव्यवहारात् तद्विशिष्ट एवापवर्गः इत्यर्थः । साध्यत्वादि-त्युपलक्षणम् । आकाशादावपि बोध्यम् । प्राञ्च इत्यस्वरसोद्भावनम् । तद्बीजं तु × सिद्धेति ॥

Colopoah :

इति मुक्तिवादः ॥

**721**

Sl. No. 36812 न्यायसिद्धान्तदीपव्याख्या Ms. No. P. 5450/12

Beginning :

कल्याणाचलकोदण्डं कमलाकान्तसायकम् ।
कल्लोलमालामञ्जीरं कलये पुरशासनम् ॥

संकेतं प्राप्य राधा + श्रेयसे भूयसेऽस्तु ॥
अवलम्बे कृपालम्बां + कुन्देन्दुसन्निभाम् ॥

अपश्चिमादुदयने भिषग्राजाद्विपश्चितः ।
प्रभा विद्वच्चकोराख्या व्याख्या शशधरस्य तु ॥

+ प्रारिप्सितग्रन्थस्य + प्रतिजानीते + ध्वंसितेति ॥

End :

प्राञ्च इत्यस्वरसोद्भावनम् । तद्बीजं तु अत्यन्तविमुक्तिशब्दस्य अत्यन्ता-भावेऽप्यप्रसिद्धेरिति ॥

Colophon :

बादरायणवंश्येन भिषग्राजविपश्चिता ।
वादो हि मोक्षाख्यं सम्यङ्नो निरूपितः ॥

## 722

Sl. No. 36814 न्यायसिद्धान्तमञ्जरीव्याख्या Ms. No. P. 768/1

Beginning ;

प्रणम्य परमात्मानं जानकीनाथशर्मणा ।

क्रियते युक्तिमुक्ताभिः न्यायसिद्धान्तमञ्जरी ॥

इह खलु निखिललोकविमोक्षमुख्योपायं मननोपायमात्मनस्तत्त्वज्ञानमामनन्ति ॥

End :

अन्यत्र ज्ञानस्य सन्निकर्षस्य सत्वात् ज्ञानस्य सन्निकर्षत्वे किं मानसिति चेत् जतत्वप्रकारकं प्रत्यक्षमित्यवैहि । तत्रैव किंमानमिति चेत् तत्प्रकारिका प्रवृत्तिरिति संक्षेपः ॥

Colophon :

इति भट्टाचार्यचूडामणिकृता न्यायसिद्धान्तमञ्जरी समाप्ता ॥

## 723

Sl. No. 36822 न्यायसिद्धान्तमञ्जरीव्याख्या Ms. No. B. 7659

Beginning :

× वा सत्वात् । न च समवायिकारणं विना भावकार्योत्तिस्सम्भवति । तत्र स्वरूपसम्बन्ध एव प्रतीतेविर्षय इति चेदन्यत्रापि स एवास्तु कृतमधिके × कर्म विभक्तेरपि तद्वदेवोपपत्तेरिति संक्षेपः ।

End :

अथ रजतत्वेन्द्रियसंनिकर्ष × तत्प्रकारकं प्रत्यक्षमिति चेत् संनिहितं यत्र रजत तत्र संयुक्तसमवायस्य अन्यत्र ज्ञानस्य संनिकर्षस्य सत्वात् । किं मानमिति चेत् रजतत्वप्रकारका × मित्यवैहि । तत्रैव किं मान मित्यत्र तत्प्रकारका प्रवृत्तिरिति संक्षेपः ।

Colophon :

इति श्री जानकीनाथचूडामणिभट्टाचार्यविरचितायां न्यायसि × जर्यां शब्दपरिच्छेदः समाप्तः ॥

**724**

Sl. No. 36828 **न्यायसिद्धान्तमञ्जरीव्याख्या** Ms. No. P. 3340

Beginning :

शैवालवन्यारुचिरे तटिन्या-

स्तीरे भवान्यादरलेशशून्या ।

इन्द्रादिमान्या भुव × नन्या

मां पातु धन्या गिरिराजकन्या ॥

प्रणम्य शिवयोः पादौ श्रीमता कृष्णशर्मणा ।

सिद्धान्तमञ्जरीव्याख्या क्रियते भावदीपिका ॥

प्रारिप्सितप्रबन्ध × प्रणम्येत्यादि ॥

End:

रजतविशेष्यकरजतत्वप्रकारकप्रत्यक्ष एव तत्प्रकारिकारकप्रत्यक्ष एव तत्प्रकारिका प्रवृत्तिरिति अरजतविशेष्यकरजतत्वप्रकारिका प्रवृत्तिरित्यर्थः ॥

Colophon :

इति श्रीगोविन्दन्यायालङ्कारसुत कृष्णभट्टाचार्यविरचितायां सिद्धान्तमञ्जरी टीकायां शब्दव्याख्या समाप्ता ॥

**725**

Sl. No. 36830 **न्यायसिद्धान्तमञ्जरीव्याख्या** Ms. No. p. 9183

Beginning :

× अभ्यासदशापन्नत्वं च गृहीतप्रामाण्यकज्ञानान्तरतुल्यत्वम् । अत्र प्रवृत्तिं प्रति प्रामाण्यावधारणस्य हेतुरा × भ्रमनिरासायाह कश्चित्त्विति ॥

End :

संयोगाश्रयतयापि दिक्सिद्धिरूहनीया । अत्र वदन्ति । दिक्कालौ नेश्वरादतिरिक्तौ तथा आकाशमपि शब्दादिहेतुताया ईश्वरस्यैव सम्भवेनातिरिक्त × ॥

Colophon :

१५१ तमे पत्रे—

इति श्री भट्ट चार्यविरचितायां प्रकाशिकायां प्रमाणपरिच्छेदः समाप्तः ॥

## 726

Sl. No.3683 न्यायसिद्धान्तमञ्जरीव्याख्या :Ms. No. A. 1677/2

Beginning :

निराकरणाय प्रमाया: करणमित्युक्तिः । असाधारणधर्मो लक्षणम् । यथा सास्नाशृङ्गवती गोरिति सास्नावत्वमात्रं सरटे शृङ्गवत्वमात्रं महिष्यादा वतिव्याप्तमिति —

End :

शब्दोपमितिस्थले शब्दान्यत्वोपमित्यन्यत्वनिवेशे × ति तेषां × सान्तर्भाव इति × चत्वारिप्रमाणानीति दिक् ।

Colophon :

इति श्री नीलकण्ठदीक्षितविरचितायां सिद्धातमञ्जर्यामुपमानपरिच्छेद: ॥

## 727

Sl No. 36832 न्यायसीद्धान्तमञ्जरीव्याख्या Ms. No. P. 4366

Beginning :

सन्ध्यायाः प्रणतिक्षणे गिरिजया सेर्ष्यं समालोकिते
रोषं मानिनि मा कृथाः त्वदपरा नान्यास्ति वन्द्या मम ।
किन्तु त्वामहमानमामि मनसि ध्यात्वा तवैवाकृती:
इत्थं हर्षितशैलराजतनयादृष्टः शिवः पातु वः ॥
× ग्रन्थादौ निबन्धाति प्रणम्येति ॥

End :

नानातर्कविचारणैकमतिना यत्किञ्चिदुक्तं मया
× त्तान्यनुदय: सोर्थ × हका: ।
तच्चेतद्यदि धारयेत्तदपि जनः सञ्जायते सोऽचिरात्
वादीन्द्रः परवादिदूषणशतध्यानैभरक्ष × ॥

Colophon :

इति श्री दीक्षितश्रीरामविरचितायां न्यायसिद्धान्तमञ्जरीदीपिकायां तर्कप्रकाशाभिधायां प्रत्यक्षखण्ड: समाप्तिमगमत् ॥

## 728

Sl. No. 36833 न्यायसिद्धातमञ्जरीव्याख्या Ms. No. 1772/3

Beginning :

लक्ष्मीकान्तं वासुदेवं प्रणम्य
गौलक्षीणामन्वये सम्प्रसूतः ।
सोऽहं कुर्वे भास्करस्तर्कतन्त्रे
सिद्धान्तानां मञ्जरीं सुप्रकाशम् ॥

चिकीर्षितग्रन्थसमाप्तिप्रतिबन्धकदुरितनिवृत्यर्थं कृतं भगवन्नमस्काररूपं मङ्गलं शिष्यशिक्षार्थं आदौ निबध्नन् अध्येतृपरम्परया स्वकीर्त्यनुवृत्तये स्वनाम ग्रन्थनाम च निबध्नाति ।

End :

इति श्रीमहोपाध्यायगिलाक्षिभास्करविरचिते न्यायसिद्धान्तमञ्जरीप्रकाशे अनुमानपरिच्छेदः । × गतादिवारणासम्भव इति बोध्यम् । न चेदमिति । साध्यवदन्यावृत्तित्वमित्यर्थः । नेदयनुमानमिति न ×

Colophon :

— — —

## 729

Sl. No. 36834 न्यायसिद्धातमञ्जरीव्याख्या Ms. No. C. 487

Beginning :

लक्ष्मीकान्तं वासुदेवं प्रणम्य
× क्षीणामुनये संप्रसूतः ।
सोऽहं कुर्वे भास्करस्तर्कतन्त्रे
सिद्धान्तानां मञ्जरीं सुप्रकाशम् ॥

चिकीर्षितग्रन्थसमाप्तिप्रतिबन्धकदुरितनिवृत्य कृतं भगवन्नमस्काररूपं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नन् अध्येतृपरम्परया स्वकीर्त्यनुवृत्तये स्वनाम ग्रन्थनाम च निबध्नाति । प्रणम्येत्यादिना—

End :

तथाचायं धूमो न महानसीय वह्निमान्वेति बाधाभावदशायां तद्व्याप्तिप्रतिविशिष्टत्वेन × परामर्शदेवपर्वते वह्न्यानुविः. × प्रमात्मकेति बाधः ।

Colophon :

इति न्यायसिद्धान्तमञ्जरीप्रकाशे लौगाक्षिकुलोत्पन्नभास्करविरचिते प्रत्यक्षपरिच्छेदः ॥

**730**

Sl. No. 36835 न्यायसिद्धान्तमञ्जरीव्याख्या Ms. No. P. 10474

Beginning :

× यथोक्तव्याख्याने वक्ष्यमाणविकल्पानवकाशत् । कार्त्स्न्येन साध्ये साधने साधनवति साधनसमानाधिकरणे साध्याधिकरणे साध्यसमानाधिकरणेवा ×

End ;

पदवाक्यप्रमाणानां ज्ञानजनकप्रयोजकत्वं शक्यप्राप्तंकथायां × अभियुक्तसम्मतिव्याजेन निरस्यति उक्तं चेति ।

Colophon :

श्रीमन्महोपाध्यायलौगाक्षिभास्करविरचिते न्यायसिद्धान्तमञ्जरीप्रकाशे अनुमानपरिच्छेदः समाप्तः ॥

**731**

Sl. No. 36838 न्यायसिद्धान्तमञ्जरीव्याख्या Ms. No C. 255

Beginning :

सन्ध्यायाः प्रणतिक्षणे गिरिजया सेर्ष्यं समालोकिते
रोषं मानिनि मा कृथास्त्वदपरा नान्यास्ति मान्या मम ।
किन्तु त्वामहमानमामि मनसि ध्यात्वा तवैवाकृती-
रित्थं हर्षितशैलराजतनया हृष्टः शिवः पातु नः ॥

सिद्धान्तगूढवर्त्मैकभावना परिशीलिता ।
श्रीकृष्णनिर्मिता सेयं कृतिरातनुतां मुदम् ॥ १ ॥

सत्येकस्मिन्नपि बाधके साधकसहस्रस्यस्याप्यकिञ्चित्करत्वेन प्रतिबन्धकाभावस्यावश्यापेक्षितत्वेन प्रकृतग्रन्थसमाप्तिप्रतिबन्धकदुरितरूपविघ्नविघाताय कृतं नत्यात्मकं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नाति प्रणम्येति ।

End :

इदं सततया जानामीत्यनुव्यवसायोऽपि शुक्तिगोचरे रजतत्वप्रकारक-प्रत्यक्षसाधकोऽवसेय इति शिवम् ।

श्रुतिकर्कशतर्के य × स्फुरितं मम ।
सिद्धेश्वरीपदद्वन्द्वकराणां तद्विजृम्भणम् ॥

Colophon :

विश्वनाथात्मजदीक्षित श्रीकण्ठशर्मे विरशिता तर्कप्रकाशामिधा मञ्जरी दीपिका पूर्णतामाप्ता ॥

## 732

Sl. No. 36842 त्रिंशच्छ्लोकी Ms. No. C. 2941

Beginning :

सन्ध्यायाः प्रणतिक्षणे गिरिजया सेर्ष्यं समालोकिते
दोषं मानिनि मा कृथाः त्वदपरा नान्यास्ति वन्द्या मम ।
किन्तु त्वामहमानमामि मनसा सिध्या तवैवाकृतिः
इत्थं हर्षितशैलराजतनयादृष्टः शिवः पातु वः ॥ १ ॥
परमबोध इति तद्रहस्यं अत्र अनुसन्धेयम् ॥

End :

किञ्चिज्जल्पितमत्र तद्बहुतरं कृत्वा हृदि ध्यायतां
दोषैरावृत × बुद्धः ।
चन्द्रः किं न कलङ्कितोऽपि भवति श्लाघाग्रगण्यः सतां
बालत्वं यदि तत्र हेतुरधुना बालीयमेतद्वचः ॥

Colophon :

इति श्रीमद्विद्वन्मुकुटमाणिक्यराजिनीराजननीराजितपदद्वन्द्वन्यायवागीश दीक्षित श्रीकंठशर्मविरचितायां न्यायसिद्धान्तमञ्जरीदीपिकायां अनुमानखण्डः समाप्तः ॥

## 733

Sl. No. 36844 **न्यायसिद्धान्तमञ्जरीव्याख्या** Ms. No. P. 790

**Beginning :**

जटाज्योतिलसद्गङ्गाधरभूषितमस्तकम् ।
पुनातु गिरिजाप्रेमपात्रमेकमनेकधा ॥

उपजीव्योपजीवकभावसंगत्या उपमाननिरूपणानन्तरं शब्दं निरूपयन् शिष्यावधनाय प्रतिजानीते- -अथेति ॥

**End :**

हेतुतायाः व्यवस्थापितत्वादिति भावः । इदं रजततया जनामीति अनुव्यवसायोऽपि शुक्तिगोचररजतत्वप्रकारकप्रत्यक्षसाधकोऽवसेय इति ॥

अतिकर्कशतर्के × मुकु × दम् ॥

**Colophon**

इति श्रीकाशीगर्भसंभवदीक्षितविश्वनाथात्मजदीक्षितश्रीकण्ठशर्मविरचित तकप्रकाशाभिधा सिद्धान्तमञ्जरीव्याख्या समाप्ता ॥

## 734

Sl. No. P. 36850 **न्यायसिद्धान्तमञ्जरीव्याख्या** Ms. No. C. 2820

**Beginning :**

जटाजूटलसद्गाङ्गजलभूषितमस्तकम् ।
पुनातु गिरिजाप्रेमपात्रमेकमनेकधा ॥

उपजीव्योपजीवकभावसङ्गत्या उपमाननिरूपणानन्तरं शब्दं निरूपयन् शिष्यावधनाय प्रतिजानीते अथेति ॥

**End :**

अतिकर्कशतर्के यद्धृदब्जे स्फुरितं मम ।
सिद्धेश्वरपदद्वन्द्वचरणात्तद्विजृम्भणम् ॥
योऽसौ काश्यां समुत्पन्नो विश्वनाथेन धीमता ।
तस्य श्रीकण्ठकृतिनः कृतिः कलयतां मुदम् ॥

**Colophon :**

इति श्रीकण्ठशर्मविरचिता तर्कप्रकाशिका सिद्धान्तमञ्जरीदीपिका समाप्ता ॥

## 735

Sl. No. 36852 न्यायसिद्धान्तदीपव्याख्या Ms. No. P. 3076

Beginning

× जो गणानिवेति कायव्यूहशास्त्रस्य विरोधात् एकशरीरावच्छेदेन निखिलेतरशरीव्यवच्छिन्नकारणजन्यकलोत्पत्तौ शरीरान्तरवैय्यर्थ्यापाताच्च। किञ्च विघ्नध्वंसस्य न व्यापारत्वं—

End :

प्रयोजनविरहेण तादृशप्रतिबन्धकतासु महत्वरूपस्पर्शानां त्रयाणामप्यनिवेशा न्नहि घटादौ × कसंयोगादौ चानुमितिसामग्र्यां च सत्यां महत्वाद्यभावः येन—

Colophon :

— — —

## 736

Sl. No. 36854 न्यायसुरद्रुमव्याख्या Ms. No. C. 5405

Beginning :

भवकोदण्डविदितबाहुदण्डैकचण्डिमा ।
भव्याय भूयादव्याजकरुणः कोऽपि भूपतिः ॥ +

+ योऽसौ शङ्करपक्ष्मलाक्षचरणैरुत्पादितो लीलया
न्यायाचार्यनिबन्धकारमणिकृन्मिश्रादिभिर्वर्धितः ।
दीधित्या कलितो गद'धरगुरोर्वाकारविस्तारतः
तस्य न्यायसुरद्रुमस्य भवतु च्छाया सतां प्रीतये ॥

टीकायां लिङ्गांशनिवेशस्य निष्प्रयोजकतयेति ॥ लिङ्गात् ज्ञानमिति व्युत्पत्या लिङ्गज्ञानजन्यं ज्ञानं लभ्यते ।

End :

अवच्छेदकधर्मविधया प्रतिबन्धकतायामपि जलत्वावच्छिन्नविषयतानिरूपित ह्रदत्वावच्छिन्नविषयतात्वेनैव + उक्तातिव्या वारत्वात्। न च।

Coolphon: — —

## 737

Sl. No. 36855 न्यायसूत्रम् Ms. No. P. 4071/a

Beginning ;

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानान्निश्रेयसाधिगमः ।

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ।

End :

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ।

सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः ।

हेत्वाभासाश्चय थोक्ताः ॥

Colophon ;

— — —

## 738

Sl. No. 36858 न्यायसूत्रभाष्यम् Ms. No. C. 1375

Beginning :

प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् । प्रणाणमन्तरेण नार्थप्रतिपत्तिः नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यं प्रमाणेन खल्वयं ज्ञाता अर्थमुपलभ्य तमीहति जिहासति वा ।

End :

यथोक्ता इति हेत्वाभासा लक्षणेनैव निग्रहस्थानभाव इति । त इमे प्रमाणादयः पदार्था उद्दिष्टा लक्षिताः परीक्षिताश्चेति ॥

योऽक्षपादं ऋषिं न्यायः प्रत्यभावद्वतांवरम् ।

तस्य वात्स्यायनस्येदं भाष्यं तमवर्तयत् ॥

Colophon :

इति वात्स्यायनीये न्यायभाष्ये पञ्चमोऽध्यायः ॥

## 739

Sl. No. 36865 न्यायसूत्रभाष्यम् Ms. No. C. 4042/2

Beginning :

स्नावयसि सूत्रबद्धां वाचं धेनुं मुदे श्रमिणाम्।
वन्द्योऽसि धर्मधूर्वह वात्स्यायन योऽसि वत्सलो वत्सः ॥
नावेत्स्यन्तीह केचित् ब्रह्मगृहे कीदृशो न्यायः ।
यदि वत्सलवात्स्यान नाभाषिष्यत भवानेवम् ॥
प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् ॥

End :

तदिमे प्रमाणादयः पदार्था उद्दिष्टाः लक्षिताः परीक्षिताश्चेति ॥
योऽक्षपादमृषिं न्यायः प्रत्यभाद्वदतां वरम्।
तस्य वात्स्यायनस्येदं भाष्यजातमवर्तयदिति ॥

Colophon :

इति श्रीवात्स्यायनीये न्यायभाष्ये पञ्चमोऽध्यायः ॥

## 740

Sl. No. 36866 न्यायवार्तिकम् Ms. No: B. 140

Beginnig :

यदक्षपादः प्रवरो मुनीनां
शमाय शास्त्रं जगतो जगाद ।
कुतार्किकाज्ञाननिवृत्तिहेतुः
करिष्यते तस्य मया निबन्धः ॥

प्रमाणादिपदार्थतर्थतत्त्वज्ञानान्निःश्रेयसाधिगम इति एतच्छास्त्रस्यादिमं सूत्रम् ॥

End :

सर्वेषामागमेन व्यवहारदर्शनादनियमः।
एवं चत्वार्येतानि प्रमाणानि यैः देवमनुष्यतिरश्चां व्यवहाराः प्रकल्पन्ते इति ॥

Colophon :

इति प्रमाणवातिकं समाप्तम् ॥

Extrainformation :

न्यायवार्त्तिके प्रमाणप्रकरणभागः इत्यभिप्रायेण प्रमाणवातिकमिति स्यात् ।

## 741

Sl. No. 36867 **न्यायवार्तिकम्** Ms. No. C. 1376

**Beginning:**

सदा गौर्विषाणित्वादि हेतुः प्राप्तः। एतद्विपक्ष एव नास्तीति। अथ विपक्षे नास्त्येवेति। पुनर्मध्यमस्य पदस्यानारम्भः (किमर्थपुनर्मध्यानय) तत्र पूर्वपदं व्याप्त्यर्थं उत्तरपदेन विपक्षैकदेशवृत्तिप्रतिषेधार्थम्।

**End ;**

शेषेष्वति त्रिविधा तत्त्वस्य परिसमाप्तिरुक्तां वेदितव्येति।

जातीनां सप्रपञ्चाचां निग्रहस्थानलक्षणम्।
शास्त्रस्य चोपसंहारः पञ्चमे परिकीर्तितः॥

यदक्षपादप्रतिमो भाष्यं वात्सायनो जगौ।
अकारि महतस्तस्य भारद्वाजेन वार्तिकम्।

**Colophon :**

पाशुपताचार्यश्रीमदुद्योतकरभगवद्भारद्वाजकृतौ न्यायवार्तिके पञ्चमोऽध्यायः समाप्तः॥

## 742

Sl. No. 36870 **न्यायवार्तिकतात्पर्यटीका** Ms. No. C. 1582

**Beginning :**

यदक्षपादः प्रवरो मुनीनां
शमाय शास्त्रं जगतो जगाद।
कुतार्किकाज्ञाननिवृत्तिहेतुः
करिष्यते तस्य मया निबन्धः॥

**End :**

शेषा त्रिधा तत्त्वस्य परिसमाप्तिरुक्ता वेदितव्येति।
योऽक्षपादमृषिं न्यायः प्रत्यभाद्वदतां वरम्।
तस्य वात्स्यायन × दं चास्य जातमवर्तय ×॥

जातीनां सप्रपञ्चानां निग्रहस्य च लक्षणम् ।
शास्त्रस्य चोपसंहारः पञ्चमे परिवर्तितः ॥
यदक्षपादप्रतिमो भाष्यं वात्स्यायनो जगौ ।
× भारद्वाजेन वार्तिकम् ॥

Colophon :

अक्षपादकृतन्यायसूत्राणां यद्वात्स्यायनकृतं भाष्यं तस्य वार्तिकेऽयं पञ्चमोऽध्यायः । समाप्तं चैतत् ॥

## 743

Sl. No. 36873 न्यायवार्तिकतात्पर्यटीका Ms. No. C. 1377

Beginning :

विश्वव्यापी विश्वशक्तिः पिनाकी
विश्वेशानो विश्वकृद्विश्वमूर्तिः ।
विश्वज्ञाता विश्वसंहारकारी
विश्वाराध्यो राधयत्वीहितं नः ॥

नमामि धर्मविज्ञानवैराग्यैश्वर्यशालिने ।
निधये वाग्विशुद्धीनामक्षपादाय तायिने ॥
ग्रन्थव्याख्याच्छलेनैव निरस्ताखिलदूषणा ।
न्यायवार्तिकतात्पर्यटीकास्माभिर्विधास्यते ॥

End :

प्रत्यक्षाप्तागममयमहान्यायमूला मनोज्ञा
टीका नीर भवतु कृतिनां नन्दिनीष प्रदानाम् । (?)
मूढाः कृतोऽञ्जलिरयं बलिरेष दत्तः
कोऽयं मया प्रहरतात्र यथाभिलाषम् ।
अभ्यर्थये वितथवाप्रय पाऊवर्षे
मा मा विलोअकत कीर्तिनदीः परेषाम् ॥ (?)

Colophon :

इति विरचितायां न्यायवार्तिकतात्पर्यटीकायां पञ्चमोऽध्यायः ॥

## 744

Sl. No.36882 न्यायवार्तिकतात्पर्यपरिशुद्धि :Ms. No. C. 1448

Beginning :

मातः सरस्वति पुनः पुनरेष नत्वा
बद्धाञ्जलिः किमपि विज्ञपयाम्यवैहि।
वाक्चेतसोर्मम तथा भव सावधाना
वाचस्पतेर्वचसि नस्खलतोपथैते ॥

विश्वाराध्य इत्यत्र विश्वपदेन संसारिचेतनवर्गो विवक्षितः । तस्यैव-तदाराधकत्वात् ।

End :

यद्येवमेतानि यथायथमुक्तेष्वेवान्तर्भवन्ति, किमनुक्तयत्समुच्चयार्थ-तया टीकाकृता चकारो व्याख्यात इति चेत् न, एतेषामेव पृथग्व्यवहर्तव्यता-मात्रमनुक्ततत्समुच्चयार्थश्चकार इति सर्वं निस्तरङ्गमिति ॥

Colophon :

इत्याचार्यश्रीमदुदयनकृतौ तात्पर्यपरिशुद्धौ पञ्चमोऽध्यायः समाप्तः ॥

## 745

Sl No. 36881 न्यायवार्तिकतात्पर्यपरिशुद्धिः Ms. No. B. 157

Beginning :

अपक्षपातिने विश्वमज्ञानध्वान्तघातिने ।
नमः सर्वशरण्याय प्रमाणाय पिनाकिने ॥
संशोध्य दर्शितरसामरुकूपरूपा-
ष्टीकात्वतः प्रथम एव वचो गभीराः ।
तात्पर्यतो यदधुना पुनरुद्यमो नः
श्रीवत्सवत्सलतयैव तथा तथापि ॥

End :

किमनुक्तम् । यत्समुच्चयार्थतया टीकाकृता चकारो व्याख्यात इति चेन्न। एतेषामेव पृथग्व्यवहर्तव्यतामात्रमनुक्तम्। तत्समुच्चयार्थश्चकार इति सर्वं निस्तरङ्गमिति ॥

End :

इत्याचार्यश्रीमदुदयनकृतौ तात्पर्यपरिशुद्धौ पञ्चमोऽध्यायस्समाप्तः ॥

**746**

Sl. No. 36881 न्यायवार्तिकतात्पर्यपरिशुद्धिप्रकाशः Ms. No. B. 157

Beginning :

यस्याशाः परिधानमिन्दुकलिका धत्ते शिखण्डश्रियं
ज्वालापल्लवितः शिखी दृशि शिरोरङ्गे सरिन्नृत्यति ।
यं पश्यन्ति निरन्तरायमनसः संसारमोहच्छिदं
तं वन्दे सुरवृन्दवन्दितपदद्वन्द्वारविन्दं शिवम् ॥
न्यायविद्याविदग्धाय मीमांसापारदृश्वने ।
गङ्गेश्वराय गुरवे पित्रेऽत्रभवते नमः ॥
विपक्षदर्शनोद्दामदुस्तर्कतिमिरावृताः ।
वर्धमानप्रकाशेन सन्तः पश्यन्तु पद्धतीः ॥

End :

एतदध्यायप्रतिपाद्यतात्पर्यविवेको विस्तरेण परिशिष्टप्रकाश एव प्रपञ्चित इति तत्रैवानुसन्धेय इति ॥

यस्तर्कतन्त्रशतपत्रसहस्ररश्मिः
गङ्गेश्वरः सुकविकैरवकाननेन्दुः ।
तस्यात्मजः पितुरधीत्य निबन्धमित्थं
प्राशीशयत् कृतमुदे बुधवर्धमानः ॥

Colophon :

महामहोपाध्यायगङ्गेश्वरात्मजमहामहोपाध्यायश्रीवर्धमानविरचिते न्याय-निबन्धप्रकाशः परिसमाप्तः ॥

**747**

Sl. No. 36885 न्यायसूत्रविवरणम् Ms. No. C. 1378

Beginning :

विश्वव्यापी विश्वशक्तिः पिनाकी
विश्वेशानो विश्वकृद्विश्वमूर्तिः ।

विश्वज्ञाता विश्वसंहारकारी
विश्वाराध्यो राधयत्वीप्सितं नः ॥

यदक्षपादः प्रवरो मुनीनां × तस्य मया प्रबन्धः ॥

पुण्डरीकपुरश्लाघ्यो वेदशास्त्रार्थकोविदः ।
गम्भीरवंशजः चक्रे प्रबन्धं श्रीप्रपादुकाम् ॥

**End :**

ते खल्विमे प्रमाणादयः पदार्थाः उद्दिष्टाः लक्षिताः परीक्षिताश्च । विस्तरतः प्रथमसूत्रे लक्षिताः प्रथमेऽध्याये परीक्षिताः ।

शेषेष्विति त्रिविधा तत्त्वस्य परिसमाप्तिरुक्ता वेदितव्येति ।

जातीनां सप्रपञ्चानां निग्रहस्थानलक्षणम् ।
शास्त्रस्य चोपसंहारः पञ्चमे परिकीर्तितः ॥

**Colophon :**

इति न्यायसूत्रविवरणे पञ्चमोऽध्यायः ॥

## 748

**Sl. No. 36888** न्यायसूत्रवृत्तिः Ms. No. C. 1141

**Beginning :**

संशय इति लक्ष्यनिर्देशः । विमर्श इति । विशब्दो विरोधार्थः । मृशिर्ज्ञानार्थः । एकस्मिन् धर्मिणि इति पूरणीयम् । तेन एकधर्मिणि विरोधेन भावाभावप्रकारकज्ञाने संशयस्त ×

**End :**

भाषणावसरेऽनुभाष्यतोधिकरणानुभाषणप्रवृत्ते वाहिनीतदुद्भावनमित्यादिकं मृग्यम् । अथ सिद्धान्तं लक्षयति सिद्धान्तम +

**Colophon :**

— — —

## 749

**Sl. .No. 36889** न्यायामृतम् Ms. N. C. 2863

**Beginning :**

ब्रह्माद्या निखिलार्चितास्त्रिदशसन्दोहाः सदाभीष्टदाः
स्वाज्ञानप्रशमाय यत्र मनसो वृत्तीः समस्ता दधुः ।

श्रीं विष्णोश्चरणाम्बुजं भयभयध्वंसैकबीजं परं
हृत्पद्मे विनिधाय तन्निरुपमं तर्कामृतं तन्यते ॥

अथ श्रुतिः श्रूयते—आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।

End :

यथा नीलं सरोजं भवत्येव । विशेषणसङ्गतस्यायोगव्यवच्छेदः । यथा शङ्खः पाण्डुर एवेति ।

विशेष्यसङ्गतस्यान्ययोगव्यवच्छेदः । पार्थ एव धनुर्धर इत्यादौ । एवं दिशा सर्वं बोध्यमिति ॥

Colophon :

इति श्रीजगदीशभट्टाचार्यविरचितं तर्कामृतं समाप्तम् ॥

## 750

Sl. No. 36794 पक्षतावादः Ms. No. P. 3265

Beginning :

सत्यपि परामर्शादौ पक्षसाध्यनिर्णयदशायां विनाऽनुमितेरनुदयात्तप × कल्प्यते । पक्षता च--

End :

यत्किञ्चिद्विषयोचरानुमितौ सत्यां तदुत्तरं दिवसादिपर्यन्तं ज्ञानान्तरानुदयप्रसङ्गात् ॥ तस्य चानुभवविरुद्धत्वादित्यवधेयम् ॥

Colohon :

इति पक्षतावादः ॥

## 751

Sl. No. 36788 पदवाक्यरत्नाकरः Ms. No. C. 2143

Beginning:

नान्यसाधारणो विश्वविषयो यो विभोर्गुणः ।
तस्यैषा शक्तिरखिलप्रपञ्चस्य प्रकाशते ॥

विभोस्संयोगेन मूर्तद्रव्यसामान्यमनादिनिष्पन्नेन चैतन्येन सकलमपि वस्तु व्याप्नुवतो भगवतो भवस्य यो गुणो नित्यसविषयत्वादि अनादिजीवादिगुण- व्यावृत्तेन धर्मेण लोकोत्तरो विषयतया विश्वमपि व्याप्य वर्तते ।

इति महामहोपाध्यायगोकुलनाथविरचिते पदवाक्यरत्नाकरे परिभाषा प्रकरणम् ।

**End :**

क्रियान्तरे सप्तमी तु साधुतामाहेत्येके । कालमात्रे सप्तम्यर्थे दोहनादि विशिष्टा गौर्गोदोहनाधिकरणताव्याप्यया विशिष्टाधिकरणतयान्वेति ॥
इति सप्तमी ॥

**Coloponh :**

पदवाक्यरत्नाकरः समाप्तः ॥

## 752

**Sl. No. 36896** पदार्थचन्द्रिकाटीका Ms. No. C. 2249

**Beginning ;**

× धौ वीशनदीशवाहनौ ।
चक्रशूलधरौ देवौ वन्देऽहं हरिशङ्करौ ॥
यादवाचार्यशिष्येण श्रीनिवासेन × णा ।
पदार्थचन्द्रिकाव्याख्या क्रियते बुधतोपणी ॥

**End :**

अवर्णात्मकमित्यत्र नञोऽभावार्थत्वाद्वर्णात्मकत्वाभावरूपस्य शब्द × गुणत्वमु मतो व्याचष्टे ध्वनिमिति । यावदिति । यथोक्तं गुणादिकिरणा- वल्याम्–शब्दो वर्णात्मको ध्वन्यात्मकश्चेति द्विविध इति ।

ननु अनित्यैकरूपइत्यत्र अनित्यं एकं रूपं येषां त इति बहुव्रीहि- समासकरणेनसर्वनामसंज्ञैकत्वसङ्ख्या × शब्दस्य बहुव्री ×

**Coolphon:**

— — —

## 753

Sl. No. 36897

पदार्थतत्त्वम्

Ms. No. P. 4557/2

Beginning ;

नन्दनन्दपदद्वन्द्वं निधाय हृदि चिन्तया ।
तनोति कुतुकं किञ्चिद्रघुदेवस्समासतः ॥

कामहस्तधृतसास्त्रकार्मुकं
पाष्पमद्भुतमुदीक्ष्य कुप्यतः ।
धूर्जटेः नयनकोणशोणता
हन्तु सर्वजगतामुपद्रवम् ॥

प्रसङ्गात्पदार्थतत्त्वं निर्वक्तुं शिष्यावधानाय प्रतिजानीते अथेत्यादि ।

End :

सर्वशा × त्वज्ञान् नत्वा भवादृशान् ।
इदं याचे मदुक्तानि विचारयत सादरम् ॥

नी × रेषा न दोषाय सेविता पूर्वपण्डितैः ।
यन्नियोक्तिविचाराय याचं × विदुषो परान् ॥

Colophon :

इति श्रीमहोपा × यता तार्किकभट्टाचार्यशिरोमणिकृतं पदर्थतत्त्व-
निरूपणं सम्पूर्णम् ॥

## 754

Ms. No. C. 1765/1

पदार्थतत्त्वम्

Sl. No. 36901

Beginning :

अथ पदार्थतत्त्वं निरूप्यते। तत्र दिक्कालौ नेश्वरादतिरिच्येते माना-
भावात्। तत्तन्निमित्तसमवधानवशादीश्वरादेव तत्तत्कार्यविशेषाणामुपपत्तिः ।
परेषामेके तस्माद्दिगादेरिव विलक्षणानामिव प्राच्यादिव्यवहाराणा—

End :

सर्वशास्त्रार्थतत्त्वज्ञान् नत्वा नत्वा भवादृशान् ।
इदं याचे मदुक्तानि विचारयत सादरम् ॥

रीतिरेषा न दोषाय सेविता पूर्वपण्डितैः ।
यन्निजोऽस्ति विचाराय याचतं विदुषां परान् ॥

Colophon :

इति श्री महोपाध्यायभट्टाचार्यशिरोमणिविरचितं पदार्थतत्त्वं सम्पूर्णम् ॥

## 755

Sl. No. 3675[ **पदार्थखण्डनव्याख्या** Ms. No. . 176

Beginning ;

संसर्गाभावोऽन्योन्याभावश्च नञर्थः । तत्र × त्वावच्छेदकावच्छिन्नत्वंव्युत्पत्ति
बललभ्यं नीलघटवति न घटः नीलो घटो न घट इत्याद्यव्यवहारात् ।

End :

पदार्थखण्डनाहूतपुरुहूतपुरोहितम् ।
शिरोमणिमहं वन्दे शिरोमणिमिवाद्भुतम् ॥

श्रीमद्दीधितिकारकल्पितघटाकोलाहले व्याकुले
मार्गे सञ्चरणीययन्निगदितं सिद्धान्तसिद्धेतरत् ।
दैवायत्तेन भवेद्यदीह सहसा प्रौढापराधो मम
क्षन्तव्यः श्रुतिभिः कृतो यदि भवेद्यक्षानुरूपो बलिः ॥

Colophon :

इतिश्री रघुदेवन्यायालङ्कारभट्टाचार्यविरचिता पदार्थखण्डनव्याख्या सम्पूर्णा ॥

## 756

Sl. No. 36814 **पदार्थखण्डनव्याख्या** Ms. No. P. 768/1

Beginning ;

नन्दनन्दपदद्वन्द्वं निधाय हृदि चिन्तया ।
तनोति कुतुकं किञ्चिद्रघुदेवस्समासतः ॥

पदार्थतत्त्वं यदिदं शिरोमणि-
र्निर्णीतवान् जीर्णमतस्य दूषणैः ।
तदेव तर्केण विचारयामः
सदर्थकेनेतरखण्डनेन ॥

End :

न च समूहालम्बने अधिकस्य संयोगत्वस्य विषयत्वान्न तथेति वाच्यम् । तथापि घटवद्भूतलं संयोगश्चेति ज्ञानस्यैतादृशसमूहालम्बनस्य वैलक्षण्यानिर्वाहान्नच विशिष्टबुद्धौ सम्बन्धसम्बद्धोऽप्यधिको ×

Colophon :

— — — —

## 757

Sl. No. 36906 पदार्थतत्त्वव्याख्या Ms. No. P. 8434

Beginning :

नन्दनन्दपदद्वन्द्वं विधाय हरिचिन्तया ।
तनोति कुतुकं किञ्चिद्रघुदेवः सहर्षितः ॥

कामहस्त ×
पौष्यमुद्रुतमुदीर्य विस्मितः ।
धूर्जटेर्नयनकोणशोणिमा
हन्तु सर्वजगतामुपद्रवम् ॥

पदार्थतत्त्वं यदिदं शिरोमणिः
निर्णीतवा × र्णमतस्य दूषणैः ॥

End :

साधकाः अधीनमित्यादिना प्रयोजका एव वेद × इत्यत आह युक्तशि × नामिति । मदुक्तानां दर्शनं शास्त्रं भवादृशान्यण्डिता × कात्पूर्वपण्डितैः वाचस्पतिमिश्रादिभिः × पण्डितानित्यर्थः ।

Colophon :

— — — —

## 758

Sl. No. 36908 पदार्थतत्त्वव्याख्या Ms. No. C. 343

Beginning :

तातस्य तर्कसरसीरुहकाननेषु
चूडामणेर्दिनमणेश्चरणौ प्रणम्य ।

श्रीरामभद्रसुकृती कृतिनां हिताय
लीलावशात् किमपि कौतुकमातनोति ॥

End ;

वस्तुतस्तद्धर्माश्रयीभूतयत्किञ्चिद्व्यक्तयव्यवहितपूर्वसमयान्यत्वयद्यद्धर्मावचिछन्नवन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकतदन्यधर्म एव तद्धर्मावच्छिन्नं प्रति नियतपूर्ववर्तितावच्छेदकः। तथाच नित्यानित्यवृत्तिरपि ज—

Colophon :

— — —

759

Sl. .No. 36909 न्यायसिद्धान्तदीपः Ms. N. C. 17652

Beginning :

तातस्य तर्कसरसीरुहकाननेषु
चूडामणेर्दिनमणेश्चरणौ प्रणम्य ।
श्रीरामभद्रसुकृती कृतिनां हिताय
लीलावशात्किमपि कौतुकमातनोति ॥

तत्र तेषु पदार्थेषु मध्ये दिकालाविति पूर्वस्यां घट इत्यादि—

End:

तथा च अत्र व्यभिचार इति वाच्यम्। अन × र्थे तादृशबोधस्य फलस्य प्रामाणिकत्वे तद्बोधाय प्रकारतातिरिक्तसंबन्धस्यैव कार्यतावच्छेदकत्वात्। अन्यथानुपपत्तेर्दुर्वारत्वादिति परमरहस्यमत्रानुसन्धेयम्।

Colophon :

इति श्री न्यायवाचस्पतिभट्टाचार्यजयरामेण विरचिता पदार्थखण्डनशिरोमणिव्याख्या समाप्ता ॥

760

Sl. No: 36910 पदार्थदीपिका Ms. No. P. 262/5

Beginning :

× स्साधितमिति नव्यतमाः। ज्ञानत्वेनैवानुमितिकरणपरामर्शो विशेषकारणमिति नातिप्रसङ्ग इति केचित्। न च व्याप्तिग्रहे सति

महानस एवानुमीयताम्, वह्निव्याप्यधूमवानयमिति परामर्शस्य तत्रापि सम्भवादिति वाच्यम्। पक्षताया अप्यनुमितिहेतुत्वात् ×

End :

तस्य सेवेश्वरस्योपासना श्रुतिस्मृत्यनुसारेणानेकधा महत्यवगन्तव्येति पल्लवेनालम्॥

Colophon :

इति श्रीपदवाक्यप्रमाणपारावारपारीणरङ्ग राजभट्टात्मजकौण्डभट्टकृतपदार्थदीपिका सम्पूर्णा॥

## 761

Sl. No. 36911 पदार्थदीपिकाव्याख्या Ms. No. P. 3337

Beginning :

विश्वाधिकं विमलचिन्मयमिन्दुचूडं
प्रालेयशैलतनयादृतवामभागम्।
तापिञ्छगुच्छमसृणच्छविकण्ठमूलं
देवं नमामि शमितत्रिपुरं गिरीशम्॥

प्रसादेन गिरीशस्य गुरूणामप्यनुग्रहात्।
पदार्थदीपिकाव्याख्यां रचयामि यथामति॥

प्रारिप्सितग्रन्थस्य × श्रीमदिति॥

End :

तत्फलमिति। तस्मा दिकैरीश्वराराधनं श्रुतिस्मृत्युक्तप्रकारेणैव कर्तव्यं नान्यथेति सर्वं सुस्थम्॥

लोलम्बाः कुसुमेषु × किं चिन्तया॥

Colophon :

इति श्रीभारद्वाजकुलजलधिकौस्तुभ श्रीकण्ठमतप्रतिष्ठापनाचार्य × अप्पयदीक्षितसोदर्यश्रीमदाचान्दीक्षितपौत्रस्य + कैयटव्याख्यानशिवतत्त्व-रहस्यनीलकण्ठविजयगङ्गावतरणनलचरितशिवलीलार्णवाद्यनेक + नीलकण्ठ-। दीक्षितस्य तृतीयतनयेन कार्तिकेयविजयकाव्यनिर्मात्रा गीर्वाणेन्द्रयज्वन विरचितः न्यायप्रकाशः सम्पूर्णः॥

## 762

Sl. No. 36923 पदार्थमाला Ms. No. C. 1574

Beginning :

स्वीकृतकुपितयशोदाश्रमहरगोदामबन्धनव्यसनम् ।
नलिनीदलसुकुमारं नन्दकुमारं नमस्यामः ॥

श्रीमता जयरामेण युक्तिमौक्तिकगुम्फिता ।
पदार्थमाला विदुषां विलासाय वितन्यते ॥

अत्र साधर्म्यवैधर्म्याभ्यां निखिलपदार्थतत्त्वज्ञानं निःश्रेयसोपयोगीति पदार्थास्तद्धर्माश्च निरूप्यन्ते ॥

End :

सुषुप्तिकाले ज्ञानानुत्पादस्तु कालविशेषस्य विरोधित्वादिति चेन्न । अनन्तकालविशेषाणां विरोधित्वकल्पनामपेक्ष्य जन्यज्ञानमात्रे विजातीयात्म मनोयोगहेतुत्वकल्पनाया एव युक्तत्वादिति शिवम् ॥

× पदार्थमालां यदि नाम बालाः
लीलावशादप्यनुशीलयन्ति ।
तदा दुरूहार्थपयोधियौरै
र्विना विचारं परिशीलयन्ति ॥

Colophon :

इति श्रीमन्होपाध्यायश्रीजयरामन्यायञ्चाननभट्टाचार्यविरचितायां द्रव्य-परिच्छेदः । पार्थमाला समाप्ता ॥

## 763

Sl. No. 36914 पदार्थमालाव्याख्या Ms. No. C. 1053

Beginning :

श्रीवासुदेवं सुरवैरिभंगं
रमाधरालिंगित सुन्दरांगम् ।
पदांबुसंभूतपवित्रगङ्गं
नमामि तं वारितदोषसंगम् ॥

कणादनामानम्रि × प्रणम्य

गुरुञ्च लौगाक्षिकुलोद्भवेन।

वितन्यते भास्करशर्मणेत्थं

पदार्थमालानुगतप्रकाशः ॥

चिकीर्षितग्रन्थस्य निर्विघ्नसमाप्तये ×

End :

वितानेति । अहंचरवानचनवनवेत्यादिप्रयोगे वैकल्पिकवृद्धिनिमित्त-भूत वैकल्पिकणित्वस्य णलुत्तमो वेति ज्ञापकबलात् कर्त्रपरोक्षेपि लिटः साधुत्वं वोध्यमिति ॥

Colophon :

इति श्री महोपाध्याय लौगादिगोत्रसम्भूतश्रीमद्रुद्रकवीन्द्रभवजममङ्गल-विदुषः सूनुना भास्करेण विरचितः पदार्थमालाप्रकाशः समाप्तः ॥

## 764

Sl. No. 36915 — पदार्थमाला — Ms. No. P. 6444

Beginning :

जानकीवदनाम्बोजभानवे गतये:सताम् ।

नमः श्रीरामचन्द्राय × सर्वसम्पदाम् ॥

एकं च तत्त्वतो ज्ञानं विना सर्वज्ञतां नरः ।

न समर्थो महेन्द्रा × तस्मात्सर्वत्र × ॥

इत्यादिना सृष्टिरक्षा × ज्ञाननियतज्ञानबन्धनान् ।

End :

किन्त्विदं निर्मितं प्रीत्यै सेव्यतां जानकी सुतः ।

शौनकाचार्यगोत्रेण रामचन्द्रेण निर्मिता ॥

पदार्थानां विवेकोऽयं निर्मितो भ्रियतां बुधैः॥

Colophon :

इति श्रीपदार्थविवेकः समाप्तः ॥

## 765

**Sl. No. 36916** **पदार्थसंग्रहटीका** **Ms. No. C. 1575**

**Beginning :**

× मिति विध्यानन्तर्यप्रतिपादनाच्च। तदभावः निरासः स तच्छब्दोऽपि हेतौ वर्तमानो विशिष्टदेशकुलप्रसूतमतिप्लुतेन × वसितायादुपजातं × तत्वाभिनिवेशो तदन्तेवासिनमाहेति ॥

**End :**

इहेति बुद्धेः सम्बन्धनिमित्तत्वेन अन्यत्रोपलब्धेरिहापि तदुपलम्भादनुमानं प्रवर्तते यत एवं तस्मादिह बुध्यनुमेयः समवायो न त्वि × बुद्धौ प्रत्यक्ष इत्युपसंहारः॥

**Colophon :**

श्री व्योमशिवाचार्यविरचितायां पदार्थसङ्ग्रहटीकायां समाप्तः ॥

## 766

**Sl. No. 36917** **परामर्शवादः** **Ms. No. P. 218/3**

**Beginning**

× मितिं प्रति × प्यत्वावच्छिन्नहेतुप्रकारतानिरूपितपक्षविशेष्यताशालि + नत्वरूपविशिष्टपरामर्शत्वेन हेतुता किन्तु व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वेन व्यप्यतावच्छेदकप्रकारक ×

**End :**

प्रतिबन्धकतायामेकज्ञानविशिष्टापरज्ञान × ज्ञानप्रयुक्तमुपदर्शितं गौरवं मीमांसकमते। नैयायिकनये तत्स्थलीयतादृशानुमिति सामग्रीणां प्रतिबध्यतावच्छेदकगौरवं मीमांसकमतमेवात् समीचीनतया प्रतिभाति ॥

**Colophon :**

— — —

## 767

Sl. No. 36918 विशिष्टपरमर्शकारणतावदः Ms. No. P. 1157/1

Beginning ;

विशेषणतावच्छेदकप्रकारकनिर्णयशून्यकाले विशिष्टवैशिष्ट्यबोधापत्तिवारणाय विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन कारणता आवश्यकी ।

End :

विशेषणातावच्छेदकप्रकारकनिर्णयत्वेन हेतुतायां लाघवसम्भवात् । संशयस्य विरोधित्वाभ्युपगमेनैव वा ना × गन्धोऽपीति संक्षेपः ॥

Colophon :

इति श्री महोपाध्याय श्रीरघुदेवतर्कालङ्कारभट्टाचार्यविरचितः विशिष्टवैशिष्ट्यबोधविचारः समाप्तः ॥

## 768

Sl. No. 36920 पशमर्शवादः Ms. No. p. 4021/2

Beginning :

धूमपरामर्शं विना अनुमित्यनुदयान् अनुमितिं प्रति परामर्शो हेतुरिति सिद्धान्तः । तत्र धूमपरामर्शसत्वे घटानुमित्यनुदयात् पर्वतोद्देश्यकवह्निवि × यकानुमितिं प्रति पर्वतविशेष्यकवह्न्यादिव्याप्यधूमादिनिश्चयो हेतुरिति विशिष्य कार्यकारणभावः ।

End :

तत्रापि परामर्शे द्वितीयक्षणोत्पन्नानुमितित्व × त्वस्य गुरोः प्रयोजकप्रत्यनुमित्साविरहविशेषानुमित्यत्वकल्पनापेक्षया तादृशाभावाधिकरणत्वं भावाधिकरणत्वस्य लघोः प्रयोजकत्वकल्पने लाघवादित्यलमसद्ग्रहणेनोत सङ्क्षेपः ॥

Coloponh :

गुरुपरामर्शवादस्समाप्तः ॥

## 769

Sl. No. 36922 परामर्शवादः Ms. No: C. 790

**Beginnig:**

परामर्शं विना अनुमितेरनुदयात् अनुमितिं प्रति परामर्शो हेतुरिति सिद्धान्तः ॥ अत्र नवीनाः । धूमपरामर्शसंतत्रे घटानुमित्यनुदयात् पर्वतोद्देश्यकवह्निविधेयकसंयोगसंसर्गकानुमितिं प्रति × कार्यकारणभावः ॥

**End :**

व्यधिकरणत्वस्य गुरोः प्रयोजकत्वकल्पनापेक्षया तादृशाभावाधिकरणत्वं प्रति अनुमित्साविरहविशिष्टानुमित्यभावाधिकरणत्वरूपलघोरपि प्रयोजकत्व कल्प × लाघवादित्यलमसद्ग्रहेणेति ॥

**Colophon :**

इति न्यायालङ्कारतर्कवागीशरघुदेवभट्टाचार्यविरचितो अनुमितिकार्यकारण भावविचारः समाप्तः ॥

## 770

Sl. No. 36923 परामर्शवादः Ms. No. P. 2586/2

**Beginning :**

अनुमितिपरामर्शयोः कार्यकारणघटकप्रत्यासत्तिः समवायघटितसामान धिकरण्यं तेन एकपुरुषीयपरामर्शदशायां तच्छून्यस्य पुरुषान्तरस्य नानुमितिः। तस्य समवायिकारणतावच्छेदकसम्बन्धेन परमर्शानधिकरणत्वात् ।

नवीनास्तु — समानधर्मितावच्छेदकत्वं अनुमितिपरामर्शयोः कार्यकारण भावघटकप्रत्यासत्तिः ।

**End ;**

समवायप्रत्यासत्तिकल्पे विषयभेदेन लिङ्गादिभेदेन भिन्नासु परामर्श हेतुतासु पूर्वोपदर्शितविनिगमनाविरहेण अनन्तकारणाधिक्यापेक्षया आत्म भेदेनोपदर्शितकारणताकल्पनस्यैवोचितत्वादित्याहुः ॥

**Colophon ;**

इति श्री भट्टाचार्यहरिरामतर्कवागीशकृतौ धर्मितावच्छेदकप्रत्यासत्ति विचारः समाप्तः ॥

## 771

Sl. No. 36928 पश्यमृगोधावतिवाक्यार्थः Ms. No. P-3732/5

Beginning

पश्य मृगो धावतीत्यादौ मृगो धावतीति वाक्यार्थस्यैव कर्मत्वम् । न चैवं द्वितीयापत्तिः । वाक्यस्य प्रातिपदिकसंज्ञाविरहात् । अत एव पश्य लक्ष्मण पम्पायाः बकः परमधार्मिकः इत्यादौ—

End :

न चैवं योगरूढादविशेषः । तत्र शक्यतावच्छेदकयोः भेदात् । अत्र च एकशक्यतावच्छेदकस्य अपरशक्यतावच्छेदकघटकत्वात् । तथाच पाचकपदं पाककृतिप्रयुक्तभृतिशालिनि शक्तम् ॥

Coolphon:

— — —

## 772

Sl. No. 36935 प्रतिबन्धकतावादः Ms. No. P. 1157/15

Beginning :

विशेषणतासमवायोभयघटितसामानाधिकरण्यसंबन्धेन तत्तदप्रामाण्यज्ञाना-भावविशिष्टमभावनिश्चयत्वं न प्रतिबन्धकतावच्छेदकम्—

End :

प्रतिबन्धकतावच्छेदकप्रकारकधर्मनिश्चयस्य कारणत्वाविलोपापत्त्या बाधत-द्व्याप्यादिबुद्धीनां प्रातिस्विकस्वरूपेण प्रतिबन्धकत्वस्यैव युक्तत्वादिति संक्षेपः ॥

× धर्मितावच्छेदकप्रतियोगिमत्ताज्ञानस्य प्रतिबन्धकत्वादिति

कृतं पल्लवितेन ॥

Colophon:

— — —

## 773

Sl. No. 36937 प्रतियोगिज्ञानकारणतावादः Ms. No. P 4021/3

**Beginning:**

प्रतियोगिज्ञानशून्यकाले नेत्याकारकप्रतियोग्यमिश्रिताभावलौकिकप्रत्यक्षवारणाय अभावलौकिकप्रत्यक्षं प्रति प्रतियोगिज्ञानहेतुत्वमङ्गीकुर्वन्ति प्राचीनाः। तन्मते अभावलौकिकप्रत्यक्षप्रतियोगिज्ञानयोर्न सामान्यतोऽभावलौकिकप्रत्यक्ष प्रतियोगिज्ञानत्वाभ्यां कार्यकारणभावः।

**End:**

तस्मात् द्वयोः कार्यतावच्छेदकयोः सामानाधिकरण्यं तिष्ठति। तयोरेकेन फले जननीये अन्यस्य सहकारित्वं स्वीक्रियत इति नियममङ्गीकृत्य इन्द्रियसम्बद्ध विशेषणतया फले जननीये घटत्वविशिष्टवैशिष्ट्य × ध्युत्पादकघटत्व प्रकारकज्ञानस्य सहकारित्वस्वीकारेणैव सर्वसामञ्जस्ये अभावबुद्धिं प्रति प्रतियोगिज्ञानस्य हेतुत्वकल्पनेनेति किमधिकेन॥

**Colophon:**

इति श्रीरघुदेवभट्टाचार्यविरचितः अभाववादे प्रतियोगिज्ञानकारणतावादः समाप्तः॥

## 774

Sl. No. 36938 प्रत्क्षलक्षणवादः Ms. N. P. 1057/2

**Beginning:**

सा च प्रमा चतुर्विधा—प्रत्यक्षानुमित्युपमितिशाब्द × भेदात्। यद्यपि प्रमाकरणं × करणत्वं च व्यापारवत्त्वमिति [व्यापरस्यापि नकरणत्वापत्तिः]।

**End:**

कालमनस्संयोगस्य ज्ञानहेतुत्वे मानाभावात्। स्वरूपसंबन्धेन तस्य जगदाधारत्वादिति संक्षेपः॥

[विभोः कालस्य मनसा सह संयोगस्य सार्वदिकत्वेन तस्य ज्ञानकारणत्वे ज्ञानस्यापि सार्वदिकत्वेन सुषुप्त्यनुपपत्तेः]॥

**Colophon:**

— — —

## 775

Sl. No. 36944 **प्रमाणाप्रमेयसमासविचारः** Ms. No. P.5450/5

Beginning :

ननु प्रमाणप्रमेयेत्यत्र कः समासः । द्वन्द्वः कर्मधारयः षष्ठीतत्पुरुषो वा ? नाद्यः प्रमाणादीनां प्रमेयस्वरूपत्वेन पदार्थभेदाभावात् ।

[पदार्थभेदे सत्येव द्वन्द्वसमासस्य संभवात् । अन्यथा नीलघटाबित्येव प्रयोगप्रसङ्गात् ।]

End :

प्रमाणादीनां प्रमेयस्वरूपत्वेऽपि प्रमेयमात्रस्य प्रमाणस्वरूपत्वाभावेन इतरेतरपदार्थभेदो वा द्वन्द्वघटक इति सिद्धान्तः ।

[वस्तुतस्तु अत्र सूत्रे प्रमाणादिपदानां योगरूढत्वेन पारिभाषिकत्वादर्थभेदः वर्तत एवेति न काप्यनुपपत्तिः ॥]

Colo hon :

— — — —

## 776

Sl. No. 36945 **प्रमाणमञ्जरी** Ms. No. C. 763

Beginning :

कासारतीतस्य ×
मरमध्य × ।
द्वैमा × नाक्षितरं भवतः स पायात्
सञ्जातनिर्मलजलप्रतिधर्मा ॥
अभिनन्द्य विधो ×।
प्रमाणमञ्जरी सर्वदेवेन क्रियते मया ॥

End :

आत्मा कदाचिदशेषशेषगुणपू × अनित्यापि
विशेषगुणवत्पार्थिवपरमाणु × कश्चिव्यभिचारस्यापि तथा साधनात् ।

Colophon :

इति तार्किकचक्रचूडामणिसर्वदेवविरचितायां प्रमाणमञ्जर्यामजपदार्थः समाप्तः ॥

777

Sl. No. 36947 प्रमालक्षणवादः Ms. No.P. 5442/5

Beginning :

स्वव्यधिकरणधर्मावच्छिन्ना या या विशेष्यता तत्तदति रूपकत्वं सर्वांशे याथार्थ्यं भट्टाचार्यैरभिहितम् ॥ स्वव्यधिकरणत्वं स्वाधिकरणनिरूपितवृत्तित्वाभावः । स्वपदं विशेष्यतापरम् ।

End :

तस्य प्रमात्वापत्तिः स्वसमानाधिकरणविशेष्यतानिरूपितत्वं अपहत्य स्वप्रतियोगित्वावच्छिन्नभेदसमानाधिकरणविशेष्यतानिरूपितत्वप्रवेशः इति ॥

Colophon :

इति याथार्थ्यनिरुक्तीयं चन्द्रनारायणीयम् ॥

778

Sl. No. 36948 प्रवाहतोऽनादित्वनिर्वचनम् Ms. No.C.2105

Beginning :

एकप्रवाहमध्यपतितानेकप्रवाहिप्रतियोगिकप्रागभावावच्छिन्नकालानाशित्वानधिकरणध्वंसप्रतियोगिप्रवाहिकत्वमिति मन्दारमञ्जर्यां प्रवाहतोऽनादित्व निर्वचनं अस्य चायमर्थः ।

End :

अन्यथा सामानाधिकरण्यघटकाधिकरणविशेषजिज्ञासा न निराकृता स्यादिति सर्वं रमणीयम् ॥

Colophon

— — — —

779

Sl. No. 36950 प्रागभाववादार्थः Ms. No. C.1162

Beginning :

अथ प्रागभावे किं मानम् । न तावदध्यक्षम् । इदानीं घटप्रागभावः इति प्रत्यक्षासिद्धेः । घटो भविष्यतीति प्रत्यक्षस्य च वर्तमानकालोत्तरकालोत्पत्तिकत्वस्य चाव‌‌गाहनेनैवोपपत्तेः प्रागभावासाधकत्वात् । नच अभावत्वं

End :

कालिकविशेषणतासम्बन्धेन दुःखवदन्यत्वस्य ध्वंसे × देव तदा नीन्तनदुःखध्वंसे व्यभिचारवारणसंभवात् । तद्वारणाय दुःखे चरमत्वस्य वैकल्यात् इति ।

Colo hon :

इति प्रागभाववादार्थः सम्पूर्णः ॥

## 780

Sl. No. 36952 प्रागभाववादः :Ms. No. P. 794/2

Beginning :

प्रामाण्यं स्वत एव गृह्यत इति मीमांसकाः । तत्र गुरुमते प्रामाण्यग्रह प्रतिबन्धकाभावकालीनयावत्स्वाश्रयभूतज्ञानग्राह्यत्वमेव स्वतस्त्वम् ।

End :

उपदर्शितयुक्तितश्च ज्ञानमतीन्द्रियमेव परि × दिवत्तद्व्यक्तिप्रामाण्यं योग्यमिति प्राचीनगुरुमतेऽपि निरसनीयमिति सङ्क्षेपः ।

Colophon :

इति प्रामाण्यविचारस्समाप्तः ॥

## 781

Sl. No. 36954 बाधबुद्धिवादः Ms. No. B. 385

Beginning :

तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकाले तद्धर्मावच्छिन्नविशेष्य ताकतद्विशिष्टबुद्धेरनुदयात् पर्वतत्वावच्छिन्नविशेष्यताकवह्नित्वावच्छिन्नप्रकार ताकबुद्धित्वावच्छिन्नं प्रति—

End :

तादृशफलस्य प्रामाणिकत्वे त्वनायत्या चैत्रशरीरावच्छिन्नत्वं बाधादौ विशिष्टबुद्धौ च विशेषणं देयम् । [ज्ञानस्य शरीरोपाधिकत्वात् तत्तत्पुरुषीय त्वनिवेशः तत्तच्छरीरावच्छिन्नत्व एव पर्यवस्यति इति भावः] ॥

Colophon :

इति बाधरहस्यम् ॥

## 782

Sl.No. 36955 बाधबुद्धिवादः Ms. No. C. 761

**Beginning:**

तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकालतद्धर्मावच्छिन्नविशेष्यताक तद्विशिष्टबुद्धेः अनुदयात् पर्वतत्वावच्छिन्नविशेष्यताकसंयोगादिसंसर्गकवह्नित्वाव च्छिन्नप्रकरताकालौकिकज्ञानत्वावच्छिन्नं प्रति ॥

**End:**

अन्यशरीरावच्छेदेनापि तद्विशिष्टबुद्धिः उपेयते । तदुत्पादे प्रमाणविर हात् । तादृशफलस्य प्रमाणिकत्वे तु अनायत्या चैत्रादिशरीरावच्छिन्नत्वं बाधादौ विशिष्टबुद्धौ च विशेषणं देयम् ॥

**Colophon:**

इति बाधबुद्धिवादार्थ समाप्तः ॥

## 783

Sl. No. 36957 बाधबुद्धिवादः Ms. No. C. 1714

**Beginning:**

× त एवेति तत्रेष्टापत्तिरिति वाच्यम्, संशयत्वस्य किञ्चिज्जन्यतानवच्छेदक त्वेऽपि प्रत्येकसामग्रीबलात् पर्वतत्वावच्छिन्नविशेष्यकवह्निविशिष्टबुद्धित्व तथाविधवह्न्यभावविशिष्टबुद्धत्वाद्यवच्छिन्नस्यापत्त्यैव फलतः संशयापत्तेः ।

**End:**

कायव्यूहस्थले चान्यशरीरावच्छेदेन तत्रात्मनि बाधबुद्धयसत्त्वेऽन्यशरीराव च्छेदेनापि तद्विशिष्टबुद्धिरुपेयते ।

[ अन्यथा कायव्यूहमूलतत्त्वस्यैव व्याघातः । एकस्मिन् काले विविधविचित्रानुभवप्राप्त्यै किल कायव्यूहस्वीकारः ]

तदुत्पादे प्रमाणविरहात् तादृशफलस्य प्रामाणिकत्वे त्वनायत्या चैत्रादि शरीरावच्छिन्नत्वं च बाधादौ विशिष्टबुद्धिविशेषणं च देयमिति ॥

**Colophon:**

हरिरामकृतो बाधबुद्धिविचारः समाप्तः ।

## 784

Sl. No. 36967 बाधबुद्धिवादः Ms. No. P. 1603/1

Beginning ;

नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥
द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः ॥

End :

वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता ।
कदम्बमुकुळन्यायादुत्पत्तिः कस्यचिन्मते ॥
उत्पन्नः को विनष्टश्च इति बुद्धेरनित्यता ।
सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ॥
तदेवौषधमित्यादौ साजात्यादिति × नात् ॥

Colophon :

इति श्रीमहामहोपाध्याय विश्वनाथपञ्चाननभट्टाचार्यकृतः भाषापरिच्छेदः समाप्तः ॥

## 785

Sl. No. 37009 भाषापरिच्छेदव्याख्या Ms. No: C. 4684

Beginning ;

चूडामणीकृतविधुः वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥
विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति नूतनेति ॥

End :

ननु सजातीये सोऽयमिति प्रत्यभिज्ञा कुत्र दृष्टेत्यत आह तदेवेति । यदौषधमन्येन कृतं तदौषधं मयापि कृतमित्यादिदर्शनादिति भावः ॥ १६८ ॥

Colophon :

इति श्रीमहामहोपाध्यायविद्यानिवासभट्टाचार्यपुत्र श्रीयुतविश्वनाथपञ्चानन भट्टाचार्यविरचिता सिद्धान्तमुक्तावली समाप्ता ॥

786

Sl. No: 37016 भाषापरिच्छेदव्याख्या Ms. No. P. 1962

Beginning :

लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं
भारद्वाजकुलाम्बुधौ विधुमिव श्रीगौरवास्याम्बुजात् ।
ज्ञात्वाशेषमतं मितेन वचसा सिद्धान्तमुक्तावली-
गूढार्थांस्तनुते यथामति महादेवः परेषां कृते ॥

तत्र तावद्भाषापरिच्छेदव्याख्यानं चिकीर्षुर्विश्वनाथपञ्चाननो + शिष्यशिक्षियै निबन्धं कुर्वन् ईश्वरं प्रार्थयते चूडामणीकृतेति ॥

End:

यदौषधं मया कृतमिति ॥ अत्र च स्वकृतत्वस्वभिन्नधर्मत्वरूपविरुद्ध धर्मा × भेद प्रत्ययस्य ×

भानुं प्रणम्य परिभाव्य च शास्त्रसारं
मुक्तावलीकिरण एष निवृत्तदोषः ।
सद्युक्तिभिर्दिनकरेण करेण सोऽयं
नीतः प्रकाश × धियां मुदेऽस्तु ॥

मुक्तावलीप्रकाशिकाप्यज्ञानतिमिरापहा ।
तेन सन्तोषमायातु नीलकण्ठस्सतां प्रियः ॥

Colophon :

— — —

787

Sl. No. P. 37030 भाषापरिच्छेदव्याख्या Ms. No. P. 3054

Beginning :

प्रणम्य दक्षिणामूर्तिं क्षीणगुणलक्षणम् ।
मुक्तावलीस्थवाक्यार्थनिरुक्तिः क्रियते मया ॥

मुक्तावलिमनेके प्राक् अनेकटीकादुरुत्थितधूलिमलात् × न्तरत्नमञ्जूषा ।
अनिदंपूर्वगृहीतां पट्टाभिरामकविनेमाम् ॥

End :

द्वितीयक्षणस्य कथङ्कारं वारणीयम् । एतेन ध्वंसक्षणेषु तदुत्पत्तिरवि नापत्तिधर्मारोह × उक्तिरित्याद्य ×

Colophon :

— — —

## 788

Sl. No. 36834 भाषापरिच्छेदव्याख्या Ms. No. C. 487E

Beginning :

विघ्नविघातायेति । अत्र महादेवः यद्यपि घातपदस्य उत्पत्तिमदभावपरतयः विपदमनर्थकमिति प्रतिभाति इत्याशङ्क्य तथापि विशिष्टवाचकानां सति पृथक् विशेषणवाचकपदसमवधाने विशेष्यमात्रपरतायाः सकीचकैर्मारुतपूर्णरन्ध्रैः इत्यत्र ×

End :

तथाहि प्रथमक्षणस्य तद्धटाधिकरणत्वं तावद्दुर्वारम् । तत्पूर्वं सामग्र्या सम्पन्नत्वात् । तस्य च क्षणस्य द्वितीयक्षणे ध्वंसेऽपि तथा तत्कालस्थाधि पदा × समुदायात्मक ×

Colophon :

— — —

## 789

Sl. No. 36844 भाषापरिच्छेदव्याख्या Ms. No. P. 790

Begnningi :

विघ्नविघाताय स्वेष्टदेवताप्रार्थनारूपं मङ्गलं शिष्यशिक्षायै ग्रन्थादौ उपनि बध्नाति चूडामणीकृतविधुरिति । भवो भव्याय भवतु इत्यन्वयः । महादेवः व्योमकेशो भवो भीमः इत्यमरोक्तेः ।

End :

नृसिंहादिशरीरं तैरित्यर्थः । ननु तथापि अहल्यायाः प्रतिमात्वश्रवणात् यद्वति प्रतिमात्वमादाय काष्ठादिप्रतिमायां अतिव्या ×

Colophon : — — —

## 790

Sl. No. 37033 तर्कदीपावलिः Ms. No. C. 282

Beginning :

श्रीपाण्डुरङ्गं सर्वान्तरङ्गं सर्वाङ्गमङ्गलम् ।
इन्दिरामन्दिरं वन्दे पूर्णाशेषगुणार्णवम् ॥ १ ॥
श्रीमदानन्दतीर्थश्रीजयतीर्थमुखान् मुनीन् ।
वेदेशतीर्थयदुपत्याचार्यानप्यहं भजे ॥ २ ॥
प्रह्लादकृष्णाचार्येण तर्कदीपावली शुभा ।
क्रियते न्यायसिद्धान्तमुक्तावल्याः प्रकाशिका ॥ ५ ॥

End :

येन उक्तप्रतीतिबलेन उक्तशा × ताद्भावमङ्गीकृत्य ध्वंसादेः तदविरुद्धत्वोपपादनं सङ्गतं स्यादित्यालोचनीयम् ॥ ननु द्रव्या × ष्टो नैवाभावो निरूपितो भवति । तस्याधिकरणात्मकत्वात् । अतः पृथगभावनिरूपणमयु — ॥

Colophon :

— — — —

## 791

Sl. No. 37050 दिनकरीव्यख्या Ms. No. C. 1793

Beginning :

तातस्य तर्कसरसीरुहकाननेषु
रामेश्वरस्य तरणेः प्रणम्य पादौ ।
श्रीरामरुद्रसुकृती कृतिनां हिताय
लीलावशात्किमपि कौतुकमातनोति ॥ १ ॥ +

सिद्धान्तमुक्तावली व्याख्यानं चिकीर्षुः महादेवः प्रारिप्सितग्रन्थविघ्ननिघाताय कृतं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति– लक्ष्मीति । गूढार्थान् स्तनुते विस्तारयति इत्यर्थः ।

End :

किञ्च यत्रति । स्वविशेष्यकेति । तथा च तद्विषयलौकिकप्रत्यक्षं प्रति तद्विषयकत्वेन कारणत्वमावश्यकं अन्यथा घटादिविशेष्यकालौकिकभानेन

घटादेर्भानस्याकस्मिकत्वापत्तिरिति भावः । इत्यत आहेति । इत्यभिप्रायेण ज्ञानलक्षणप्रत्यासत्तेः प्रयोजनमाहेत्यर्थ इति शिवम् ॥

Colophon :

इति दितकरितरङ्गिण्यां प्रत्यक्षतरङ्गः ॥

## 792

Sl. No. 37056 भाषापरिच्छेदव्याख्या Ms. No. p. 1200/1

Beginning :

विषयत्वमित्यादि न व्यभिचार इत्युक्तं महादेवेन । अत्रेदमवधेयम्--परमतसिद्धस्यैव हेतोरनुमापकत्वान्नवायं हेतुः परमतसिद्धः । तथा हि-

End :

निर्वह्निः पर्वतो वह्निमानित्यादौ बाधस्य दोषत्वसम्भव इत्यादि भट्टाचार्यकृतटिप्पणिरित्यवसेयः ।

Colodhon :

— — —

## 793

Sl. No: 37058 भाषारत्नम् Ms. No. P. 3395/1

Beginning :

चूडामणिपदाम्भोजभ्रमरीभूतमौलिना ।
संक्षिप्य श्रीकणादेन भाषारत्नं वितन्यते ॥

पदार्थो द्विविधः । भावोऽभावश्च । तत्र भावपदार्थो वैशेषिकमते षड्विधः द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । द्रव्यत्वं जातिविशेषः । +

End :

सादृश्यात्मकशक्यसम्बन्धा गौणी यथा + चन्द्रे तिलकमिति । तदन्याशुद्धा गङ्गायां घोष इत्यादि × तीरसंयोगरूपगङ्गापदशक्यप्रवाहसम्बन्ध इति संक्षेपः ॥

Colophon :

इति कणादतर्कवागीशभट्टाचार्यविरचितं भाषारत्नं सम्पूर्णम्

## 794

Sl.No. 37060 **भेदोपन्यासः** Ms. No: C- 2359

**Beginnig:**

यदुक्तं वेदान्तिभिः जीवपरमात्मनोः जीवानां जडानां च भेद इति तदयुक्तम्।तथाहि—भेदे प्रत्यक्षं वा अनुमानं वा आगमो वेति त्रेधा विकल्पः नाद्यः ईश्वरधर्मिकजीवप्रतियोगिकजीवधर्मिकेश्वरप्रतियोगिकभेदस्य प्रत्यक्ष सिद्धत्वं न सम्भवति ।

**End :**

भ्रमरूपज्ञानस्य अन्तःकरणोपादानकत्वेन अविद्योपादानकत्वायोगात् तथा च अविद्याभावात् कुतः तदाश्रयविचारः । तस्मात् ऐक्यस्य अप्रामाणिक त्वात् भेद एव अङ्गीकरणीयः इति सिद्धम् ॥

**Colophon :**

— — —

## 795

Sl. .No.37061 **मङ्गलमीमांसा** Ms. N. p. 10291/2

**Beginning :**

मह्यं ददातु कमनीयसिताब्जजात-
हस्तैश्चतुर्भिरपि शीतकराभमूर्तिः ।
न्याख्यादिकं दधदसौ कुरुतेऽभवक्त्रः
स्वातन्त्र्यसिद्धिमखिलासु कलासु मङ्क्षु ॥

इह खलु निखिलशिष्टाभिमतकर्मारम्भसमये तत्समाप्तिकामो मङ्गलमाचरन् निर्विघ्नज्ञानवन्तः । तत्र विप्रतिपत्तिः मङ्गलं समाप्तिकारणं न वे ति ।

**End :**

द्वितीये कस्यचिद्दण्डस्य कस्मिंश्चित्कार्यविशेषपूर्ववर्तित्वं न कार्यमात्र इत्यसम्भवः । न द्वितीयः उक्तदूषणादेव । यत्किञ्चिद्घटविशेषं प्रति नियतपूर्व वर्तित्वं गृहगोधिकादावप्यस्तीत्यतिव्याप्तिः । + किञ्च जनकत्वं कारणत्वम् । कारणत्वं च एतदेवेत्यन्योऽन्याश्रयः स्यात् ।

**Colophon ;**

— — — —

## 796

Sl. No. 37067 **मणिदीधितिसारः** Ms. No. C. 4412

Beginning

नमस्कृत्य गुरून् सारं निगूढं मणिदीधितौ ।
श्रीमदानन्दसिद्धान्तवागीशेन वितन्यते ॥

ओंनम इति। परमात्मने सर्वोत्कृष्टात्मने नमः उत्कर्षश्च जगतः सृष्टिस्थिति प्रलयकर्तृत्वं एकरूपस्य कथं सृष्ट्यादिविचित्रकार्यकारित्वं तत्र हेतुमाह--

End :

अन्यथा गगनसंयोगमात्रस्यैव तादृशस्य प्रतियोगितावच्छेदक + स्या दिति व्याचकुः। प्रतियोगितावच्छेदकसंम्बन्धरूपत्वेति तस्य प्रतियोगि--

Poolphon:

— — —

## 797

Sl. No. 37071 **मणिसारः** Ms. No. C. 2151

Beginning :

कालिन्दी कठिना सरित्तरियं जीर्णाभवानक्रमो
नो जानामि तरीतुमस्मि वनिता यास्यामि पारं कुतः ।
इत्युक्त्वा विमुखीमिव स्मितमुखीं धृत्वा चले चञ्चले
नावं प्रापयते शनैर्विहसते कृष्णाय तुभ्यं नमः ॥

निर्गलतं मणिमध्यादालोकादौ च विस्तीर्णम् ।
निष्कृष्य युक्तिसारं गोपीनाथस्ततस्तनुते ॥

End :

प्रामाण्यनिश्चयः बहुवित्तव्यायायाससाध्यप्रवृत्तिजनकः तादृशप्रवृत्ति प्रतिबन्धकतावच्छेदकावच्छिन्नज्ञानविषयप्रतियोगिनिश्चयत्वात् अनुमितिकरणी भूतव्याप्तिनिश्चयवत् ॥ प्रामाण्यवादे इदं द्रष्टव्यम् ॥

Colophon : — — —

## 798

Sl. No. 370712 | मणिसारः | Ms. No. P.1287/1

**Beginning :**

क्रीडाकोपकषायमायतमपाकर्तुं नते शङ्करे
सद्यस्मेरचमूरुलाञ्छनकलासम्पर्कसङ्कोचिताः ।
सावष्टम्भसुरारिसंघविविधाहंकारकोटिच्छिदो
रुद्राणीचरणारविन्दरुचयो विघ्नान्विनिघ्नन्तु नः ॥

निर्गलितं मणिमध्यादालोकादौ च विस्तीर्णम् ।
निष्कृष्य युक्तिसारं गोपीनाथस्ततः तनुते ॥

प्रत्यक्षानुमानयोः × अनुमानं विरूप्यते ।

**End :**

एवं केवल व्यतिरेकिणि निरूपिते × तदनन्तरं जीवनकल्पने लाघवा वतारे ज्योतिःशास्त्रप्रमाण्यग्रहरक्षादि (?) रूपतर्कावतारे च जाते जीवनोपपा दकबहिस्सत्वं—

**Colophon :**

[केवयव्यतिरेकिवादः समाप्तः] ॥

## 799

Sl. No. 37074 | मणिसारः | Ms. No. p. 3707

**Beginning :**

× तायामनवच्छेदकत्वस्य संयोगत्वेपि सत्वादिति तदसत् एकत्वस्य × णतायाः प्रागेवोक्तत्वात् । तथा च गुरुत्वाधी × किञ्च—

**End :**

प्रदुष्टभ्रमगनिहतोव देष्वनुमानचातुरीमेनाम् ।
रचयति गोपीनाथो नत्वा नत्वा च गोविन्दम् ॥

तत्र शब्दः नित्यत्व एवं × शब्दः कर्ममात्रावृत्तिद्रव्याविषयसामा × निरूप्यसामान्यावृत्तिधर्माश्रयत्वशब्दत्वसामानाधिकरण्यावच्छिन्न गुणत्वाश्रयसत्वाना × सवान् प्रमेयत्वात् घटवत् ॥

**Colophon :**

अनुमानमणिसारस्समाप्तः ॥

800

Sl. No. 37078

मणिसारः

Ms. No. P. 4902

Beginning :

उपयमुनमुरौजन्यस्तहस्तवधानां
मदचपलचकोरीलोवनानां चलानाम् ।
अपहृतवसनानां काकुवाचो निशम्य
स्वयमुपगतहासः पातु नः श्रीनिवासः ॥

निर्गलितं मणिमध्यादालोकादौ च विस्तीर्णम् ।
निष्कृष्य युक्तिसारं गोपीनाथस्ततस्तनुते ॥

उपमानशब्दयोरुपजीव्योपजीवकभावाविशेषेऽपि मानतावच्छेदकोपमानत्वस्योपजीव्यतावच्छेदकत्वमादृत्योपमाननिरूपणानन्तरं शब्दो निरूप्यते । तत्र प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः ।

End :

अनुपलब्धेश्च प्रत्यक्षसहकारित्वादिति प्रागेवोक्तमिति दिक् ॥

मणिसारभाजा मणिभूषणभूषिता भूभूषिता सुधियः ।
आलोकमणिरहस्यं बुध्वा प्रतिपक्षः इमं कुरुते ॥
भूषामणिसारौ तनयावेतौ समुत्पाद्य ।
निधुकमलविलासे गोपिनाथेऽपि मार्ताण्डः ॥
खास्तुतित्व लसन्तु भूतभवनार्थसुतस्सुधीः ।
श्रीमान् गोपीनाथ × मिलित्वा ॥
× परतो बुद्ध्वा तस्यायां वरनाथा (?)

Colophon :

शब्दखण्डमणिसारः समाप्तः ॥

801

मणिसारः

Ms. No. P. 5018

Sl. No: 37079

Beginning :

सापेक्षतयानुमानं निरूप्य शक्तिग्राहकतयोपमानत्वावच्छिन्नस्य शब्दोपजीव्यतया शब्दनिरूपणात्पूर्वमेव × दहनमितावतिव्याप्तं यत्र व्याप्तिपक्षधर्म
पुरस्कारप्रवृत्तमतिदशवाक्यार्थसाधस्य ×

End :

ननु तथापि न चतुष्टयं प्रमाणस्य सम्भवैतिह्ययोः प्रमाणान्तरत्वादिति चेन्न, सम्भवति सहस्रे शतमित्याद्यनुमानान्तर्भावादैतिह्यस्य च शब्द एवान्तर्भावादर्थापत्तेः व्यतिरेक्यनुमानरूपत्वाद्यनुपलब्धेः प्रत्यक्षसहकारित्वस्य चानुमान मणिसारेनुमानतोकभूषणे प्रत्यक्षमणिसारे प्रत्यक्षताकभूषणे च प्रातिपादितत्वा दिति दिक् । (?)

Colophon :

विक्रमाब्दे धनुष्यर्के शुक्लपक्षेऽष्टमीदिने ।
शिवेन लिखितः शब्दमणिसारस्सतां मतः ॥

802

Sl. No. 37085 मणिसारखण्डनम् Ms. No. P. 4678

Beginning:

श्रीमत्सङ्गरपुङ्गवार्यतनयात् श्रीश्रीनिवासाद्गुरोः
उद्भूतात् गुणशेवधेरुदजनि श्रीवेङ्कटाचार्यतः ।
आत्रेयान्वयसिन्धुकौस्तुभमणेर्यः श्रीनिवासस्सुधी-
र्गोपीनाथकृतिष्वयं वितरति व्याघातपारम्परीः ॥

विविधानि विचित्राणि × षणानि ददाम्यहम् ।
मणिकारादिसिद्धान्ते कथाकौतुकिनां मुदे ॥

प्रामाण्यं स्वत एव गृह्यत इति वयं, परत इति नैय्यायिकाः । तथ त्र विप्रतिपत्तिः ।

End :

ननु यद्विषययोरिति न्यायमूलकानुमानमेव तत्र मानमिति चेन्न तस्य पूर्ववद्दूषितत्वादिति ॥

Colophon :

इति निर्विकल्पकवादस्समाप्तः ॥
इति वेदान्ताचार्यश्रीनिवासस्य कृतिषु मणिसारखण्डने प्रत्यक्षखण्डस्समाप्तः ॥

## 803

Sl. No. P. 37086 मणिसारखण्डनम् Ms. No. P. 9307/1

Beginning :

पद्मां पद्मासनासीनां पद्महस्तां दयामयीम् ।
पद्मनाभप्रियां वन्दे पद्मासनमुखे स्थिताम् ॥

श्रीमत्सङ्गरपुङ्गवार्यतनयाच्छ्रींश्रीनिवासाद्गुरो-
रुद्भूताद्गुणशेवधेः उदजनि श्रीवेङ्कटाचार्यतः ।
आत्रेयान्वयसिन्धुकौस्तुभमणेर्यः श्रीनिवासस्सुधीः
गोपीनाथकृती त्वसौ वितरति व्याघातपारम्परीम् ॥

End :

बुद्धिविशेषतद्धेतुत्वकल्पने प्रवृत्तिनिमितनाग्राहकानुमानविशेषेण × तद्धेतुत्वकल्पनातौल्यात् × संभवात् इति संक्षेपः ॥

अत्रिवंशभववेङ्कटार्यज-
श्रीनिवासविदुषा विनिर्मितम् ।
पूर्णमेतदुपमानगोचरं
× मणिसारखण्डनम् ॥

Colophon :

इतिवेदान्ताचार्यश्रीनिवासदासस्य कृतिषु मणिसारखण्डने उपमानखण्डः समाप्तः ॥

## 804

Sl. No: 37087 मणिसारव्याख्या Ms. No. P. 4767

Beginning :

अथात्यन्तिकः यः दुःखनिवृत्तिलक्षणनिश्रेयससंपत्तये प्रमाणा × णेत्यादिनाद्यसूत्रेण तथा च प्रकरणभूतस्य स्थापिकत्रव (?) निकोप्याः (?) न च तमेव विदित्वातिमृत्युमेति नान्यः पन्था अयनाय विद्यत इति श्रुत्या परमात्मानं विदित्वैव ज्ञात्वैव मृत्युं ×

**End :**

